# Shri Shiva Mahapuranam 6 Kailasa Samhita

# શ્રીશિવમહાપુરાણમ્ ૬ કૈલાસસંહિતા

## Document Information

Text title : shivapurANam 6 kailAsasaMhitA

File name : shivapurANam6kailAsasaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Malati Shekar, Latha Murali, Meenakshi Premanand, Jayalakshmi, Gayathri, Uma Mahesh, Sripriya, Sornavalli

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૬ કૈલાસસંહિતા

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥ ષષ્ઠી કૈલાસસંહિતા

## ૬.૧. પ્રથમોઽધ્યાયઃ । વ્યાસશૌનકાદિસંવાદઃ ।

અથ ષષ્ઠી કૈલાસસંહિતા પ્રારભ્યતે ॥

નમઃ શિવાય સામ્બાય સગણાય સસૂનવે ।
પ્રધાનપુરુષેશાય સર્ગસ્થિતત્યન્તહેતવે ॥ ૧॥

ઋષય ઊચુઃ ।
શ્રુતોમાસંહિતા રમ્યા નાનાખ્યાનસમન્વિતા ।
કૈલાસસંહિતાં બ્રૂહિ શિવતત્ત્વવિવર્ધિનીમ્ ॥ ૨॥

વ્યાસ ઉવાચ ।
શ઼ૃણુત પ્રીતિતો વત્સાઃ કૈલાસાખ્યાં હિ સંહિતામ્ ।
શિવતત્ત્વપરાં દિવ્યાં વક્ષ્યે વઃ સ્નેહતઃ પરામ્ ॥ ૩॥

હિમવચ્છિખરે પૂર્વં તપસ્યન્તો મહૌજસઃ ।
વારાણસીં ગન્તુકામા મુનયઃ કૃતસંવિદઃ ॥ ૪॥

નિર્ગત્ય તસ્માત્સમ્પ્રાપ્ય ગિરેઃ કાશીં સમાહિતાઃ ।
સ્નાતવ્યમેવેતિ તદા દદૃશુર્મણિકર્ણિકામ્ ॥ ૫॥

તત્ર સ્નાત્વા સુસન્તર્પ્ય દેવાદીનથ જાહ્નવીમ્ ।
દૃષ્ટ્વા સ્નાત્વા મુનીશાસ્તે વિશ્વેશં ત્રિદશેશ્વરમ્ ॥ ૬॥

નમસ્કૃત્યાથ સમ્પૂજ્ય ભક્ત્યા પરમયાન્વિતાઃ ।
શતરુદ્રાદિભિઃ સ્તુત્વા સ્તુતિભિર્વેદપારગાઃ ॥ ૭॥

આત્માનં મેનિરે સર્વે કૃતાર્થા વયમિત્યુત ।
શિવપ્રીત્યા સુપૂર્ણાર્થાઃ શિવભક્તિરતાઃ સદા ॥ ૮॥

તસ્મિન્નવસરે સૂતં પઞ્ચક્રોશદિદૃક્ષયા ।
ગત્વા સમાગતં વીક્ષ્ય મુદા તે તં વવન્દિરે ॥ ૯॥

સોઽપિ વિશ્વેશ્વરં સાક્ષાદ્દેવદેવમુમાપતિમ્ ।
નમસ્કૃત્યાથ તૈઃ સાકં મુક્તિમણ્ડપમાવિશત્ ॥ ૧૦॥

તત્રાસીનં મહાત્માનં સૂતં પૌરાણિકોત્તમમ્ ।
અર્ઘ્યાદિભિસ્તદા સર્વે મુનયઃ સમુપાચરન્ ॥ ૧૧॥

તતઃ સૂતઃ પ્રસન્નાત્મા મુનીનાલોક્ય સુવ્રતાન્ ।
પપ્રચ્છ કુશલં તેઽપિ પ્રોચુઃ કુશલમાત્મનઃ ॥ ૧૨॥

તે તુ સંહૃષ્ટહૃદયં જ્ઞાત્વા તં વૈ મુનીશ્વરાઃ ।
પ્રણવાર્થાવગત્યર્થમૂચુઃ પ્રાસ્તાવિકં વચઃ ॥ ૧૩॥

મુનય ઊચુઃ ।
વ્યાસશિષ્ય મહાભાગ સૂત પૌરાણિકોત્તમ ।
ધન્યસ્ત્વં શિવભક્તો હિ સર્વવિજ્ઞાનસાગરઃ ॥ ૧૪॥

ભવન્તમેવ ભગવાન્વ્યાસઃ સર્વજગદ્ગુરુઃ ।
અભિષિચ્ય પુરાણાનાં ગુરુત્વે સમયોજયત્ ॥ ૧૫॥

તસ્માત્પૌરાણિકી વિદ્યા ભવતો હૃદિ સંસ્થિતા ।
પુરાણાનિ ચ સર્વાણિ વેદાર્થં પ્રવદન્તિ હિ ॥ ૧૬॥

વેદાઃ પ્રણવસમ્ભૂતાઃ પ્રણવાર્થો મહેશ્વરઃ ।
અતો મહેશ્વરસ્થાનં ત્વયિ ધિષ્ણ્યં પ્રતિષ્ઠિતમ્ ॥ ૧૭॥

ત્વન્મુખાબ્જપરિસ્યન્દન્મકરન્દેમનોહરમ્ ।
પ્રણવાર્થામૃતં પીત્વા ભવિષ્યામો ગતજ્વરાઃ ॥ ૧૮॥

વિશેષતો ગુરુસ્ત્વં હિ નાન્યોઽસ્માકં મહામતે ।
પરં ભાવં મહેશસ્ય પરયા કૃપયા વદ ॥ ૧૯॥

ઇતિ તેષાં વચઃ શ્રુત્વા સૂતો વ્યાસપ્રિયઃ સુધીઃ ।
ગણેશં ષણ્મુખં સાક્ષાન્મહેશાનં મહેશ્વરીમ્ ॥ ૨૦॥

શિલાદતનયં દેવં નન્દીશં સુયશાપતિમ્ ।

સનત્કુમારં વ્યાસં ચ પ્રણિપત્યેદમબ્રવીત્ ॥ ૨૧॥

સૂત ઉવાચ ।
સાધુ સાધુ મહાભાગા મુનયઃ ક્ષીણકલ્મષાઃ ।
મતિર્દૃઢતરા જાતા દુર્લભા સાપિ દુષ્કૃતામ્ ॥ ૨૨॥

પારાશર્યેણ ગુરુણા નૈમિષારણ્યવાસિનામ્ ।
મુનીનામુપદિષ્ટં યદ્ વક્ષ્યે તન્મુનિપુઙ્ગવાઃ ॥ ૨૩॥

યસ્ય શ્રવણમાત્રેણ શિવભક્તિર્ભવેન્નૃણામ્ ।
સાવધાના ભવન્તોઽદ્ય શૃણ્વન્તુ પરયા મુદા ॥ ૨૪॥

સ્વારોચિષેઽન્તરે પૂર્વં તપસ્યન્તો દૃઢવ્રતાઃ ।
ઋષયો નૈમિષારણ્યે સર્વસિદ્ધનિષેવિતે ॥ ૨૫॥

દીર્ઘસત્રં વિતન્વન્તો રુદ્રમધ્વરનાયકમ્ ।
પ્રીણયન્તઃ પરં ભાવમૈશ્વર્યં જ્ઞાતુમિચ્છવઃ ॥ ૨૬॥

નિવસન્તિ સ્મ તે સર્વે વ્યાસદર્શનકાઙ્ક્ષિણઃ ।
શિવભક્તિરતા નિત્યં ભસ્મરુદ્રાક્ષધારિણઃ ॥ ૨૭॥

તેષાં ભાવં સમાલોક્ય ભગવાન્બાદરાયણઃ ।
પ્રાદુર્બભૂવ સર્વાત્મા પરાશરતપઃફલમ્ ॥ ૨૮॥

તં દૃષ્ટ્વા મુનયઃ સર્વે પ્રહૃષ્ટવદનેક્ષણાઃ ।
અભ્યુત્થાનાદિભિઃ સર્વૈરુપચારૈરુપાચરન્ ॥ ૨૯॥

સત્કૃત્ય પ્રદદુસ્તસ્મૈ સૌવર્ણં વિષ્ટરં શુભમ્ ।
સુખોપવિષ્ટઃ સ તદા તસ્મિન્સૌવર્ણવિષ્ટરે ।
પ્રાહ ગમ્ભીરયા વાચા પારાશર્યો મહામુનિઃ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
કુશલં કિં નુ યુષ્માકં પ્રબ્રૂતાસ્મિન્મહામખે ।
અર્ચિતઃ કિં નુ યુષ્માભિઃ સમ્યગધ્વરનાયકઃ ॥ ૩૧॥

કિમર્થમત્ર યુષ્માભિરધ્વરે પરમેશ્વરઃ ।
સ્વર્ચિતો ભક્તિભાવેન સામ્બઃ સંસારમોચકઃ ॥ ૩૨॥

યુષ્મત્પ્રવૃત્તિર્મે ભાતિ શુશ્રૂષાપૂર્વમેવ હિ ।
પરભાવે મહેશસ્ય મુક્તિહેતોઃ શિવસ્ય ચ ॥ ૩૩॥

એવમુક્તા મુનીન્દ્રેણ વ્યાસેનામિતતેજસા ।
મુનયો નૈમિષારણ્યવાસિનઃ પરમૌજસઃ ॥ ૩૪॥

પ્રણિપત્ય મહાત્માનં પારાશર્યં મહામુનિમ્ ।
શિવાનુરાગસંહૃષ્ટમાનસં ચ તમબ્રુવન્ ॥ ૩૫॥

મુનય ઊચુઃ ।
ભગવન્મુનિશાર્દૂલ સાક્ષાન્નારાયણાંશજ ।
કૃપાનિધે મહાપ્રાજ્ઞ સર્વવિદ્યાધિપ પ્રભો ॥ ૩૬॥

ત્વં હિ સર્વજગદ્ભર્તુર્મહાદેવસ્ય વેધસઃ ।
સામ્બસ્ય સગણસ્યાસ્ય પ્રસાદાનાં નિધિઃ સ્વયમ્ ॥ ૩૭॥

ત્વત્પાદાબ્જરસાસ્વાદમધુપાયિતમાનસાઃ ।
કૃતાર્થા વયમદ્યૈવ ભવત્પાદાબ્જદર્શનાત્ ॥ ૩૮॥

ત્વદીયચરણામ્ભોજદર્શનં ખલુ પાપિનામ્ ।
દુર્લભં લબ્ધમસ્માભિસ્તસ્માત્સુકૃતિનો વયમ્ ॥ ૩૯॥

અસ્મિન્દેશે મહાભાગ નૈમિષારણ્યસંજ્ઞકે ।
દીર્ઘસત્રાન્વિતાઃ સર્વે પ્રણવાર્થપ્રકાશકાઃ ॥ ૪૦॥

શ્રોતવ્યઃ પરમેશાન ઇતિ કૃત્વા વિનિશ્ચિતાઃ ।
પરસ્પરં ચિન્તયન્તઃ પરં ભાવં મહેશિતુઃ ॥ ૪૧॥

અજ્ઞાતવન્ત એવૈતે વયં તસ્માદ્ભવાન્પ્રભો ।
છેત્તુમર્હતિ તાન્સર્વાન્ સંશયાનલ્પચેતસામ્ ॥ ૪૨॥

ત્વદન્યઃ સંશયસ્યાસ્ય છેતા ન હિ જગત્ત્રયે ।
તસ્માદપારગમ્ભીરવ્યામોહાબ્ધૌ નિમજ્જતઃ ॥ ૪૩॥

તારયસ્વ શિવજ્ઞાનપોતેનાસ્માન્દયાનિધે ।
શિવસદ્ભક્તિતત્ત્વાર્થં જ્ઞાતું શ્રદ્ધાલવો વયમ્ ॥ ૪૪॥

એવમભ્યર્થિતસ્તત્ર મુનિભિર્વેદપારગૈઃ ।
સર્વવેદાર્થવિન્મુખ્યઃ શુકતાતો મહામુનિઃ ।
વેદાન્તસારસર્વસ્વં પ્રણવં પરમેશ્વરમ્ ॥ ૪૫॥

ધ્યાત્વા હૃત્કર્ણિકામધ્યે સામ્બં સંસારમોચકમ્ ।
પ્રહૃષ્ટમાનસો ભૂત્વા વ્યાજહાર મહામુનિઃ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં વ્યાસશૌનકાદિસંવાદો નામ પ્રથમોઽધ્યાયઃ ॥ ૬.૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૨. દ્વિતીયોઽધ્યાયઃ । દેવીદેવસંવાદે દેવીકૃતપ્રશ્નવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
સાધુ પૃષ્ટમિદં વિપ્રા ભવદ્ભિર્ભાગ્યવત્તમૈઃ ।
દુર્લભં હિ શિવજ્ઞાનં પ્રણવાર્થપ્રકાશકમ્ ॥ ૧॥

યેષાં પ્રસન્નો ભગવાન્સાક્ષાચ્છૂલવરાયુધઃ ।
તેષામેવ શિવજ્ઞાનં પ્રણવાર્થપ્રકાશકમ્ ॥ ૨॥

જાયતે ન હિ સન્દેહો નેતરેષામિતિ શ્રુતિઃ ।
શિવભક્તિવિહીનાનામિતિ તત્ત્વાર્થનિશ્ચયઃ ॥ ૩॥

દીર્ઘસત્રેણ યુષ્માભિર્ભગવાનમ્બિકાપતિઃ ।
ઉપાસિત ઇતીદં મે દૃષ્ટમદ્ય વિનિશ્ચિતમ્ ॥ ૪॥

તસ્માદ્વક્ષ્યામિ યુષ્માકમિતિહાસં પુરાતનમ્ ।
ઉમામહેશસંવાદરૂપમદ્ભુતમાસ્તિકાઃ ॥ ૫॥

પુરાખિલજગન્માતા સતી દાક્ષાયણી તનુમ્ ।
શિવનિન્દાપ્રસઙ્ગેન ત્યક્ત્વા ચ જનકાધ્વરે ॥ ૬॥

તતઃ પ્રભાવાત્સા દેવી સુતાભૂદ્ધિમવદ્ગિરેઃ ।
શિવાર્થમતપત્સા વૈ નારદસ્યોપદેશતઃ ॥ ૭॥

તસ્મિન્ભૂધરવર્યે તુ સ્વયંવરવિધાનતઃ ।
દેવેશે ચ કૃતોદ્વાહે પાર્વતી સુખમાપ સા ॥ ૮॥

તથૈકસ્મિન્મહાદેવી સમયે પતિના સહ ।
સૂપવિષ્ટા મહાશૈલે ગૌરી દેવમભાષત ॥ ૯॥

મહાદેવ્યુવાચ ।

ભગવન્પરમેશાન પઞ્ચકૃત્યવિધાયક ।
સર્વજ્ઞ ભક્તિસુલભ પરમામૃતવિગ્રહ ॥ ૧૦॥

દાક્ષાયણીં તનું ત્યક્ત્વા તવ નિન્દાપ્રસઙ્ગતઃ ।
આસમદ્ય મહેશાન પુત્રી હિમવતો ગિરેઃ ॥ ૧૧॥

કૃપયા પરમેશાન મન્ત્રદીક્ષાવિધાનતઃ ।
માં વિશુદ્ધાત્મતત્ત્વસ્થાં કુરુ નિત્યં મહેશ્વર ॥ ૧૨॥

ઇતિ સમ્પ્રાર્થિતો દેવ્યા દેવઃ શીતાંશુભૂષણઃ ।
પ્રત્યુવાચ તતો દેવીં પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૧૩॥

મહાદેવ ઉવાચ ।
ધન્યા ત્વં દેવદેવશિ યદિ જાતેદૃશી મતિઃ ।
કૈલાસશિખરં ગત્વા કરિષ્યે ત્વાં ચ તાદૃશીમ્ ॥ ૧૪॥

તતો હિમવતો ગત્વા કૈલાસં ભૂધરેશ્વરમ્ ।
જગૌ દીક્ષાવિધાનેન પ્રણવાદીન્મનૂન્ ક્રમાત્ ॥ ૧૫॥

ઉક્ત્વા મન્ત્રાંશ્ચ તાન્દેવીં કૃત્વા શુદ્ધાત્મનિ સ્થિતામ્ ।
સાર્ધં દેવ્યા મહાદેવો દેવોદ્યાનં ગતોઽભવત્ ॥ ૧૬॥

તતઃ સુમાલિનીમુખ્યૈર્દેવ્યાઃ પ્રિયસખીજનૈઃ ।
સમાહૃતૈઃ પ્રફુલ્લૈસ્તૈઃ પુષ્પૈઃ કલ્પતરૂદ્ભવૈઃ ॥ ૧૭॥

અલઙ્કૃત્ય મહાદેવીં સ્વાઙ્કમારોપ્ય શઙ્કરઃ ।
પ્રહૃષ્ટવદનસ્તસ્થૌ વિલોક્ય ચ તદાનનમ્ ॥ ૧૮॥

તતઃ પ્રિયકથા જાતાઃ પાર્વતીપરમેશયોઃ ।
હિતાય સર્વલોકાનાં સાક્ષાચ્છ્રુત્યર્થસમ્મિતાઃ ॥ ૧૯॥

તદા સર્વજગન્માતા ભર્તુરઙ્કં સમાશ્રિતા ।
વિલોક્ય વદનં ભર્તુરિદમાહઃ તપોધનાઃ ॥ ૨૦॥

શ્રીદેવ્યુવાચ ।
ઉપદિષ્ટાસ્ત્વયા દેવ મન્ત્રાઃ સપ્રણવા મતાઃ ।
તત્રાદૌ શ્રોતુમિચ્છામિ પ્રણવાર્થં વિનિશ્ચિતમ્ ॥ ૨૩॥

કથં પ્રણવ ઉત્પન્નઃ કથં પ્રણવ ઉચ્યતે ।
માત્રાઃ કતિ સમાખ્યાતાઃ કથં વેદાદિરુચ્યતે ॥ ૨૨॥

દેવતાઃ કતિ ચ પ્રોક્તાઃ કથં દેવાદિભાવના ।
ક્રિયાઃ કતિવિધાઃ પ્રોક્તા વ્યાપ્યવ્યાપકતા કથમ્ ॥ ૨૩॥

બ્રહ્માણિ પઞ્ચ મન્ત્રેઽસ્મિન્કથં તિષ્ઠન્ત્યનુક્રમાત્ ।
કલાઃ કતિ સમાખ્યાતાઃ પ્રપઞ્ચાત્મકતા કથમ્ ॥ ૨૪॥

વાચ્યવાચકસમ્બન્ધસ્થાનાનિ ચ કથં શિવ ।
કોઽત્રાધિકારી વિજ્ઞેયો વિષયઃ ક ઉદાહૃતઃ ॥ ૨૫॥

સમ્બન્ધઃ કોઽત્ર વિજ્ઞેયઃ કિં પ્રયોજનમુચ્યતે ।
ઉપાસકસ્તુ કિંરૂપઃ કિં વા સ્થાનમુપાસનમ્ ॥ ૨૬॥

ઉપાસ્યં વસ્તુ કિંરૂપં કિં વા ફલમુપાસિતુઃ ।
અનુષ્ઠાનવિધિઃ કોવા પૂજાસ્થાનં ચ કિં પ્રભો ॥ ૨૭॥

પૂજાયાં મણ્ડલં કિં વા કિં વા ઋષ્યાદિકં હર ।
ન્યાસજાપવિધિઃ કો વા કો વા પૂજાવિધિક્રમઃ ॥ ૨૮॥

એતત્સર્વં મહેશાન સમાચક્ષ્વ વિશેષતઃ ।
શ્રોતુમિચ્છામિ તત્ત્વેન યદ્યસ્તિ મયિ તે કૃપા ॥ ૨૯॥

ઇતિ દેવ્યા સમાપૃષ્ટો ભગવાનિન્દુભૂષણઃ ।
સમ્પ્રશસ્ય મહેશાનીં વક્તું સમુપચક્રમે ॥ ૩૦॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં દેવીદેવસંવાદે દેવીકૃતપ્રશ્નવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૬.૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૩. તૃતીયોઽધ્યાયઃ । સંન્યાસપદ્ધતિવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
શ ृણુ દેવિ પ્રવક્ષ્યામિ યન્માં ત્વં પરિપૃચ્છસિ ।
તસ્ય શ્રવણમાત્રેણ જીવઃ સાક્ષાચ્છિવો ભવેત્ ॥ ૧॥

પ્રણવાર્થપરિજ્ઞાનમેવ જ્ઞાનં મદાત્મકમ્ ।

બીજં તત્સર્વવિદ્યાનાં મન્ત્રં પ્રણવનામકમ્ ॥ ૨॥

અતિસૂક્ષ્મં મહાર્થં ચ જ્ઞેયં તદ્વટબીજવત્ ।
વેદાદિ વેદસારં ચ મદ્રૂપં ચ વિશેષતઃ ॥ ૩॥

દેવો ગુણત્રયાતીતઃ સર્વજ્ઞઃ સર્વકૃત્પ્રભુઃ ।
ઓમિત્યેકાક્ષરે મન્ત્રે સ્થિતોઽહં સર્વગઃ શિવઃ ॥ ૪॥

યદસ્તિ વસ્તુ તત્સર્વં ગુણપ્રાધાન્યયોગતઃ ।
સમસ્તં વ્યસ્તમપિ ચ પ્રણવાર્થં પ્રચક્ષતે ॥ ૫॥

સર્વાર્થસાધકં તસ્માદેકં બ્રહ્મૈતદક્ષરમ્ ।
તેનોમિતિ જગત્કૃત્સ્નં કુરુતે પ્રથમં શિવઃ ॥ ૬॥

શિવો વા પ્રણવો હ્યેષ પ્રણવો વા શિવઃ સ્મૃતઃ ।
વાચ્યવાચકયોર્ભેદો નાત્યન્તં વિદ્યતે યતઃ ॥ ૭॥

તસ્માદેકાક્ષરં દેવં માં ચ બ્રહ્મર્ષયો વિદુઃ ।
વાચ્યવાચકયોરૈક્યં મન્યમાના વિપશ્ચિતઃ ॥ ૮॥

અતસ્તદેવ જાનીયાત્પ્રણવં સર્વકારણમ્ ।
નિર્વિકારી મુમુક્ષુર્માં નિર્ગુણં પરમેશ્વરમ્ ॥ ૯॥

એનમેવ હિ દેવેશિ સર્વમન્ત્રશિરોમણિમ્ ।
કાશ્યામહં પ્રદાસ્યામિ જીવાનાં મુક્તિહેતવે ॥ ૧૦॥

તત્રાદૌ સમ્પ્રવક્ષ્યામિ પ્રણવોદ્ધારમમ્બિકે ।
યસ્ય વિજ્ઞાનમાત્રેણ સિદ્ધિશ્ચ પરમા ભવેત્ ॥ ૧૧॥

નિવૃત્તિમુદ્ધરેત્પૂર્વમિન્ધનં ચ તતઃ પરમ્ ।
કાલં સમુદ્ધરેત્પશ્ચાદ્દણ્ડમીશ્વરમેવ ચ ॥ ૧૨॥

વર્ણપઞ્ચકરૂપોઽયમેવં પ્રણવ ઉદ્ધૃતઃ ।
ત્રિમાત્રબિન્દુનાદાત્મા મુક્તિદો જપતાં સદા ॥ ૧૩॥

બ્રહ્માદિસ્થાવરાન્તાનાં સર્વેષાં પ્રાણિનાં ખલુ ।
પ્રાણઃ પ્રણવ એવાયં તસ્માત્પ્રણવ ઈરિતઃ ॥ ૧૪॥

આદ્યં વર્ણમકારં ચ ઉકારમુત્તરે તતઃ ।
મકારં મધ્યતશ્ચૈવ નાદાન્તં તસ્ય ચોમિતિ ॥ ૧૫॥

જલવદ્વર્ણમાદ્યં તુ દક્ષિણે ચોત્તરે તથા ।
મધ્યે મકારં શુચિવદોઙ્કારે મુનિસત્તમ ॥ ૧૬॥

અકારશ્ચાપ્યુકારોઽયં મકારશ્ચ ત્રયં ક્રમાત્ ।
તિસ્રો માત્રાઃ સમાખ્યાતા અર્ધમાત્રા તતઃ પરમ્ ॥ ૧૭॥

અર્ધમાત્રા મહેશાનિ બિન્દુનાદસ્વરૂપિણી ।
વર્ણનીયા ન વૈ ચાદ્ધા જ્ઞેયા જ્ઞાનિભિરેવ સા ॥ ૧૮॥

ઈશાનઃ સર્વવિદ્યાનામિત્યદ્યાઃ શ્રુતયઃ પ્રિયે ।
મત્ત એવ ભવન્તીતિ વેદાઃ સત્યં વદન્તિ હિ ॥ ૧૯॥

તસ્માદ્ વેદાદિરેવાહં પ્રણવો મમ વાચકઃ ।
વાચકત્વાન્મમૈષોઽપિ વેદાદિરિતિ કથ્યતે ॥ ૨૦॥

અકારસ્તુ મહદ્ બીજં રજઃ સ્રષ્ટા ચતુર્મુખઃ ।
ઉકારઃ પ્રકૃતિર્યોનિઃ સત્ત્વં પાલયિતા હરિઃ ॥ ૨૧॥

મકારઃ પુરુષો બીજી તમઃ સંહારકો હરઃ ।
બિન્દુર્મહેશ્વરો દેવસ્તિરોભાવ ઉદાહૃતઃ ॥ ૨૨॥

નાદઃ સદાશિવઃ પ્રોક્તઃ સર્વાનુગ્રહકારકઃ ।
નાદમૂર્દ્ધનિ સઞ્ચિન્ત્યઃ પરાત્પરતરઃ શિવઃ ॥ ૨૩॥

સ સર્વજ્ઞઃ સર્વકર્ત્તા સર્વેશો નિર્મલોઽવ્યયઃ ।
અનિર્દેશ્યઃ પરબ્રહ્મ સાક્ષાત્સદસતઃ પરઃ ॥ ૨૪॥

અકારાદિષુ વર્ણેષુ વ્યાપકં ચોત્તરોત્તરમ્ ।
વ્યાપ્યં ત્વધસ્તનં વર્ણમેવં સર્વત્ર ભાવયેત્ ॥ ૨૫॥

સદ્યાદીશાનપર્યન્તાન્યકારાદિષુ પઞ્ચસુ ।
સ્થિતાનિ પઞ્ચ બ્રહ્માણિ તાનિ મન્મૂર્ત્તયઃ ક્રમાત્ ॥ ૨૬॥

અષ્ટૌ કલાઃ સમાખ્યાતા અકારે સદ્યજાઃ શિવે ।
ઉકારે વામરૂપિણ્યસ્ત્રયોદશ સમીરિતાઃ ॥ ૨૭॥

અષ્ટાવઘોરરૂપિણ્યો મકારે સંસ્થિતાઃ કલાઃ ।
બિન્દૌ ચતસ્રઃ સમ્ભૂતાઃ કલાઃ પુરુષગોચરાઃ ॥ ૨૮॥

નાદે પઞ્ચ સમાખ્યાતાઃ કલા ઈશાનસમ્ભવાઃ ।
ષડ્વિધૈક્યાનુસન્ધાનાત્પ્રપઞ્ચાત્મકતોચ્યતે ॥ ૨૯॥

મન્ત્રો યન્ત્રં દેવતા ચ પ્રપઞ્ચો ગુરુરેવ ચ ।
શિષ્યશ્ચ ષટ્પદાર્થાનામેષામર્થં શ‍ૃણુ પ્રિયે ॥ ૩૦॥

પઞ્ચવર્ણસમષ્ટિઃ સ્યાન્મન્ત્રઃ પૂર્વમુદાહૃતઃ ।
સ એવ યન્ત્રતાં પ્રાપ્તો વક્ષ્યે તન્મણ્ડલક્રમમ્ ॥ ૩૧॥

યન્ત્રં તુ દેવતારૂપં દેવતા વિશ્વરૂપિણી ।
વિશ્વરૂપો ગુરુઃ પ્રોક્તઃ શિષ્યો ગુરુવપુઃ સ્મૃતઃ ॥ ૩૨॥

ઓમિતીદં સર્વમિતિ સર્વં બ્રહ્મેતિ ચ શ્રુતેઃ ।
વાચ્યવાચકસમ્બન્ધોઽપ્યયમેવાર્થ ઈરિતઃ ॥ ૩૩॥

આધારો મણિપૂરશ્ચ હૃદયં તુ તતઃ પરમ્ ।
વિશુદ્ધિરાજ્ઞા ચ તતઃ શક્તિઃ શાન્તિરિતિ ક્રમાત્ ॥ ૩૪॥

સ્થાનાન્યેતાનિ દેવેશિ શાન્ત્યતીતં પરાત્પરમ્ ।
અધિકારી ભવેદ્યસ્ય વૈરાગ્યં જાયતે દૃઢમ્ ॥ ૩૫॥

વિષયઃ સ્યામહં દેવિ જીવબ્રહ્મૈક્યભાવનાત્ ।
સમ્બન્ધં શ‍ૃણુ દેવેશિ વિષયઃ સમ્યગીરિતઃ ॥ ૩૬॥

જીવાત્મનો મયા સાર્ધમૈક્યસ્ય પ્રણવસ્ય ચ ।
વાચ્યવાચકભાવોઽત્ર સંવન્ધઃ સમુદીરિતઃ ॥ ૩૭॥

વ્રતાદિનિરતઃ શાન્તસ્તપસ્વી વિજિતેન્દ્રિયઃ ।
શૌચાચારસમાયુક્તો ભૂદેવો વેદનિષ્ઠિતઃ ॥ ૩૮॥

વિષયેષુ વિરક્તઃ સન્નૈહિકામુષ્મિકેષુ ચ ।
દેવાનાં બ્રાહ્મણાનાં ચ સદ્ભક્તશ્ચ શિવવ્રતી ॥ ૩૯॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞં વેદાન્તજ્ઞાનપારગમ્ ।
આચાર્યમુપસઙ્ગમ્ય યતિં મતિમતાં વરમ્ ॥ ૪૦॥

દીર્ઘદણ્ડપ્રણામાદ્યૈસ્તોષયેદ્યત્નતઃ સુધીઃ ।
શાન્ત્યાદિગુણસંયુક્તઃ શિષ્યઃ સૌશીલ્યવાન્વરઃ ॥ ૪૧॥

યો ગુરુઃ સ શિવઃ પ્રોક્તો યઃ શિવઃ સ ગુરુઃ સ્મૃતઃ ।
ઇતિ નિશ્ચિત્ય મનસા સ્વવિચારં નિવેદયેત્ ॥ ૪૨॥

લબ્ધાનુજ્ઞસ્તુ ગુરુણા દ્વાદશાહં પયોવ્રતી ।

સમુદ્રતીરે નદ્યાં ચ પર્વતે વા શિવાલયે ॥ ૪૩॥

શુક્લપક્ષે તુ પઞ્ચમ્યામેકાદશ્યાં તથાપિ વા ।
પ્રાતઃ સ્નાત્વા તુ શુદ્ધાત્મા કૃતનિત્યક્રિયઃ સુધીઃ ॥ ૪૪॥

ગુરુમાહૂય વિધિના નાન્દીશ્રાદ્ધં વિધાય ચ ।
ક્ષૌરં ચ કારયિત્વાથ કક્ષોપસ્થવિવર્જિતમ્ ॥ ૪૫॥

કેશશ્મશ્રુનખાનાં વૈ સ્નાત્વા નિયતમાનસઃ ।
સક્તું પ્રાશ્યાથ સાયાહ્ને સ્નાત્વા સન્ધ્યામુપાસ્ય ચ ॥ ૪૬॥

સાયમૌપાસનં કૃત્વા ગુરુણા સહિતો દ્વિજઃ ।
શાસ્ત્રોક્તદક્ષિણાં દત્ત્વા શિવાય ગુરુરૂપિણે ॥ ૪૭॥

હોમદ્રવ્યાણિ સમ્પાદ્ય સ્વસૂત્રોક્તવિધાનતઃ ।
અગ્નિમાધાય વિધિવલ્લૌકિકાદિવિભેદતઃ ॥ ૪૮॥

આહિતાગ્નિસ્તુ યઃ કુર્યાત્પ્રાજાપત્યેષ્ટિનાહિતે ।
શ્રૌતે વૈશ્વાનરે સમ્યક્ સર્વવેદસદક્ષિણમ્ ॥ ૪૯॥

અથાગ્નિમાત્મન્યારોપ્ય બ્રાહ્મણઃ પ્રવ્રજેદ્ ગૃહાત્ ।
શ્રપયિત્વા ચરું તસ્મિન્સમિદન્નાજ્યભેદતઃ ॥ ૫૦॥

પૌરુષેણૈવ સૂક્તેન હુત્વા પ્રત્યૃચમાત્મવાન્ ।
હુત્વા ચ સૌવિષ્ટકૃતીં સ્વસૂત્રોક્તવિધાનતઃ ॥ ૫૧॥

હુત્વોપરિષ્ટાત્તન્ત્રં ચ તેનાગ્નેરુત્તરે બુધઃ ।
સ્થિત્વાસને જપેન્મૌની ચૈલાજિનકુશોત્તરે ।
યાવદ્ બ્રાહ્મમુહૂર્ત્તં તુ ગાયત્રીં દૃઢમાનસઃ ॥ ૫૨॥

તતઃ સ્નાત્વા યથાપૂર્વં શ્રપયિત્વા ચરું તતઃ ।
પૌરુષં સૂક્તમારભ્ય વિરજાન્તં હુનેદ્ બુધઃ ॥ ૫૩॥

વામદેવમતેનાપિ શૌનકાદિમતેન વા ।
તત્ર મુખ્યં વામદેવ્યં ગર્ભયુક્તો યતો મુનિઃ ॥ ૫૪॥

હોમશેષં સમાપ્યાથ પ્રાતરૌપાસનં હુનેત્ ।
તતોઽગ્નિમાત્મન્યારોપ્ય પ્રાતઃ સન્ધ્યમુપાસ્ય ચ ॥ ૫૫॥

સવિતર્યુદિતે પશ્ચાત્સાવિત્રીં પ્રાવિશેત્ક્રમાત્ ।
એષણાનાં ત્રયં ત્યક્ત્વા પ્રેષમુચ્ચાર્ય ચ ક્રમાત્ ॥ ૫૬॥

શિખોપવીતે સન્ત્યજ્ય કટિસૂત્રાદિકં તતઃ ।
વિસૃજ્ય પ્રાઙ્મુખો ગચ્છેદુત્તરાશામુખોઽપિ વા ॥ ૫૭॥

ગૃહ્ણીયાદ્દણ્ડકૌપીનાદ્યુચિતં લોકવર્તને ।
વિરક્તશ્ચેન ગૃહ્ણીયાલ્લોકવૃત્તિવિચારણે ॥ ૫૮॥

ગુરોઃ સમીપં ગત્વાથ દણ્ડવત્પ્રણમેત્ત્રયમ્ ।
સમુત્થાય તતસ્તિષ્ઠેદ્ ગુરુપાદસમીપતઃ ॥ ૫૯॥

તતો ગુરુઃ સમાદાય વિરજાનલજં સિતમ્ ।
ભસ્મ તેનૈવ તં શિષ્યં સમુદ્ધૃત્ય યથાવિધિ ॥ ૬૦॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈસ્ત્રિપુણ્ડ્રં ધારયેત્તતઃ ।
હૃત્પઙ્કજે સમાસીનં માં ત્વયા સહ ચિન્તયેત્ ॥ ૬૧॥

હસ્તં નિધાય શિરસિ શિષ્યસ્ય પ્રીતમાનસઃ ।
ઋષ્યાદિસહિતં તસ્ય દક્ષકર્ણે સમુચ્ચરેત્ ॥ ૬૨॥

પ્રણવં ત્રિઃપ્રકારં તુ તતસ્તસ્યાર્થમાદિશેત્ ।
ષડ્વિધાર્થં પરિજ્ઞાનસહિતં ગુરુસત્તમઃ ॥ ૬૩॥

દ્વિષટ્પ્રકારં સ ગુરું પ્રણમ્ય ભુવિ દણ્ડવત્ ।
તદધીનો ભવેન્નિત્યં વેદાન્તં સમ્યગભ્યસેત્ ॥ ૬૪॥

મામેવ ચિન્તયેન્નિત્યં પરમાત્માનમાત્મનિ ।
વિશુદ્ધે નિર્વિકારે વૈ બ્રહ્મસાક્ષિણમવ્યયમ્ ॥ ૬૫॥

શમાદિધર્મનિરતો વેદાન્તજ્ઞાનપારગઃ ।
અત્રાધિકારી સ પ્રોક્તો યતિર્વિગતમત્સરઃ ॥ ૬૬॥

હૃત્પુણ્ડરીકં વિરજં વિશોકં વિશદં પરમ્ ।
અષ્ટપત્રં કેશરાઢ્યં કર્ણિકોપરિ શોભિતમ્ ॥ ૬૭॥

આધારશક્તિમારભ્ય ત્રિતત્વાન્તમયં પદમ્ ।
વિચિન્ત્ય મધ્યતસ્તસ્ય દહરં વ્યોમ ભાવયેત્ ॥ ૬૮॥

ઓમિત્યેકાક્ષરં બ્રહ્મ વ્યાહરન્માં ત્વયા સહ ।
ચિન્તયેન્મધ્યતસ્તસ્ય નિત્યમુદ્યુક્તમાનસઃ ॥ ૬૯॥

એવંવિધોપાસકસ્ય મલ્લોકગતિમેવ ચ ।

મત્તો વિજ્ઞાનમાસાદ્ય મત્સાયુજ્યફલં પ્રિયે ॥ ૭૦॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સંન્યાસપદ્ધતિવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૬.૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૪. ચતુર્થોઽધ્યાયઃ । સંન્યાસાચારવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ સંન્યાસાહ્નિકકર્મ ચ ।
તવ સ્નેહાન્મહાદેવિ સમ્પ્રદાયાનુરોધતઃ ॥ ૧॥

બ્રાહ્મે મુહૂર્ત્ત ઉત્થાય શિરસિ શ્વેતપઙ્કજે ।
સહસ્રારે સમાસીનં ગુરું સઞ્ચિન્તયેદ્ધિતિઃ ॥ ૨॥

શુદ્ધસ્ફટિકસઙ્કાશં દ્વિનેત્રં વરદાભયે ।
દધાનં શિવસદ્ભાવમેવાત્મનિ મનોહરમ્ ॥ ૩॥

ભાવોપનીતૈઃ સમ્પૂજ્ય ગન્ધાદિભિરનુક્રમાત્ ।
બદ્ધાઞ્જલિપુટો ભૂત્વા નમસ્કુર્યાદ્ ગુરું તતઃ ॥ ૪॥

પ્રાતઃપ્રભૃતિ સાયાન્તે સાયાદિ પ્રાતરન્તતઃ ।
યત્કરોમિ મહાદેવ તદસ્તુ તવ પૂજનમ્ ॥ ૫॥

પ્રતિવિજ્ઞાપ્ય ગુરવે લબ્ધાનુજ્ઞસ્તતો ગુરોઃ ।
નિરુદ્ધપ્રાણ આસીનો વિજિતાત્મા જિતેન્દ્રિયઃ ॥ ૬॥

મૂલાદિબ્રહ્મરન્ધ્રાન્તં ષટ્ચક્રં પરિચિન્તયેત્ ।
વિદ્યુત્કોટિસમપ્રખ્યં સર્વતેજોમયં પરમ્ ॥ ૭॥

તન્મધ્યે ચિન્તયેન્માં ચ સચ્ચિદાનન્દવિગ્રહમ્ ।
નિર્ગુણં પરમં બ્રહ્મ સદાશિવમનામયમ્ ॥ ૮॥

સોઽહમસ્મીતિ મતિમાન્મદૈક્યમનુભૂય ચ ।
બહિર્નિર્ગત્ય ચ તતો દૂરં ગચ્છેદ્યથાસુખમ્ ॥ ૯॥

વસ્ત્રેણાચ્છાદ્ય મતિમાઞ્છિરો નાસિકયા સહ ।
વિશોધ્ય દેહં વિધિવત્તૃણમાધાય ભૂતલે ॥ ૧૦॥

ગૃહીતશિશ્ન ઉત્થાય તતો ગચ્છેજ્જલાશયમ્ ।
ઉદ્ધૃત્ય વાર્યથાન્યાયં શૌચં કુર્યાદતન્દ્રિતઃ ॥ ૧૧॥

હસ્તૌ પાદૌ ચ સંશોધ્ય દ્વિરાચમ્યોમિતિ સ્મરન્ ।
ઉત્તરાભિમુખો મૌની દન્તધાવનમાચરેત્ ॥ ૧૨॥

તૃણપર્ણૈઃ સદા કુર્યાદમામેકાદશીં વિના ।
અપાં દ્વાદશગણ્ડૂષૈર્મુખં સંશોધયેત્તતઃ ॥ ૧૩॥

દ્વિરાચમ્ય મૃદા તોયૈઃ કટિશૌચં વિધાય ચ ।
અરુણોદયકાલે તુ સ્નાનં કુર્યાન્મૃદા સહ ॥ ૧૪॥

ગુરું સંસ્મૃત્ય માં ચૈવ સ્નાનસન્ધ્યાદ્યમાચરેત્ ।
વિસ્તારભયતો નોક્તમત્ર દ્રષ્ટવ્યમન્યતઃ ॥ ૧૫॥

આબધ્ય શઙ્ખમુદ્રાં ચ પ્રણવેનાભિષેચયેત્ ।
શિરસિ દ્વાદશાવૃત્ત્યા તદર્ધં વા તદર્ધકમ્ ॥ ૧૬॥

તીરમાગત્ય કૌપીનં પ્રક્ષાલ્યાચમ્ય ચ દ્વિધા ।
પ્રોક્ષયેત્પ્રણવેનૈવ વસ્ત્રમઙ્ગોપમાર્જનમ્ ॥ ૧૭॥

મુખં પ્રથમતો મૃજ્ય શિર આરભ્ય સર્વતઃ ।
તેનૈવ માર્જયેદ્દેહં સ્થિત્વા ચ ગુરુસન્નિધૌ ॥ ૧૮॥

આબધ્યાદ્ વામતઃ શુદ્ધં કૌપીનં ચ સડોરકમ્ ।
તતઃ સન્ધારયેદ્ભસ્મ તદ્વિધિઃ પ્રોચ્યતેઽદ્રિજે ॥ ૧૯॥

દ્વિરાચમ્ય સમાદાય ભસ્મ સદ્યાદિમન્ત્રતઃ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈરભિમન્ત્ર્ય સ્પૃશેત્તનુમ્ ॥ ૨૦॥

આપોવેત્યભિમન્ત્ર્યાથ જલં તેનૈવ સેચયેત્ ।
ઓમાપોજ્યોતિરિત્યુક્ત્વા માનસ્તોકેતિ મન્ત્રતઃ ॥ ૨૧॥

સમ્મર્દ્ય કવલદ્વન્દ્વં કુર્યાદિકં તુ પઞ્ચધા ।
શિરોવદનહૃદ્ગુહ્યપાદેષુ પરમેશ્વરિ ॥ ૨૨॥

ઈશાનાદિ સમારભ્ય સદ્યાન્તં પઞ્ચભિઃ ક્રમાત્ ।
ઉદ્ધૂલ્ય કવલં પશ્ચાત્પ્રણવેનાભિષેચયેત્ ॥ ૨૩॥

સર્વાઙ્ગં ચ તતો હસ્તૌ પ્રક્ષાલ્યાન્યત્સમાહરેત્
સમ્મર્દ્ય પૂર્વવત્તત્તુ ત્રિપુણ્ડ્રાંસ્તેન ધારયેત્ ॥ ૨૪॥

ત્રિયાયુષૈસ્ત્ર્યમ્બકૈશ્ચ પ્રણવેન શિવેન ચ ।
શિરસ્યથ લલાટે ચ વક્ષસિ સ્કન્ધ એવ ચ ॥ ૨૯॥

નાભૌ બાહ્વોઃ સન્ધિષુ ચ પૃષ્ઠે ચૈવ યથાક્રમમ્ ।
પ્રક્ષાલ્ય હસ્તૌ ચ તતો દ્વિરાચમ્ય યથાવિધિ ॥ ૨૬॥

પઞ્ચીકરણમુચ્ચાર્ય ભાવયેત્સ્વગુરું બુધઃ ।
વક્ષ્યમાણપ્રકારેણ પ્રાણાયામાન્ષડાચરેત્ ॥ ૨૭॥

દક્ષહસ્તેન સઙ્ગૃહ્ય જલં વામેન પાણિના ।
સમાચ્છાદ્ય દ્વિષડ્વારં પ્રણવેનાભિમન્ત્રયેત્ ॥ ૨૮॥

એવં ત્રિવારં સમ્પ્રોક્ષ્ય શિરસિ ત્રિઃ પિબેત્તતઃ ।
સમાહિતેન મનસા ધ્યાયન્નોઙ્કારમીશ્વરમ્ ॥ ૨૯॥

સૌરમણ્ડલમધ્યસ્થં સર્વતેજોમયં પરમ્ ।
અષ્ટબાહું ચતુર્વક્ત્રમર્દ્ધનારીકમદ્ભુતમ્ ॥ ૩૦॥

સર્વાશ્ચર્યગુણોપેતં સર્વાલઙ્કારશોભિતમ્ ।
એવં ધ્યાત્વાથ વિધિવદ્દદ્યાદર્ઘ્યત્રયં તતઃ ॥ ૩૧॥

અષ્ટોત્તરશતં જપ્ત્વા દ્વિષડ્વારં તુ તર્પયેત્ ।
પુનરાચમ્ય વિધિવત્પ્રાણાયામત્રયં ચરેત્ ॥ ૩૨॥

પૂજાસદનમાગચ્છેન્મનસા સંસ્મરન્ શિવમ્ ।
દ્વારમાસાદ્ય પ્રક્ષાલ્ય પાદૌ મૌની દ્વિરાચમેત્ ॥ ૩૩॥

પ્રવિશેદ્વિધિના તત્ર દક્ષપાદપુરઃસરમ્ ।
મણ્ડપાન્તઃ સુધીસ્તત્ર મણ્ડલં રચયેત્ક્રમાત્ ॥ ૩૪॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સંન્યાસાચારવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૬.૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૫. પઞ્ચમોઽધ્યાયઃ । સંન્યાસમણ્ડલવિધિવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
પરીક્ષ્ય વિધિવદ્ભૂમિં ગન્ધવર્ણરસાદિભિઃ ।
મનોભિલષિતે તત્ર વિતાનવિતતામ્બરે ॥ ૧॥

સુપ્રલિપ્તે મહીપૃષ્ઠે દર્પણોદરસન્નિભે ।
અરત્નિયુગ્મમાનેન ચતુરસ્રં પ્રકલ્પયેત્ ॥ ૨॥

તાલપત્રં સમાદાય તત્સમાયામવિસ્તરમ્ ।
તસ્મિન્ભાગાન્પ્રકુર્વીત ત્રયોદશસમાં કલામ્ ॥ ૩॥

તત્પત્રં તત્ર નિઃક્ષિપ્ય પશ્ચિમાભિમુખઃ સ્થિતઃ ।
તત્પૂર્વભાગે સુદૃઢં સૂત્રમાદાય રઞ્જિતમ્ ॥ ૪॥

પ્રાક્ પ્રત્યગ્ દક્ષિણોદક્ ચ ચતુર્દિશિ નિપાતયેત્ ।
સૂત્રાણિ દેવદેવેશિ નવષષ્ટ્યુત્તરં શતમ્ ॥ ૫॥

કોષ્ઠાનિ સ્યુસ્તતસ્તસ્ય મધ્યકોષ્ઠં તુ કર્ણિકા ।
કોષ્ઠાષ્ટકં બહિસ્તસ્ય દલાષ્ટકમિહોચ્યતે ॥ ૬॥

દલાનિ શ્વેતવર્ણાત્રિ સમગ્રાણિ પ્રકલ્પયેત્ ।
પીતરૂપાં કર્ણિકાં ચ કૃત્વારક્તં ચ વૃત્તકમ્ ॥ ૭॥

વનભિદ્દલદક્ષં તુ સમારભ્ય સુરેશ્વરિ ।
રક્તકૃષ્ણાઃ ક્રમેણૈવ દલસન્ધીન્વિચિત્રયેત્ ॥ ૮॥

કર્ણિકાયાં લિખેદ્ યન્ત્રં પ્રણવાર્થપ્રકાશકમ્ ।
અધઃ પીઠં સમાલિખ્ય શ્રીકણ્ઠં ચ તદૂર્ધ્વતઃ ॥ ૯॥

તદુપર્યમરેશં ચ મહાકાલં ચ મધ્યતઃ ।
તન્મસ્તકસ્થં દણ્ડં ચ તત ઈશ્વરમાલિખેત્ ॥ ૧૦॥

શ્યામેન પીઠં પીતેન શ્રીકણ્ઠં ચ વિચિત્રયેત્ ।
અમરેશં મહાકાલં રક્તં કૃષ્ણં ચ તૌ ક્રમાત્ ॥ ૧૧॥

કુર્યાત્સુધૂમ્રં દણ્ડં ચ ધવલં ચેશ્વરં બુધઃ ।
એવં યન્ત્રં સમાલિખ્ય રક્તં સદ્યેન વેષ્ટયેત્ ॥ ૧૨॥

તદુત્થેનૈવ નાદેન ભિન્ધાદીશાનમીશ્વરિ ।
તદ્બાહ્યપઙ્ક્તીર્ગૃહ્ણીયાદાગ્નેયાદિક્રમેણ વૈ ॥ ૧૩॥

કોષ્ઠાનિ કોણભાગેષુ ચત્વાર્યેતાનિ સુન્દરિ ।
શુક્લેનાપૂર્ય વર્ણાદિ ચતુષ્કં રક્તધાતુભિઃ ॥ ૧૪॥

આપૂર્ય તાનિ ચત્વારિ દ્વારાણિ પરિકલ્પયેત્ ।
તતસ્તત્પાર્શ્વયોર્દ્વન્દ્વં પીતેનૈવ પ્રપૂરયેત્ ॥ ૧૫॥

આગ્નેયકોષ્ઠમધ્યે તુ પીતાભે ચતુરસ્રકે ।
અષ્ટપત્રં લિખેત્પદ્મં રક્તાભં પીતકર્ણિકમ્ ॥ ૧૬॥

હકારં વિલિખેન્મધ્યે બિન્દુયુક્તં સમાહિતઃ ।
પદ્મસ્ય નૈરૃતે કોષ્ઠે ચતુરસ્રં તદા લિખેત્ ॥ ૧૭॥

પદ્મમષ્ટદલં રક્તં પીતકિઞ્જલ્કકર્ણિકમ્ ।
શવર્ગસ્ય તૃતીયં તુ ષષ્ઠસ્વરસમન્વિતમ્ ॥ ૧૮॥

ચતુર્દશસ્વરોપેતં બિન્દુનાદવિભૂષિતમ્ ।
એતદ્ બીજવરં ભદ્રે પદ્મમધ્યે સમાલિખેત્ ॥ ૧૯॥

પદ્મસ્યેશાનકોષ્ઠે તુ તથા પદ્મં સમાલિખેત્ ।
કવર્ગસ્ય તૃતીયં તુ પઞ્ચમસ્વરસંયુતમ્ ॥ ૨૦॥

વિલિખેન્મધ્યતસ્તસ્ય બિન્દું કણ્ઠે સ્વલઙ્કૃતમ્ ।
તદ્બાહ્યપઙ્ક્તિત્રિતયે પૂર્વાદિપરિતઃ ક્રમાત્ ॥ ૨૧॥

કોષ્ઠાનિ પઞ્ચ ગૃહ્ણીયાદ્ગિરિરાજસુતે શિવે ।
મધ્યે તુ કર્ણિકાં કુર્યાત્પીતાં રક્તં ચ વૃત્તકમ્ ॥ ૨૨॥

દલાનિ રક્તવર્ણાનિ કલ્પયેત્કલ્પવિત્તમઃ ।
દલબાહ્યે તુ કૃષ્ણેન રન્ધ્રાણિ પરિપૂરયેત્ ॥ ૨૩॥

આગ્નેયાદીનિ ચત્વારિ શુક્લેનૈવ પ્રપૂરયેત્ ।
પૂર્વે ષડ્બિન્દુસહિતં ષટ્કોણં કૃષ્ણમાલિખેત્ ॥ ૨૪॥

રક્તવર્ણં દક્ષિણતસ્ત્રિકોણં ચોત્તરે તતઃ ।
શ્વેતાભમર્દ્ધચન્દ્રં ચ પીતવર્ણં ચ પશ્ચિમે ॥ ૨૫॥

ચતુરસ્રં ક્રમાત્તેષુ લિખેદ્બીજં ચતુષ્ટયમ્ ।
પૂર્વે બિન્દું સમાલિખ્ય શુભ્રં કૃષ્ણં તુ દક્ષિણે ॥ ૨૬॥

ઉકારમુત્તરે રક્તં મકારં પશ્ચિમે તતઃ ।
અકારં પીતમેવં તુ કૃત્વા વર્ણચતુષ્ટયમ્ ॥ ૨૭॥

સર્વોર્ધ્વપઙ્ક્ત્યધઃ પઙ્ક્તૌ સમારભ્ય ચ સુન્દરિ ।
પીતં શ્વેતં ચ રક્તં ચ કૃષ્ણં ચેતિ ચતુષ્ટયમ્ ॥ ૨૮॥

તદધો ધવલં શ્યામં પીતં રક્તં ચતુષ્ટયમ્ ।
અધસ્ત્રિકોણકે રક્તં શુક્લં પીતં વરાનને ॥ ૨૯॥

એવં દક્ષિણમારભ્ય કુર્યાત્સોમાન્તમીશ્વરિ ।
તદ્બાહ્યપઙ્ક્તૌ પૂર્વાદિમધ્યમાન્તં વિચિત્રયેત્ ॥ ૩૦॥

પીતં રક્તં ચ કૃષ્ણં ચ શ્યામં શ્વેતં ચ પીતકમ્ ।
આગ્નેયાદિ સમારભ્ય રક્તં શ્યામં સિતં પ્રિયે ॥ ૩૧॥

રક્તં કૃષ્ણં ચ રક્તં ચ ષટ્કમેવ પ્રકીર્તિતમ્ ।
દક્ષિણાદ્યં મહેશાનિ પૂર્વાવધિ સમીરિતમ્ ॥ ૩૨॥

નૈરૃતાદ્યં તુ વિજ્ઞેયમાગ્નેયાવધિ ચેશ્વરિ ।
વારુણં તુ સમારભ્ય દક્ષિણાવધિ ચેરિતમ્ ॥ ૩૩॥

વાયવ્યાદ્યં મહાદેવિ નૈરૃતાવધિ ચેરિતમ્ ।
સોમાદ્યં પરમેશાનિ વારુણાવધિ ચેરિતમ્ ॥ ૩૪॥

ઈશાનાદ્યં તુ વિજ્ઞેયં વાયવ્યાવધિ ચામ્બિકે ।
ઇત્યુક્તો મણ્ડલવિધિર્મયા તુભ્યં ચ પાર્વતિ ॥ ૩૫॥

એવં મણ્ડલમાલિખ્ય નિયતાત્મા યતિઃ સ્વતઃ ।
સૌરપૂજાં પ્રકુર્વીત સ હિ તદ્વસ્તુતત્પરઃ ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સંન્યાસમણ્ડલવિધિવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૬.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૬. ષષ્ઠોઽધ્યાયઃ । અન્ન્યાસપદ્ધતૌ ન્યાસવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
દક્ષિણે મણ્ડલસ્યાથ વૈયાઘ્રં ચર્મ શોભનમ્ ।
આસ્તીર્ય શુદ્ધતોયેન પ્રોક્ષયેદસ્ત્રમન્ત્રતઃ ॥ ૧॥

પ્રણવં પૂર્વમુદ્ધૃત્ય પશ્ચાદાધારમુદ્ધરેત્ ।
તત્પશ્ચાચ્છક્તિકમલં ચતુર્થ્યન્તં નમોઽન્તકમ્ ॥ ૨॥

મનુમેવં સમુચ્ચાર્ય સ્થિત્વા તસ્મિન્નુદઙ્મુખઃ ।
પ્રાણાનાયમ્ય વિધિવત્પ્રણવોચ્ચારપૂર્વકમ્ ॥ ૩॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈર્ભસ્મ સન્ધારયેત્તતઃ ।
શિરસિ શ્રીગુરું નત્વા મણ્ડલં રચયેત્પુનઃ ॥ ૪॥

ત્રિકોણવૃત્તં બાહ્યે તુ ચતુરસ્રાત્મકં ક્રમાત્ ।
અભ્યર્ચ્યોમિતિ સાધારં સ્થાપ્ય શઙ્ખં સમર્ચયેત્ ॥ ૫॥

આપૂર્ય શુદ્ધતોયેન પ્રણવેન સુગન્ધિના ।
અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈઃ પ્રણવેન ચ સપ્તધા ॥ ૬॥

અભિમન્ત્ર્ય તતસ્તસ્મિન્ધેનુમુદ્રાં પ્રદર્શયેત્ ।
શઙ્ખમુદ્રાં ચ તેનૈવ પ્રોક્ષયેદસ્ત્રમન્ત્રતઃ ॥ ૭॥

આત્માનં ગન્ધપુષ્પાદિપૂજોપકરણાનિ ચ ।
પ્રાણાયામત્રયં કૃત્વા ઋષ્યાદિકમથાચરેત્ ॥ ૮॥

અસ્ય શ્રીસૌરમન્ત્રસ્ય દેવભાગ ઋષિસ્તતઃ ।
છન્દો ગાયત્રમિત્યુક્તં દેવઃ સૂર્યો મહેશ્વરઃ ॥ ૯॥

દેવતા સ્યાત્ષડઙ્ગાનિ હ્રામિત્યાદીનિ વિન્યસેત્ ।
તતઃ સમ્પ્રોક્ષયેત્પદ્મમસ્ત્રેણાગ્નેરગોચરમ્ ॥ ૧૦॥

તસ્મિન્સમર્ચયેદ્વિદ્વાન્ પ્રભૂતાં વિમલામપિ ।
સારાં ચાથ સમારાધ્ય પૂર્વાદિપરતઃ ક્રમાત્ ॥ ૧૧॥

અથ કાલાગ્નિરુદ્રં ચ શક્તિમાધારસંજ્ઞિતામ્ ।
અનન્તં પૃથિવીં ચૈવ રત્નદ્વીપં તથૈવ ચ ॥ ૧૨॥

સઙ્કલ્પ્ય વૃક્ષોદ્યાનં ચ ગૃહં મણિમયં તતઃ ।
રક્તપીઠં ચ સમ્પૂજ્ય પાદેષુ પ્રાગુપક્રમાત્ ॥ ૧૩॥

ધર્મં જ્ઞાનં ચ વૈરાગ્યમૈશ્વર્યં ચ ચતુષ્ટયમ્ ।
અધર્માદ્યગ્નિકોણાદિકોણેષુ ચ સમર્ચયેત્ ॥ ૧૪॥

માયાધશ્છદનં પશ્ચાદ્વિદ્યોર્ધ્વચ્છદનં તતઃ ।
સત્ત્વં રજસ્તમશ્ચૈવ સમભ્યર્ચ્ય યથાક્રમમ્ ॥ ૧૫॥

પૂર્વાદિદિક્ષુ મધ્યે ચ દીપ્તાં સૂક્ષ્માં જયામપિ ।
ભદ્રાં વિભૂતિં વિમલામમોઘાં વૈદ્યુતામપિ ॥ ૧૬॥

સર્વતોમુખસંજ્ઞાં ચ કન્દનાલં તથૈવ ચ ।
સુષિરં ચ તતસ્તં તુ કણ્ટકાંસ્તદનન્તરમ્ ॥ ૧૭॥

મૂલચ્છદનકિઞ્જલ્કપ્રકાશસકલાત્મનઃ ।
પઞ્ચગ્રન્થિકર્ણિકાં ચ દલાનિ તદનન્તરમ્ ॥ ૧૮॥

કેશરાન્ બ્રહ્મવિષ્ણૂ ચ રુદ્રમાત્માનમેવ ચ ।
અન્તરાત્માનમપિ ચ જ્ઞાનાત્મપરમાત્મનિ ॥ ૧૯॥

સમ્પૂજ્ય પશ્ચાત્સૌરાખ્યં યોગપીઠં સમર્ચયેત્ ।
પીઠોપરિ સમાકલ્પ્ય મૂર્ત્તિં મૂલેન મૂલવિત્ ॥ ૨૦॥

નિરુદ્ધપ્રાણ આસીનો મૂલેનૈવ સ્વમૂલતઃ ।
શક્તિમુત્થાપ્ય તત્તેન પ્રભાવાત્પિઙ્ગલાધ્વના ॥ ૨૧॥

પુષ્પાઞ્જલૌ નિર્ગમય્ય મણ્ડલસ્થસ્ય ભાસ્વતઃ ।
સિન્દૂરારુણદેહસ્ય વામાર્ધદયિતસ્ય ચ ॥ ૨૨॥

અક્ષસ્રક્પાશખટ્વાઙ્ગકપાલાઙ્કુશપઙ્કજમ્ ।
શઙ્ખં ચક્રં દધાનસ્ય ચતુર્વક્ત્રસ્ય લોચનૈઃ ॥ ૨૩॥

રાજિતસ્ય દ્વાદશભિસ્તસ્ય હૃત્પઙ્કજોદરે ।
પ્રણવં પૂર્વમુદ્ધૃત્ય હ્રાં હ્રીં સસ્તદનન્તરમ્ ॥ ૨૪॥

પ્રકાશશક્તિસહિતં માર્તણ્ડં ચ તતઃ પરમ્ ।
આવાહયામિ નમ ઇત્યાવાહ્યાવાહનાખ્યયા ॥ ૨૫॥

મુદ્રયા સ્થાપનાદ્યાશ્ચ મુદ્રાઃ સન્દર્શયેત્તતઃ ।
વિન્યસ્યાઙ્ગાનિ હ્રાં હ્રીં હ્રૂં અન્તેન મનુના તતઃ ॥ ૨૬॥

પઞ્ચોપચારાન્સઙ્કલ્પ્ય મૂલેનાભ્યર્ચયેત્ ત્રિધા ।

કેશરેષુ ચ પદ્મસ્ય ષડઙ્ગાનિ મહેશ્વરિ ॥ ૨૭॥

વહ્નીશરક્ષોવાયૂનાં પરિતઃ ક્રમતઃ સુધીઃ ।
દ્વિતીયાવરણે પૂજ્યાશ્ચતસ્રો મૂર્તયઃ ક્રમાત્ ॥ ૨૮॥

પૂર્વાદ્યુત્તરપર્યન્તં દલમૂલેષુ પાર્વતિ ।
આદિત્યો ભાસ્કરો ભાનૂ રવિશ્ચેત્યનુપૂર્વશઃ ॥ ૨૯॥

અર્કો બ્રહ્મા તથા રુદ્રો વિષ્ણુશ્ચેતિ પુનઃ પ્રિયે ।
ઈશાનાદિષુ સમ્પૂજ્યાસ્તૃતીયાવરણે પુનઃ ॥ ૩૦॥

સોમં કુજં બુધં જીવં કવિં મન્દં તમસ્તમઃ ।
સમન્તતો યજેદેતાન્પૂર્વાદિદલમધ્યતઃ ॥ ૩૧॥

અથવા દ્વાદશાદિત્યાન્દ્વિતીયાવરણે યજેત્ ।
તૃતીયાવરણે ચૈવ રાશીન્દ્વાદશ પૂજયેત્ ॥ ૩૨॥

સપ્તસાગરગઙ્ગાશ્ચ બહિરસ્ય સમન્તતઃ ।
ઋષીન્દેવાંશ્ચ ગન્ધર્વાન્પન્નગાનપ્સરોગણાન્ ॥ ૩૩॥

ગ્રામણ્યશ્ચ તથા યક્ષાન્યાતુધાનાંસ્તથા હયાન્ ।
સપ્તચ્છન્દોમયાંશ્ચૈવ બાલખિલ્યાંશ્ચ પૂજયેત્ ॥ ૩૪॥

એવં ત્ર્યાવરણં દેવં સમભ્યર્ચ્ય દિવાકરમ્ ।
વિરચ્ય મણ્ડલં પશ્ચાચ્ચતુરસ્રં સમાહિતઃ ॥ ૩૫॥

સ્થાપ્ય સાધારકં તામ્રપાત્રં પ્રસ્થોદવિસ્તૃતમ્ ।
પૂરયિત્વા જલૈઃ શુદ્ધૈર્વાસિતૈઃ કુસુમાદિભિઃ ॥ ૩૬॥

અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈર્જાનુભ્યામવનિં ગતઃ ।
અર્ઘ્યપાત્રં સમાદાય ભ્રૂમધ્યાન્તં સમુદ્ધરેત્ ॥ ૩૭॥

તતો બ્રૂયાદિમં મન્ત્રં સાવિત્રં સર્વસિદ્ધિદમ્ ।
શૃણુ તચ્ચ મહાદેવિ ભુક્તિમુક્તિપ્રદં સદા ॥ ૩૮॥

સિન્દૂરવર્ણાય સુમણ્ડલાય
નમોઽસ્તુ વજ્રાભરણાય તુભ્યમ્ ।
પદ્માભનેત્રાય સપઙ્કજાય
બ્રહ્મેન્દ્રનારાયણકારણાય ॥ ૩૯॥

સરક્તચૂર્ણં સસુવર્ણતોયં

સ્રક્કુઙ્કુમાઢ્યં સકુશં સપુષ્પમ્ ।
પ્રદત્તમાદાય સહેમપાત્રં
પ્રશસ્તમર્ઘ્યં ભગવન્પ્રસીદ ॥ ૪૦॥

એવમુક્ત્વા તતો દત્ત્વા તદર્ઘ્યં સૂર્યમૂર્તયે ।
નમસ્કુર્યાદિમં મન્ત્રં પઠિત્વા સુસમાહિતઃ ॥ ૪૧॥

નમઃ શિવાય સામ્બાય સગણાયાદિહેતવે ।
રુદ્રાય વિષ્ણવે તુભ્યં બ્રહ્મણે ચ ત્રિમૂર્તયે ॥ ૪૨॥

એવમુક્ત્વા નમસ્કૃત્ય સ્વાસને સમવસ્થિતઃ ।
ઋષ્યાદિકં પુનઃ કૃત્વા કરં સંશોધ્ય વારિણા ॥ ૪૩॥

પુનશ્ચ ભસ્મ સન્ધાર્ય પૂર્વોક્તેનૈવ વર્ત્મના ।
ન્યાસજાતં પ્રકુર્વીત શિવભાવવિવૃદ્ધયે ॥ ૪૪॥

પઞ્ચોપચારૈઃ સમ્પૂજ્ય શિરસા શ્રીગુરું બુધઃ ।
પ્રણવં શ્રીચતુર્થ્યન્તં નમોઽન્તં પ્રણમેત્તતઃ ॥ ૪૫॥

પઞ્ચાત્મકં બિન્દુયુતં પઞ્ચમસ્વરસંયુતમ્ ।
તદેવં બિન્દુસહિતં પઞ્ચમસ્વરવર્જિતમ્ ॥ ૪૬॥

પઞ્ચમસ્વરસંયુક્તં મન્ત્રીશં ચ સબિન્દુકમ્ ।
ઉદ્ધૃત્ય બિન્દુસહિતં સંવર્તકમથોદ્ધરેત્ ॥ ૪૭॥

એતૈરેવં ક્રમાદ્બીજૈરુદ્ધૃતૈઃ પ્રણમેદ્ બુધઃ ।
ભુજયોરૂરુયુગ્મે ચ ગુરું ગણપતિં તથા ॥ ૪૮॥

દુર્ગાં ચ ક્ષેત્રપાલં ચ બદ્ધાઞ્જલિપુટઃ સ્થિતઃ ।
ઓમસ્ત્રાય ફડિત્યુક્ત્વા કરૌ સંશોધ્ય ષટ્ ક્રમાત્ ॥ ૪૯॥

અપસર્પન્ત્વિતિ પ્રોચ્ય પ્રણવં તદનન્તરમ્ ।
અસ્ત્રાય ફડિતિ પ્રોચ્ય પાર્ષ્ણિઘાતત્રયેણ તુ ॥ ૫૦॥

ઉદ્ધૃત્ય વિઘ્નાન્ભૂયિષ્ઠાન્કરતાલત્રયેણ તુ ।
અન્તરિક્ષગતાન્દૃષ્ટ્વા વિલોક્ય દિવિ સંસ્થિતાન્ ॥ ૫૧॥

નિરુદ્ધપ્રાણ આસીનો હંસમન્ત્રમનુસ્મરન્ ।
હૃદિસ્થં જીવચૈતન્યં બ્રહ્મનાડ્યા સમાનયેત્ ॥ ૫૨॥

દ્વાદશાન્તઃ સ્થવિશદે સહસ્રારમહામ્બુજે ।

ચિચ્ચન્દ્રમણ્ડલાન્તઃસ્થં ચિદ્રૂપં પરમેશ્વરમ્ ॥ ૫૩॥

શોષદાહપ્લવાન્કુર્યાદ્રિચકાદિ ક્રમેણ તુ ।
સષોડશચતુષ્ષષ્ટિદ્વાત્રિંશદ્વર્ણનાયુતૈઃ ॥ ૫૪॥

વાય્વગ્નિસલિલાર્ણૈસ્તૈઃ સ્વવેદાદ્યૈરનુક્રમાત્ ।
પ્રાણાનાયમ્ય મૂલસ્થાં કુણ્ડલીં બ્રહ્મરન્ધ્રગામ્ ॥ ૫૫॥

આનીય દ્વાદશાન્તઃસ્થસહસ્રારામ્બુજોદરે ।
ચિચ્ચન્દ્રમણ્ડલોદ્ભૂતપરમામૃતધારયા ॥ ૫૬॥

સંસિક્તાયાં તનૌ ભૂયઃ શુદ્ધદેહઃ સુભાવનઃ ।
સોઽહમિત્યવતીર્યાથ સ્વાત્માનં હૃદયામ્બુજે ॥ ૫૭॥

આત્મન્યાવેશ્ય ચાત્માનમમૃતં સૃતિધારયા ।
પ્રાણપ્રતિષ્ઠાં વિધિવત્કુર્યાદત્ર સમાહિતઃ ॥ ૫૮॥

એકાગ્રમાનસો યોગી વિમૃશ્યાત્તાં ચ માતૃકામ્ ।
પુટિતાં પ્રણવેનાથ ન્યસેદ્બાહ્યે ચ માતૃકામ્ ॥ ૫૯॥

પુનશ્ચ સંયતપ્રાણઃ કુર્યાદ્ દૃષ્ટ્યાદિકં બુધઃ ।
શઙ્કરં સંસ્મરંશ્ચિત્તે સંન્યસેચ્ચ વિમત્સરઃ ॥ ૬૦॥

પ્રણવસ્ય ઋષિર્બ્રહ્મા દેવિ ગાયત્રમીરિતમ્ ।
છન્દોઽત્ર દેવતાહં વૈ પરમાત્મા સદાશિવઃ ॥ ૬૧॥

અકારો બીજમાખ્યાતમુકારઃ શક્તિરુચ્યતે ।
મકારઃ કીલકં પ્રોક્તં મોક્ષાર્થે વિનિયુજ્યતે ॥ ૬૨॥

અઙ્ગુષ્ઠદ્વયમારભ્ય તલાન્તં પરિમાર્જયેત્ ।
ઓમિત્યુક્ત્વાથ દેવેશિ કરન્યાસં સમારભેત્ ॥ ૬૩॥

દક્ષહસ્તસ્થિતાઙ્ગુષ્ઠં સમારભ્ય યથાક્રમમ્ ।
વામહસ્તકનિષ્ઠાન્તં વિન્યસેત્પૂર્વવત્ક્રમાત્ ॥ ૬૪॥

અકારમપ્યુકારં ચ મકારં બિન્દુસંયુતમ્ ।
નમોઽન્તં પ્રોચ્ય સર્વત્ર હૃદયાદૌ ન્યસેદથ ॥ ૬૫॥

અકારં પૂર્વમુદ્ધૃત્ય બ્રહ્માત્માનમથાચરેત્ ।
ઙેઽન્તં નમોઽન્તં હૃદયે વિનિયુજ્યાત્તથા પુનઃ ॥ ૬૬॥

ઉકારં વિષ્ણુસહિતં શિરોદેશે પ્રવિન્યસેત્ ।
મકારં રુદ્રસહિતં શિખાયાં તુ પ્રવિન્યસેત્ ॥ ૬૭॥

એવમુક્ત્વા મુનિર્મન્ત્રી કવચં નેત્રમસ્તકે ।
વિન્યસેદ્દેવદેવેશિ સાવધાનેન ચેતસા ॥ ૬૮॥

અઙ્ગવક્ત્રકલાભેદાત્પઞ્ચ બ્રહ્માણિ વિન્યસેત્ ।
શિરોવદનહૃદ્ગુહ્યપાદેષ્વેતાનિ વિન્યસેત્ ॥ ૬૯॥

ઈશાનસ્ય કલાઃ પઞ્ચ પઞ્ચસ્વેતેષુ ચ ક્રમાત્ ।
તતશ્ચતુર્ષુ વક્ત્રેષુ પુરુષસ્ય કલા અપિ ॥ ૭૦॥

ચતસ્રઃ પ્રણિધાતવ્યાઃ પૂર્વાદિક્રમયોગતઃ ।
હૃત્કણ્ઠાંસેષુ નાભૌ ચ કુક્ષૌ પૃષ્ઠે ચ વક્ષસિ ॥ ૭૧॥

અઘોરસ્ય કલાશ્ચાષ્ટૌ પૂજનીયા યથાક્રમમ્ ।
પશ્ચાત્ ત્રયોદશકલાઃ પાયુમેઢ્રોરુજાનુષુ ॥ ૭૨॥

જઙ્ઘાસ્ફિક્કટિપાર્શ્વેષુ વામદેવસ્ય ભાવયેત્ ।
સદ્યસ્યાપિ કલાશ્ચાષ્ટૌ નેત્રેષુ ચ યથાક્રમમ્ ॥ ૭૩॥

કીર્તિતાસ્તાઃ કલાશ્ચૈવં પાદયોરપિ હસ્તયોઃ ।
પ્રાણે શિરસિ બાહ્વોશ્ચ કલ્પયેત્કલ્પવિત્તમઃ ॥ ૭૪॥

અષ્ટત્રિંશત્કલાન્યાસમેવં કૃત્વા તુ સર્વશઃ ।
પશ્ચાત્પ્રણવવિદ્ધીમાન્પ્રણવન્યાસમાચરેત્ ॥ ૭૫॥

બાહુદ્વયે કૂર્પરયોસ્તથા ચ મણિબન્ધયોઃ ।
પાર્શ્વતોદરજઙ્ઘેષુ પાદયોઃ પૃષ્ઠતસ્તથા ॥ ૭૬॥

ઇત્થં પ્રણવવિન્યાસં કૃત્વા ન્યાસવિચક્ષણઃ ।
હંસન્યાસં પ્રકુર્વીત પરમાત્મવિબોધિનિ ॥ ૭૭॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સંન્યાસપદ્ધતૌ ન્યાસવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬.૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૭. સપ્તમોઽધ્યાયઃ । શિવધ્યાનપૂજનવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
સ્વવામે ચતુરસ્રં તુ મણ્ડલં પરિકલ્પયેત્ ।
ઓમિત્યભ્યર્ચ્ય તસ્મિંસ્તુ શઙ્ખમસ્ત્રોપશોધિતમ્ ॥ ૧॥

સ્થાપ્ય સાધારકં તં તુ પ્રણવેનાર્ચયેત્તતઃ ।
આપૂર્ય શુદ્ધતોયેન ચન્દનાદિસુગન્ધિના ॥ ૨॥

અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈઃ પ્રણવેન ચ સપ્તધા ।
અભિમન્ત્ર્ય તતસ્તસ્મિન્ધેનુમુદ્રાં પ્રદર્શયેત્ ॥ ૩॥

શઙ્ખમુદ્રાં ચ પુરતશ્ચતુરસ્રં પ્રકલ્પયેત્ ।
તદન્તરેઽર્ધચન્દ્રં ચ ત્રિકોણં ચ તદન્તરે ॥ ૪॥

ષટ્કોણં વૃત્તમેવેદં મણ્ડલં પરિકલ્પયેત્ ।
અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈઃ પ્રણવેનાથ મધ્યતઃ ॥ ૫॥

સાધારમર્ઘ્યપાત્રં ચ સ્થાપ્ય ગન્ધાદિનાર્ચયેત્ ।
આપૂર્ય શુદ્ધતોયેન તસ્મિન્પાત્રે વિનિઃક્ષિપેત્ ॥ ૬॥

કુશાગ્રાણ્યક્ષતાંશ્ચૈવ યવવ્રીહિતિલાનપિ ।
આજ્યસિદ્ધાર્થપુષ્પાણિ ભસિતં ચ વરાનને ॥ ૭॥

સદ્યોજાતાદિભિર્મન્ત્રૈઃ ષડઙ્ગૈઃ પ્રણવેન ચ ।
અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈરભિમન્ત્ર્ય ચ વર્મણા ॥ ૮॥

અવગુણ્ઠ્યાસ્ત્રમન્ત્રેણ સંરક્ષાર્થં પ્રદર્શયેત્ ।
ધેનુમુદ્રાં ચ તેનૈવ પ્રોક્ષયેદસ્ત્રમન્ત્રતઃ ॥ ૯॥

સ્વાત્માનં ગન્ધપુષ્પાદિપૂજોપકરણાન્યપિ ।
પદ્મસ્યેશાનદિક્પદ્મં પ્રણવોચ્ચારપૂર્વકમ્ ॥ ૧૦॥

ગુર્વાસનાય નમ ઇત્યાસનં પરિકલ્પયેત્ ।
ગુરોર્મૂર્તિં ચ તત્રૈવ કલ્પયેદુપદેશતઃ ॥ ૧૧॥

પ્રણવં ગું ગુરુભ્યોઽન્તે નમઃ પ્રોચ્ચાપિ દેશિકમ્ ।
સમાવાહ્ય તતો ધ્યાયેદ્દક્ષિણાભિમુખં સ્થિતમ્ ॥ ૧૨॥

સુપ્રસન્નમુખં સૌમ્યં શુદ્ધસ્ફટિકનિર્મલમ્ ।

વરદાભયહસ્તં ચ દ્વિનેત્રં શિવવિગ્રહમ્ ॥ ૧૩॥

એવં ધ્યાત્વા યજેદ્ગન્ધપુષ્પાદિભિરનુક્રમાત્ ।
પદ્મસ્ય નૈરૃતે પદ્મે ગણપત્યાસનોપરિ ॥ ૧૪॥

મૂર્તિં પ્રકલ્પ્ય તત્રૈવ ગણાનાં ત્વેતિ મન્ત્રતઃ ।
સમાવાહ્ય તતો દેવં ધ્યાયેદેકાગ્રમાનસઃ ॥ ૧૫॥

રક્તવર્ણં મહાકાયં સર્વાભરણભૂષિતમ્ ।
પાશાઙ્કુશાક્ષાભીષ્ટં ચ દધાનં કરપઙ્કજૈઃ ॥ ૧૬॥

ગજાનનં પ્રભું સર્વવિઘ્નૌઘઘ્નમુપાસિતુઃ ।
એવં ધ્યાત્વા યજેદ્ગન્ધપુષ્પાદ્યૈરુપચારકૈઃ ॥ ૧૭॥

કદલીનારિકેલામ્રફલલડ્ડુકપૂર્વકમ્ ।
નૈવેદ્યં ચ સમર્પ્યાથ નમસ્કુર્યાદ્ગજાનનમ્ ॥ ૧૮॥

પદ્મસ્ય વાયુદિક્પદ્મે સઙ્કલ્પ્ય સ્કાન્દમાસનમ્ ।
સ્કન્દમૂર્તિં પ્રકલ્પ્યાથ સ્કન્દમાવાહયેદ્ બુધઃ ॥ ૧૯॥

ઉચ્ચાર્ય સ્કન્દગાયત્રીં ધ્યાયેદથ કુમારકમ્ ।
ઉદ્યદાદિત્યસઙ્કાશં મયૂરવરવાહનમ્ ॥ ૨૦॥

ચતુર્ભુજમુદારાઙ્ગં મુકુટાદિવિભૂષિતમ્ ।
વરદાભયહસ્તં ચ શક્તિકુક્કુટધારિણમ્ ॥ ૨૧॥

એવં ધ્યાત્વાથ ગન્ધાદ્યૈરુપચારૈરનુક્રમાત્ ।
સમ્પૂજ્ય પૂર્વદ્વારસ્ય દક્ષશાખામુપાશ્રિતમ્ ॥ ૨૨॥

અન્તઃપુરાધિપં સાક્ષાન્નન્દિનં સમ્યગર્ચયેત્ ।
ચામીકરાચલપ્રખ્યં સર્વાભરણભૂષિતમ્ ॥ ૨૩॥

બાલેન્દુમુકુટં સૌમ્યં ત્રિનેત્રં ચ ચતુર્ભુજમ્ ।
દીપ્તશૂલમૃગીટઙ્કં હેમવેત્રધરં વિભુમ્ ॥ ૨૪॥

ચન્દ્રબિમ્બાભવદનં હરિવક્ત્રમથાપિ વા ।
ઉત્તરસ્યાં તથા તસ્ય ભાર્યાં ચ મરુતાં સુતામ્ ॥ ૨૫॥

સુયશાં સુવ્રતામમ્બાપાદમણ્ડનતત્પરામ્ ।
સમ્પૂજ્ય વિધિવદ્ગન્ધપુષ્પાદ્યૈરુપચારકૈઃ ॥ ૨૬॥

તતઃ સમ્પ્રોક્ષયેત્પદ્મં સાસ્ત્રશઙ્ખોદબિન્દુભિઃ ।
કલ્પયેદાસનં પશ્ચાદાધારાદિ યથાક્રમમ્ ॥ ૨૭॥

આધારશક્તિં કલ્યાણીં શ્યામાં ધ્યાયેદધો ભુવિ ।
તસ્યાઃ પુરસ્તાદુત્કણ્ઠમનન્તં કુણ્ડલાકૃતિમ્ ॥ ૨૮॥

ધવલં પઞ્ચફણિનં લેલિહાનમિવામ્બરમ્ ।
તસ્યોપર્યાસનં ભદ્રં કણ્ઠીરવચતુષ્પદમ્ ॥ ૨૯॥

ધર્મો જ્ઞાનં ચ વૈરાગ્યમૈશ્વર્યં ચ પદાનિ વૈ ।
આગ્નેયાદિશ્વેતપીતરક્તશ્યામાનિ વર્ણતઃ ॥ ૩૦॥

અધર્માદીનિ પૂર્વાદીન્યુત્તરાન્તાન્યનુક્રમાત્ ।
રાજાવર્તમણિપ્રખ્યાન્યસ્ય ગાત્રાણિ ભાવયેત્ ॥ ૩૧॥

અધોર્ધ્વચ્છદનં પશ્ચાત્કન્દં નાલં ચ કણ્ટકાન્ ।
દલાદિકં કર્ણિકાં ચ વિભાવ્ય ક્રમશોઽર્ચયેત્ ॥ ૩૨॥

દલેષુ સિદ્ધયશ્ચાષ્ટૌ કેસરેષુ ચ શક્તિકાઃ ।
રુદ્રા વામાદયસ્ત્વષ્ટૌ પૂર્વાદિપરિતઃ ક્રમાત્ ॥ ૩૩॥

કર્ણિકાયાં ચ વૈરાગ્યં બીજેષુ નવ શક્તયઃ ।
વામાદ્યા એવ પૂર્વાદિ તદન્તે ચ મનોન્મની ॥ ૩૪॥

કન્દે શિવાત્મકો ધર્મો નાલે જ્ઞાનં શિવાશ્રયમ્ ।
કર્ણિકોપરિ વાહ્નેયં મણ્ડલં સૌરમૈન્દવમ્ ॥ ૩૫॥

આત્મવિદ્યા શિવાખ્યં ચ તત્ત્વત્રયમતઃ પરમ્ ।
સર્વાસનોપરિ સુખં વિચિત્રકુસુમોજ્જ્વલમ્ ॥ ૩૬॥

પરવ્યોમાવકાશાખ્યવિદ્યયાતીવ ભાસ્વરમ્ ।
પરિકલ્પ્યાસનં મૂર્તેઃ પુષ્પવિન્યાસપૂર્વકમ્ ॥ ૩૭॥

આધારશક્તિમારભ્ય શુદ્ધવિદ્યાસનાવધિ ।
ૐકારાદિચતુર્થ્યન્તં નામમન્ત્રં નમોઽન્તકમ્ ॥ ૩૮॥

ઉચ્ચાર્ય પૂજયેદ્વિદ્વાન્સર્વત્રૈવં વિધિક્રમઃ ।
અઙ્ગવક્ત્રકલાભેદાત્પઞ્ચ બ્રહ્માણિ પૂર્વવત્ ॥ ૩૯॥

વિન્યસેત્ક્રમશો મૂર્તૌ તત્તન્મુદ્રાવિચક્ષણઃ ।
આવાહયેત્તતો દેવં પુષ્પાઞ્જલિપુટઃ સ્થિતઃ ॥ ૪૦॥

સદ્યોજાતં પ્રપદ્યામીત્યારભ્યોમન્તમુચ્ચરન્ ।
આધારોત્થિતનાદં તુ દ્વાદશગ્રન્થિભેદતઃ ॥ ૪૧॥

બ્રહ્મરન્ધ્રાન્તમુચ્ચાર્ય ધ્યાયેદોઙ્કારગોચરમ્ ।
શુદ્ધસ્ફટિકસઙ્કાશં દેવં નિષ્કલમક્ષરમ્ ॥ ૪૨॥

કારણં સર્વલોકાનાં સર્વલોકમયં પરમ્ ।
અન્તર્બહિઃ સ્થિતં વ્યાપ્ય હ્યણોરલ્પં મહત્તમમ્ ॥ ૪૩॥

ભક્તાનામપ્રયત્નેન દૃશ્યમીશ્વરમવ્યયમ્ ।
બ્રહ્મેન્દ્રવિષ્ણુરુદ્રાદ્યૈરપિ દેવૈરગોચરમ્ ॥ ૪૪॥

વેદસારં ચ વિદ્વદ્ભિરગોચરમિતિ શ્રુતમ્ ।
આદિમધ્યાન્તરહિતં ભેષજં ભવરોગિણામ્ ॥ ૪૫॥

સમાહિતેન મનસા ધ્યાત્વૈવં પરમેશ્વરમ્ ।
આવાહનં સ્થાપનં ચ સન્નિરોધં નિરીક્ષણમ્ ॥ ૪૬॥

નમસ્કારં ચ કુર્વીત બદ્ધ્વા મુદ્રાઃ પૃથક્પૃથક્ ।
ધ્યાયેત્સદાશિવં સાક્ષાદ્દેવં સકલનિષ્કલમ્ ॥ ૪૭॥

શુદ્ધસ્ફટિકસઙ્કાશં પ્રસન્નં શીતલદ્યુતિમ્ ।
વિદ્યુદ્વલયસઙ્કાશં જટામુકુટભૂષિતમ્ ॥ ૪૮॥

શાર્દૂલચર્મવસનં કિઞ્ચિત્સ્મિતમુખામ્બુજમ્ ।
રક્તપદ્મદલપ્રખ્યપાણિપાદતલાધરમ્ ॥ ૪૯॥

સર્વલક્ષણસમ્પન્નં સર્વાભરણભૂષિતમ્ ।
દિવ્યાયુધકરૈર્યુક્તં દિવ્યગન્ધાનુલેપનમ્ ॥ ૫૦॥

પઞ્ચવક્ત્રં દશભુજં ચન્દ્રખણ્ડશિખામણિમ્ ।
અસ્ય પૂર્વમુખં સૌમ્યં બાલાર્કસદૃશપ્રભમ્ ॥ ૫૧॥

ત્રિલોચનારવિન્દાઢ્યં બાલેન્દુકૃતશેખરમ્ ।
દક્ષિણં નીલજીમૂતસમાનરુચિરપ્રભમ્ ॥ ૫૨॥

ભ્રુકુટીકુટિલં ઘોરં રક્તવૃત્તત્રિલોચનમ્ ।
દંષ્ટ્રાકરાલં દુષ્પ્રેક્ષ્યં સ્ફુરિતાધરપલ્લવમ્ ॥ ૫૩॥

ઉત્તરં વિદ્રુમપ્રખ્યં નીલાલકવિભૂષિતમ્ ।

સદ્વિલાસં ત્રિનયનં ચન્દ્રાર્ધકૃતશેખરમ્ ॥ ૫૪॥

પશ્ચિમં પૂર્ણચન્દ્રાભં લોચનત્રિતયોજ્જ્વલમ્ ।
ચન્દ્રલેખાધરં સૌમ્યં મન્દસ્મિતમનોહરમ્ ॥ ૫૫॥

પઞ્ચમં સ્ફટિકપ્રખ્યમિન્દુરેખાસમુજ્જ્વલમ્ ।
અતીવ સૌમ્યમુત્ફુલ્લલોચનત્રિતયોજ્જ્વલમ્ ॥ ૫૬॥

દક્ષિણે શૂલપરશુવજ્રખડ્ગાનલોજ્જ્વલમ્ ॥ ૫૭॥

વામે પિનાકનારાચઘણ્ટાપાશાઙ્કુશોજ્જ્વલમ્ ।
નિવૃત્ત્યા જાનુપર્યન્તમાનાભિ ચ પ્રતિષ્ઠયા ॥ ૫૮॥

આકણ્ઠં વિદ્યયા તદ્વદાલલાટં તુ શાન્તયા ।
તદૂર્ધ્વં શાન્ત્યતીતાખ્યકલયા પરયા તથા ॥ ૫૯॥

પઞ્ચાધ્વવ્યાપિનં તસ્માત્કલાપઞ્ચકવિગ્રહમ્ ।
ઈશાનમુકુટં દેવં પુરુષાસ્યં પુરાતનમ્ ॥ ૬૦॥

અઘોરહૃદયં તદ્વદ્વામગુહ્યં મહેશ્વરમ્ ।
સદ્યપાદં ચ તન્મૂર્તિમષ્ટત્રિંશત્કલામયમ્ ॥ ૬૧॥

માતૃકામયમીશાનં પઞ્ચબ્રહ્મમયં તથા ।
ૐકારાખ્યમયં ચૈવ હંસન્યાસમયં તથા ॥ ૬૨॥

પઞ્ચાક્ષરમયં દેવં ષડક્ષરમયં તથા ।
અઙ્ગષટ્કમયં ચૈવ જાતિષટ્કસમન્વિતમ્ ॥ ૬૩॥

એવં ધ્યાત્વાથ મદ્વામભાગે ત્વાં ચ મનોન્મનીમ્ ।
ગૌરીમિમાય મન્ત્રેણ પ્રણવાદ્યેન ભક્તિતઃ ॥ ૬૪॥

આવાહ્ય પૂર્વવત્કુર્યાન્નમસ્કારાન્તમીશ્વરિ ।
ધ્યાયેત્તતસ્ત્વાં દેવેશિ સમાહિતમના મુનિઃ ॥ ૬૫॥

પ્રફુલ્લોત્પલપત્રાભાં વિસ્તીર્ણાયતલોચનામ્ ।
પૂર્ણચન્દ્રાભવદનાં નીલકુઞ્ચિતમૂર્ધજામ્ ॥ ૬૬॥

નીલોત્પલદલપ્રખ્યાં ચન્દ્રાર્ધકૃતશેખરામ્ ।
અતિવૃત્તઘનોત્તુઙ્ગસ્નિગ્ધપીનપયોધરામ્ ॥ ૬૭॥

તનુમધ્યાં પૃથુશ્રોણીં પીતસૂક્ષ્મતરામ્બરામ્ ।

સર્વાભરણસમ્પન્નાં લલાટતિલકોજ્જ્વલામ્ ॥ ૬૮॥

વિચિત્રપુષ્પસઙ્કીર્ણકેશપાશોપશોભિતામ્ ।
સર્વતોઽનુગુણાકારાં કિઞ્ચિલ્લજ્જાનતાનનામ્ ॥ ૬૯॥

હેમારવિન્દં વિલસદ્ધાનાં દક્ષિણે કરે ।
ચણ્ડવચ્ચામરં હસ્તં ન્યસ્યાસીનાં સુખાસને ॥ ૭૦॥

એવં માં ત્વાં ચ દેવેશિ ધ્યાત્વા નિયતમાનસઃ ।
સ્નાપયેચ્છઙ્ખતોયેન પ્રણવપ્રોક્ષણક્રમાત્ ॥ ૭૧॥

ભવે ભવે નાતિભવ ઇતિ પાદ્યં પ્રકલ્પયેત્ ।
વામાય નમ ઇત્યુક્ત્વા દદ્યાદાચમનીયકમ્ ॥ ૭૨॥

જ્યેષ્ઠાય નમ ઇત્યુક્ત્વા શુભ્રવસ્ત્રં પ્રકલ્પયેત્ ।
શ્રેષ્ઠાય નમ ઇત્યુક્ત્વા દદ્યાદ્યજ્ઞોપવીતકમ્ ॥ ૭૩॥

રુદ્રાય નમ ઇત્યુક્ત્વા પુનરાચમનીયકમ્ ।
કાલાય નમ ઇત્યુક્ત્વા ગન્ધં દદ્યાત્સુસંસ્કૃતમ્ ॥ ૭૪॥

કલવિકરણાય નમોઽક્ષતં ચ પરિકલ્પયેત્ ।
બલવિકરણાય નમ ઇતિ પુષ્પાણિ દાપયેત્ ॥ ૭૫॥

બલાય નમ ઇત્યુક્ત્વા ધૂપં દદ્યાત્પ્રયત્નતઃ ।
બલપ્રમથનાયેતિ સુદીપં ચૈવ દાપયેત્ ॥ ૭૬॥

બ્રહ્મભિશ્ચ ષડઙ્ગૈશ્ચ તતો માતૃકયા સહ ।
પ્રણવેન શિવેનૈવ શક્તિયુક્તેન ચ ક્રમાત્ ॥ ૭૭॥

મુદ્રાઃ પ્રદર્શયેન્મહ્યં તુભ્યં ચ વરવર્ણિનિ ।
મયિ પ્રકલ્પયેત્પૂર્વમુપચારાંસ્તતસ્ત્વયિ ॥ ૭૮॥

યદા ત્વયિ પ્રકુર્વીત સ્ત્રીલિઙ્ગં યોજયેત્તદા ।
ઇયાનેવ હિ ભેદોઽસ્તિ નાન્યઃ પાર્વતિ કશ્ચન ॥ ૭૯॥

એવં ધ્યાનં પૂજનં ચ કૃત્વા સમ્યગ્વિધાનતઃ ।
મમાવરણપૂજાં ચ પ્રારભેત વિચક્ષણઃ ॥ ૮૦॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાશસંહિતાયાં શિવધ્યાનપૂજનવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૬.૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૮. અષ્ટમોઽધ્યાયઃ । આવરણપૂજાવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
અત્રાસ્તિ ચ મહાદેવિ ખલ્વાવરણપઞ્ચકમ્ ।
પઞ્ચાવરણપૂજાં તુ પ્રારભેત યથાક્રમમ્ ॥ ૧॥

પ્રથમં પૂજિતૌ યત્ર તત્રૈવ ક્રમશઃ સુધીઃ ।
ગન્ધાદ્યૈરર્ચયેત્પૂર્વં દેવૌ હેરમ્બષણ્મુખૌ ॥ ૨॥

પઞ્ચ બ્રહ્માણિ પરિતો વૃત્તં સમ્પૂજયેત્ક્રમાત્ ।
ઈશાનદેશે પૂર્વે ચ દક્ષિણે ચોત્તરે તથા ॥ ૩॥

પશ્ચિમે ચ તતસ્તસ્મિન્ષડઙ્ગાનિ સમર્ચયેત્ ।
આગ્નેયે ચ તથૈશાને નૈરૃતે વાયુદેશકે ॥ ૪॥

મધ્યે નેત્રં તદ્વદસ્ત્રં પૂર્વાદિપરિતઃ ક્રમાત્ ।
પ્રથમાવરણં પ્રોક્તં દ્વિતીયાવરણં શ‍ૃણુ ॥ ૫॥

અનન્તં પૂર્વદિક્પત્રે સૂક્ષ્મં દક્ષિણતસ્તથા ।
શિવોત્તમં પશ્ચિમત એકનેત્રં તથોત્તરે ॥ ૬॥

એકરુદ્રં તથૈશાને ત્રિમૂર્તિં વહ્નિદિગ્દલે ।
શ્રીકણ્ઠં નૈરૃતે વાયૌ શિખણ્ડીશં સમર્ચયેત્ ॥ ૭॥

દ્વિતીયાવરણે ચૈવ પૂજ્યાસ્તે ચક્રવર્તિનઃ ।
પૂર્વદ્વારસ્ય મધ્યે તુ વૃષેશાનં પ્રપૂજયેત્ ॥ ૮॥

તદ્દક્ષિણે નન્દિનં ચ મહાકાલં તદુત્તરે ।
ભૃઙ્ગીશં દક્ષિણદ્વારપશ્ચિમે સમ્પ્રપૂજયેત્ ॥ ૯॥

તત્પૂર્વકોષ્ઠે ગન્ધાદ્યૈઃ સમ્પ્રપૂજ્ય વિનાયકમ્ ।
પશ્ચિમોત્તરકોષ્ઠે ચ વૃષભં દક્ષિણે ગુહમ્ ॥ ૧૦॥

ઉત્તરદ્વારપૂર્વે તુ પ્રદક્ષિણવિધાનતઃ ।

નામાષ્ટકવિધાનેન પૂજયેદુચ્યતે હિ તત્ ॥ ૧૧॥

ભવં શર્વં તથેશાનં રુદ્રં પશુપતિં પુનઃ ।
ઉગ્રં ભીમં મહાદેવં તૃતીયાવરણં ત્વિદમ્ ॥ ૧૨॥

યો વેદાદૌ સ્વર ઇતિ સમાવાહ્ય મહેશ્વરમ્ ।
પૂજયેત્પૂર્વદિગ્ભાગે કમલે કર્ણિકોપરિ ॥ ૧૩॥

ઈશ્વરં પૂર્વદિક્પત્રે વિશ્વેશં દક્ષિણે તતઃ ।
ઉત્તરે પરમેશાનં સર્વેશં પશ્ચિમે યજેત્ ॥ ૧૪॥

દક્ષિણે તુ યજેદ્ રુદ્રમાવોરાજાનમિત્યૃચા ।
આવાહ્ય ગન્ધપુષ્પાદ્યૈઃ કર્ણિકાયાં દલેષુ ચ ॥ ૧૫॥

શિવઃ પૂર્વે દક્ષિણતો હર ઉત્તરતો મૃડઃ ।
ભવઃ પશ્ચિમદિક્પત્રે પૂજ્યા એતે યથાક્રમમ્ ॥ ૧૬॥

ઉત્તરે વિષ્ણુમાવાહ્ય ગન્ધપુષ્પાદિભિર્યજેત્ ।
પ્રતદ્વિષ્ણુરિતિ પ્રોચ્ય કર્ણિકાયાં દલેષુ ચ ॥ ૧૭॥

વાસુદેવં પૂર્વભાગે દક્ષિણે ચાનિરુદ્ધકમ્ ।
સૌમ્યે સઙ્કર્ષણં ચૈવ પ્રદ્યુમ્નં પશ્ચિમે યજેત્ ॥ ૧૮॥

બ્રહ્માણં પશ્ચિમે પદ્મે સમાવાહ્ય સમર્ચયેત્ ।
હિરણ્યગર્ભઃ સમવર્તત ઇતિ મન્ત્રેણ મન્ત્રવિત્ ॥ ૧૯॥

હિરણ્યગર્ભં પૂર્વસ્યાં વિરાજં દક્ષિણે તતઃ ।
ઉત્તરે પુષ્કરઞ્ચૈવ કાલં પશ્ચિમતો યજેત્ ॥ ૨૦॥

સર્વોર્ધ્વપઙ્ક્તૌ પૂર્વાદિપ્રદક્ષિણવિધાનતઃ ।
તત્તત્સ્થાનેષુ સમ્પૂજ્ય લોકપાલાનનુક્રમાત્ ॥ ૨૧॥

રાન્તં માન્તં તથા ક્ષાન્તં લાન્તં વાન્તમપૂર્વકમ્ ।
સાન્તં હાન્તં ચ વેદાદ્યં શ્રીબીજં ચ દશ ક્રમાત્ ॥ ૨૨॥

બીજાનિ લોકપાલાનામેતૈરેતાન્સમર્ચયેત્ ।
નૈરૃત્યે ચોત્તરે તદ્વદીશાનસ્ય ચ દક્ષિણે ॥ ૨૩॥

બ્રહ્મવિષ્ણૂ ચ વિધિના પૂજયેદુપચારકૈઃ ।
બાહ્યરેખાસુ દેવેશિ પઞ્ચમાવરણે યજેત્ ॥ ૨૪॥

શ્રીમત્રિશૂલમીશાને વજ્રં માહેન્દ્રદિઙ્મુખે ।
પરશું વહ્નિદિગ્ભાગે યામ્યે સાયકમર્ચયેત્ ॥ ૨૫॥

નૈરૃતે તુ યજેત્ખડ્ગં પાશં વરુણગોચરે ।
અઙ્કુશં મારુતે ભાગે પિનાકં ચોત્તરે યજેત્ ॥ ૨૬॥

પશ્ચિમાભિમુખં રૌદ્રં ક્ષેત્રપાલં સમર્ચયેત્ ।
યથાવિધિ વિધાનજ્ઞઃ શિવપ્રીત્યર્થમેવ ચ ॥ ૨૭॥

કૃતાઞ્જલિપુટાઃ સર્વે ચિન્ત્યાઃ સ્મિતમુખામ્બુજાઃ ।
સાદરં પ્રેક્ષમાણાશ્ચ દેવં દેવીં ચ સર્વદા ॥ ૨૮॥

ઇત્થમાવરણાભ્યર્ચાં કૃત્વા વિક્ષેપશાન્તયે ।
પુનરભ્યર્ચ્ય દેવેશં પ્રણવં ચ શિવં વદેત્ ॥ ૨૯॥

એવમભ્યર્ચ્ય વિધિવદ્ ગન્ધાદ્યૈરુપચારકૈઃ ।
ઉપચર્ય તતો દદ્યાન્નૈવેદ્યં વિધિસાધિતમ્ ॥ ૩૦॥

પુનરાચમનીયં ચ દદ્યાદર્ઘ્યં યથા પુરા ।
તતો નિવેદ્ય પાનીયં તામ્બૂલં ચોપદેશતઃ ॥ ૩૧॥

નીરાજનાદિકં કૃત્વા પૂજાશેષં સમાપયેત્ ।
ધ્યાત્વા દેવં ચ દેવીં ચ મનુમષ્ટોત્તરં જપેત્ ॥ ૩૨॥

તત ઉત્થાય રચિતપુષ્પાઞ્જલિપુટઃ સ્થિતઃ ।
જપેદ્ ધ્યાત્વા મહાદેવં યો દેવાનામિતિ ક્રમાત્ ॥ ૩૩॥

યો વેદાદૌ સ્વરઃ પ્રોક્ત ઇત્યન્તં પરમેશ્વરિ ।
પુષ્પાઞ્જલિં તતો દત્ત્વા ત્રિઃપ્રદક્ષિણમાચરેત્ ॥ ૩૪॥

સાષ્ટાઙ્ગં પ્રણમેત્તં સ ભક્ત્યા પરમયાન્વિતઃ ।
પુનઃ પ્રદક્ષિણાં કૃત્વા પ્રણમેત્પુનરેકધા ॥ ૩૫॥

સ્થિત્વાસને સમભ્યર્ચ્ય દેવં નામાષ્ટકેન ચ ।
સાધુ વાસાધુ વા કર્મ યદ્યદાચરિતં મયા ॥ ૩૬॥

તત્સર્વં ભગવઞ્છમ્ભો ભવદારાધનં પરમ્ ।
ઇતિ શઙ્ખોદકેનૈવ સપુષ્પેણ સમર્પયેત્ ॥ ૩૭॥

પૂજ્યં પુનઃ સમભ્યર્ચ્ય સાર્થં નામાષ્ટકં જપેત્ ।
તદેવ શ ૃણુ દેવેશિ સમ્બ્રુવે તવ ભક્તિતઃ ॥ ૩૮॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયામાવરણપૂજાવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૬.૮॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૯. નવમોઽધ્યાયઃ । પ્રણવાર્થપદ્ધતિવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
શિવો મહેશ્વરશ્ચૈવ રુદ્રો વિષ્ણુઃ પિતામહઃ ।
સંસારવૈદ્યઃ સર્વજ્ઞઃ પરમાત્મેતિ મુખ્યતઃ ॥ ૧॥

નામાષ્ટકમિદં નિત્યં શિવસ્ય પ્રતિપાદકમ્ ।
આદ્યન્તપઞ્ચકં તત્ર શાન્ત્યતીતાદ્યનુક્રમાત્ ॥ ૨॥

સંજ્ઞા સદાશિવાદીનાં પઞ્ચોપાધિપરિગ્રહાત્ ।
ઉપાધિવિનિવૃત્તૌ તુ યથાસ્વં વિનિવર્તતે ॥ ૩॥

પદમેવ હિ તં નિત્યમનિત્યાઃ પદિનઃ સ્મૃતાઃ ।
પદાનાં પરિવૃત્તિઃ સ્યાન્મુચ્યન્તે પદિનો યતઃ ॥ ૪॥

પરિવૃત્ત્યન્તરે ત્વેવં ભૂયસ્તસ્યાપ્યુપાધિના ।
આત્માન્તરાભિધાનં સ્યાત્યાદાદ્યં નામપઞ્ચકમ્ ॥ ૫॥

અન્યત્તુ ત્રિતયં નામ્નામુપાદાનાદિભેદતઃ ।
ત્રિવિધોપાધિરચનાચ્છિવ એવ તુ વર્તતે ॥ ૬॥

અનાદિમલસંશ્લેષપ્રાગભાવાત્સ્વભાવતઃ ।
અત્યન્તપરિશુદ્ધાત્મેત્યતોઽયં શિવ ઉચ્યતે ॥ ૭॥

અથવાશેષકલ્યાણગુણૈકઘન ઈશ્વરઃ ।
શિવ ઇત્યુચ્યતે સદ્ભિઃ શિવતત્ત્વાર્થવેદિભિઃ ॥ ૮॥

ત્રયોવિંશતિતત્ત્વેભ્યઃ પરા પ્રકૃતિરુચ્યતે ।
પ્રકૃતેસ્તુ પરં પ્રાહુઃ પુરુષં પઞ્ચવિંશકમ્ ॥ ૯॥

યદ્વેદાદૌ સ્વરં પ્રાહુર્વાચ્યવાચકભાવતઃ ।
વેદૈકવેદ્યં યાથાત્મ્યાદ્વેદાન્તે ચ પ્રતિષ્ઠિતમ્ ॥ ૧૦॥

સ એવ પ્રકૃતૌ લીનો ભોક્તા યઃ પ્રકૃતેર્યતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ॥ ૧૧॥

તદધીનપ્રવૃત્તિત્ત્વાત્પ્રકૃતેઃ પુરુષસ્ય ચ ।
અથવા ત્રિગુણં તત્ત્વં માયેયમિદમવ્યયમ્ ॥ ૧૨॥

માયાં તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।
માયાવિમોચકોઽનન્તો મહેશ્વરસમન્વયાત્ ॥ ૧૩॥

રુદ્દુઃખં દુઃખહેતુર્વા તદ્ દ્રાવયતિ યઃ પ્રભુઃ ।
રુદ્ર ઇત્યુચ્યતે તસ્માચ્છિવઃ પરમકારણમ્ ॥ ૧૪॥

શિવતત્ત્વાદિભૂમ્યન્તં શરીરાદિ ઘટાદિ ચ ।
વ્યાપ્યાધિતિષ્ઠતિ શિવસ્તમાદ્વિષ્ણુરુદાહૃતઃ ॥ ૧૫॥

જગતઃ પિતૃભૂતાનાં શિવો મૂર્ત્યાત્મનામપિ ।
પિતૃભાવેન સર્વેષાં પિતામહ ઉદીરિતઃ ॥ ૧૬॥

નિદાનજ્ઞો યથા વૈદ્યો રોગસ્ય વિનિવર્તકઃ ।
ઉપાયૈર્ભેષજૈસ્તદ્વલ્લયભોગાધિકારકઃ ॥ ૧૭॥

સંસારસ્યેશ્વરો નિત્યં સ્થૂલસ્ય વિનિવર્તકઃ ।
સંસારવૈદ્ય ઇત્યુક્તઃ સર્વતત્ત્વાર્થવેદિભિઃ ॥ ૧૮॥

દશાર્દ્ધજ્ઞાનસિદ્ધ્યર્થમિન્દ્રિયેષુ ચ સત્સ્વપિ ।
ત્રિકાલભાવિનો ભાવાન્સ્થૂલાન્સૂક્ષ્માનશેષતઃ ॥ ૧૯॥

અણવો નૈવ જાનન્તિ માયાર્ણવમલાવૃતાઃ ।
અસત્સ્વપિ ચ સર્વેષુ સિદ્ધસર્વાર્થવેદિષુ ॥ ૨૦॥

યદ્યથાવસ્થિતં વસ્તુ તત્તથૈવ સદાશિવઃ ।
અયત્નેનૈવ જાનાતિ તસ્માત્સર્વજ્ઞ ઉચ્યતે ॥ ૨૧॥

સર્વાત્મા પરમૈરેભિર્ગુણૈર્નિત્યસમન્વયાત્ ।
સ્વસ્માત્પરાત્મવિરહાત્પરમાત્મા શિવઃ સ્વયમ્ ॥ ૨૨॥

ઇતિ સ્તુત્વા મહાદેવં પ્રણવાત્માનમવ્યયમ્ ।
અર્ઘ્યં પાદ્યં પુરો દત્ત્વા પશ્ચાદીશાનમસ્તકે ॥ ૨૩॥

પુનરભ્યર્ચ્ય દેવેશં પ્રણવેન સમાહિતઃ ।
હસ્તેન બદ્ધાઞ્જલિના પૂજાપુષ્પં પ્રગૃહ્ય ચ ॥ ૨૪॥

ઉન્મન્યન્તં શિવં નીત્વા વામનાસાપુટાધ્વના ।
દેવીમુદ્વાસ્ય ચ તતો દક્ષનાસાપુટાધ્વના ॥ ૨૫॥

શિવ એવાહમસ્મીતિ તદૈક્યમનુભૂય ચ ।
સર્વાવરણદેવાંશ્ચ પુનરુદ્વાસયેદ્ હૃદિ ॥ ૨૬॥

વિદ્યાપૂજાં ગુરોઃપૂજાં કૃત્વા પશ્ચાદ્યથાક્રમમ્ ।
શઙ્ખાર્ઘપાત્રમન્ત્રાંશ્ચ હૃદયે વિન્યસેત્ક્રમાત્ ॥ ૨૭॥

નિર્માલ્યં ચ સમર્પ્યાથ ચણ્ડીશાયેશગોચરે ।
પુનશ્ચ સંયતપ્રાણ ઋષ્યાદિકમથોચ્ચરેત્ ॥ ૨૮॥

કૈલાસપ્રસ્તરો નામ મણ્ડલં પરિભાષિતમ્ ।
અર્ચયેન્નિત્યમેવૈતત્પક્ષે વા માસિ માસિ વા ॥ ૨૯॥

ષણ્માસે વત્સરે વાપિ ચાતુર્માસ્યાદિપર્વણિ ।
અવશ્યં ચ સમભ્યર્ચયેન્નિત્યં મલ્લિઙ્ગમાસ્તિકઃ ॥ ૩૦॥

તસ્મિન્ક્રમે મહાદેવિ વિશેષઃ કોઽપિ કથ્યતે ।
ઉપદેશદિને લિઙ્ગં પૂજિતં ગુરુણા સહ ॥ ૩૧॥

ગૃહ્ણીયાદર્ચયિષ્યામિ શિવમાપ્રાણસઙ્ક્ષયમ્ ।
એવં ત્રિવારમુચ્ચાર્ય શપથં ગુરુસન્નિધૌ ॥ ૩૨॥

તતઃ સમર્ચયેન્નિત્યં પૂર્વોક્તવિધિના પ્રિયે ।
અર્ઘં સમર્પયેલ્લિઙ્ગમૂર્દ્ધન્યર્ઘ્યોદકેન ચ ॥ ૩૩॥

પ્રણવેન સમભ્યર્ચ્ય ધૂપદીપૌ સમર્પયેત્ ।
ઐશાન્યાં ચણ્ડમારાધ્ય નિર્માલ્યં ચ નિવેદયેત્ ॥ ૩૪॥

પ્રક્ષાલ્ય લિઙ્ગં વેદીં ચ વસ્ત્રપૂતૈર્જલૈસ્તતઃ ।
નિઃક્ષિપ્ય પુષ્પં શિરસિ લિઙ્ગસ્ય પ્રણવેન તુ ॥ ૩૫॥

આધારશક્તિમારભ્ય શુદ્ધવિદ્યાસનાવધિ ।
વિભાવ્ય સર્વં મનસા સ્થાપયેત્પરમેશ્વરમ્ ॥ ૩૬॥

પઞ્ચગવ્યાદિભિર્દ્રવ્યૈર્યથાવિભવસમ્ભૃતૈઃ ।

કેવલૈર્વા જલૈઃ શુદ્ધૈઃ સુરભિદ્રવ્યવાસિતૈઃ ॥ ૩૭॥

પાવમાનેન રુદ્રેણ નીલેન ત્વરિતેન ચ ।
ઋગ્ભિશ્ચ સામભિર્વાપિ બ્રહ્મભિશ્ચૈવ પઞ્ચભિઃ ॥ ૩૮॥

સ્નાપયેદ્દેવદેવેશં પ્રણવેન શિવેન ચ ।
વિશેષાર્ઘ્યોદકેનાપિ પ્રણવેનાભિષેચયેત્ ॥ ૩૯॥

વિશોધ્ય વાસસા પુષ્પં લિઙ્ગમૂર્ધનિ વિન્યસેત્ ।
પીઠે લિઙ્ગં સમારોપ્ય સૂર્યાર્ઘર્ચાં સમાચરેત્ ॥ ૪૦॥

આધારશક્ત્યનન્તૌ દ્વૌ પીઠાધસ્તાત્સમર્ચયેત્ ।
સિંહાસનં તદૂર્ધ્વં તુ સમભ્યર્ચ્ય યથાક્રમમ્ ॥ ૪૧॥

અથોર્ધ્વચ્છદનમ્પીઠપાદે સ્કન્દં સમર્ચયેત્ ।
લિઙ્ગે મૂર્તિં સમાકલ્પ્ય માં ત્વયા સહ પૂજયેત્ ॥ ૪૨॥

સમ્યગ્ ભક્ત્યા વિધાનેન યતિર્મદ્ધ્યાનતત્પરઃ ।
એવં મયા તે કથિતમતિગુહ્યમિદં પ્રિયે ॥ ૪૩॥

ગોપનીયં પ્રયત્નેન ન દેયં યસ્ય કસ્યચિત્ ।
મમ ભક્તાય દાતવ્યં યતયે વીતરાગિણે ॥ ૪૪॥

ગુરુભક્તાય શાન્તાય મદર્થે યોગભાગિને ।
મમાજ્ઞામતિલઙ્ઘ્યૈતદ્યો દદાતિ વિમૂઢધીઃ ॥ ૪૫॥

સ નારકી મમ દ્રોહી ભવિષ્યતિ ન સંશયઃ ।
મદ્ભક્તદાનાદ્દેવેશિ મત્પ્રિયશ્ચ ભવેદ્ ધ્રુવમ્ ।
ઇહ ભુક્ત્વાખિલાન્ભોગાન્મત્સાન્નિધ્યમવાપ્નુયાત્ ॥ ૪૬॥

વ્યાસ ઉવાચ ।
એતચ્છ્રુત્વા મહાદેવી મહાદેવેન ભાષિતમ્ ।
સ્તુત્વા તુ વિવિધૈઃ સ્તોત્રૈર્દેવં વેદાર્થગર્ભિતૈઃ ॥ ૪૭॥

શ્રીમત્પાદાબ્જયોઃ પત્યુઃ પ્રણામં પરમેશ્વરી ।
અતિપ્રહૃષ્ટહૃદયા મુમોદ મુનિસત્તમાઃ ॥ ૪૮॥

અતિગુહ્યમિદં વિપ્રાઃ પ્રણવાર્થપ્રકાશકમ્ ।
શિવજ્ઞાનપરં હ્યેતદ્ભવતામાર્તિનાશનમ્ ॥ ૪૯॥

સૂત ઉવાચ ।

ઇત્યુક્ત્વા મુનિશાર્દૂલઃ પારાશર્યો મહાતપાઃ ।
પૂજિતઃ પરયા ભક્ત્યા મુનિભિર્વેદવાદિભિઃ ॥ ૫૦॥

કૈલાસાદ્રિમનુસ્મૃત્ય યયૌ તસ્માત્તપોવનાત્ ।
તેઽપિ પ્રહૃષ્ટહૃદયાઃ સત્રાન્તે પરમેશ્વરમ્ ॥ ૫૧॥

સમ્પૂજ્ય પરયા ભક્ત્યા સોમં સોમાર્ધશેખરમ્ ।
યમાદિયોગનિરતાઃ શિવધ્યાનપરાભવન્ ॥ ૫૨॥

ગુહાય કથિતં હ્યેતદ્દેવ્યા તેનાપિ નન્દિને ।
સનત્કુમારમુનયે પ્રોવાચ ભગવાન્ હિ સઃ ॥ ૫૩॥

તસ્માલ્લબ્ધં મદ્ગુરુણા વ્યાસેનામિતતેજસા ।
તસ્માલ્લબ્ધમિદં પુણ્યં મયાપિ મુનિપુઙ્ગવાઃ ॥ ૫૪॥

મયા વઃ શ્રાવિતં હ્યેતદ્ ગુહ્યાદ્ ગુહ્યતરં પરમ્ ।
જ્ઞાત્વા શિવપ્રિયાન્ભક્ત્યા ભવતો ગિરિશપ્રિયમ્ ॥ ૫૫॥

ભવદ્ભિરપિ દાતવ્યમેતદ્ ગુહ્યં શિવપ્રિયમ્ ।
યતિભ્યઃ શાન્તચિત્તેભ્યો ભક્તેભ્યઃ શિવપાદયોઃ ॥ ૫૬॥

એતદુક્ત્વા મહાભાગઃ સૂતઃ પૌરાણિકોત્તમઃ ।
તીર્થયાત્રાપ્રસઙ્ગેન ચચાર પૃથિવીમિમામ્ ॥ ૫૭॥

એતદ્રહસ્યં પરમં લબ્ધ્વા સૂતાન્મુનીશ્વરાઃ ।
કાશ્યામેવ સમાસીના મુક્તાઃ શિવપદં યયુઃ ॥ ૫૮॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં પ્રણવાર્થપદ્ધતિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૬.૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૧૦. દશમોઽધ્યાયઃ । સૂતોપદેશઃ ।

વ્યાસ ઉવાચ ।
ગતેઽથ સૂતે મુનયઃ સુવિસ્મિતા

વિચિન્ત્ય ચાન્યોઽન્યમિદં તુ વિસ્મૃતમ્ ।
યદ્વામદેવસ્ય મતં મુનીશ્વર
પ્રસૂચિતં તત્ખલુ કષ્ટમદ્ય નઃ ॥ ૧॥

કદાનુભૂયાન્મુનિવર્યદર્શનં
ભવાબ્ધિદુઃખૌઘહરં પરં હિ તત્ ।
મહેશ્વરારાધનપુણ્યતોઽધુના
મુનીશ્વરઃ સત્વરમાવિરસ્તુ નઃ ॥ ૨॥

ઇતિ ચિન્તાસમાવિષ્ટા મુનયો મુનિપુઙ્ગવમ્ ।
વ્યાસં સમ્પૂજ્ય હૃત્પદ્મે તસ્થુસ્તદ્દર્શનોત્સુકાઃ ॥ ૩॥

સંવત્સરાન્તે સ પુનઃ કાશીં પ્રાપ મહામુનિઃ ।
શિવભક્તિરતો જ્ઞાની પુરાણાર્થપ્રકાશકઃ ॥ ૪॥

તં દૃષ્ટ્વા સૂતમાયાન્તં મુનયો હૃષ્ટચેતસઃ ।
અભ્યુત્થાનાસનાદ્યર્ધ્યાદિપૂજયા સમપૂજયન્ ॥ ૫॥

સોઽપિ તાન્મુનિશાર્દૂલાનભિનન્દ્ય સ્મિતોદરમ્ ।
પ્રીત્યા સ્નાત્વા જાહ્નવીયે જલે પરમપાવને ॥ ૬॥

ઋષીન્સન્તર્પ્ય ચ સુરાન્ પિતૄંશ્ચ તિલતણ્ડુલૈઃ ।
તીરમાગત્ય સમ્પ્રોક્ષ્ય વાસસી પરિધાય ચ ॥ ૭॥

દ્વિરાચમ્ય સમાદાય ભસ્મ સદ્યાદિમન્ત્રતઃ ।
ઉદ્ધૂલનાદિક્રમતો વિધાર્યાથ મુનીશ્વરઃ ॥ ૮॥

રુદ્રાક્ષમાલાભરણઃ કૃતનિત્યક્રિયઃ સુધી ।
યથોક્તાઙ્ગેષુ વિધિના ત્રિપુણ્ડ્રં રચતિ સ્મ હ ॥ ૯॥

વિશ્વેશ્વરમુમાકાન્તં સસુતં સગણાધિપમ્ ।
પૂજયામાસ સદ્ભક્ત્યા હ્યસ્તૌ નત્વા મુહુર્મુહુઃ ॥ ૧૦॥

કાલભૈરવનાથં ચ સમ્પૂજ્યાથ વિધાનતઃ ।
પ્રદક્ષિણીકૃત્ય પુનસ્ત્રેધા નત્વા ચ પઞ્ચધા ॥ ૧૧॥

પુનઃ પ્રદક્ષિણીકૃત્ય પ્રણમ્ય ભુવિ દણ્ડવત્ ।
તુષ્ટાવ પરયા સ્તુત્યા સંસ્મરંસ્તત્પદામ્બુજમ્ ॥ ૧૨॥

શ્રીમત્પઞ્ચાક્ષરીં વિદ્યામષ્ટોત્તરસહસ્રકમ્ ।

સઞ્જપ્ય પુરતઃ સ્થિત્વા ક્ષમાપય્ય મહેશ્વરમ્ ॥ ૧૩॥

ચણ્ડીશં સમ્પ્રપૂજ્યાઽથ મુક્તિમણ્ડપમધ્યતઃ ।
નિર્દિષ્ટમાસનં ભેજે મુનિભિર્વેદપારગૈઃ ॥ ૧૪॥

એવં સ્થિતેષુ સર્વેષુ નમસ્કૃત્ય સમન્ત્રકમ્ ।
અથ પ્રાહ મુનીન્દ્રાણાં ભાવવૃદ્ધિકરં વચ ॥ ૧૫॥

સૂત ઉવાચ ।
ધન્યા યૂયં મહાપ્રાજ્ઞા મુનયઃ શંસિતવ્રતાઃ ।
ભવદર્થમિહ પ્રાપ્તોઽહં તદ્વૃત્તમિદં શ‍ૃણુ ॥ ૧૬॥

યદાહમુપદિશ્યાથ ભવતઃ પ્રણવાર્થકમ્ ।
ગતસ્તીર્થાટનાર્થાય તદ્વૃત્તાન્તં બ્રવીમિ વઃ ॥ ૧૭॥

ઇતો નિર્ગત્ય સમ્પ્રાપ્ય તીરં દક્ષપયોનિધેઃ ।
સ્નાત્વા સમ્પૂજ્ય વિધિવદ્દેવીં કન્યામયીં શિવામ્ ।
પુનરાગત્ય વિપ્રેન્દ્રાઃ સુવર્ણમુખરીતટમ્ ॥ ૧૮॥

શ્રીકાલહસ્તિશૈલાખ્યનગરે પરમાદ્ભુતે ।
સુવર્ણમુખરીતોયે સ્નાત્વા દેવાનૃષીનપિ ॥ ૧૯॥

સન્તર્પ્ય વિધિવદ્ભક્ત્યા સમુદ્રં ગિરિશં સ્મરન્ ।
સમર્ચ્ય કાલહસ્તીશં ચન્દ્રકાન્તસમપ્રભમ્ ॥ ૨૦॥

પશ્ચિમાભિમુખં પઞ્ચશિરસં પરમાદ્ભુતમ્ ।
સકૃદ્દર્શનમાત્રેણ સર્વાઘક્ષયકારણમ્ ॥ ૨૧॥

સર્વસિદ્ધિપ્રદં ભુક્તિમુક્તિદં ત્રિગુણેશ્વરમ્ ।
તતશ્ચ પરયા ભક્ત્યા તસ્ય દક્ષિણગાં શિવામ્ ॥ ૨૨॥

જ્ઞાનપ્રસૂનકલિકાં સમર્ચ્ય હિ જગત્પ્રસૂમ્ ।
શ્રીમત્પઞ્ચાક્ષરીં વિદ્યામષ્ટોત્તરસહસ્રકમ્ ॥ ૨૩॥

જપ્ત્વા પ્રદક્ષિણીકૃત્ય સ્તુત્વા નત્વા મુહુર્મુહુઃ ॥ ૨૪॥

તતઃ પ્રદક્ષિણીકૃત્ય ગિરિં પ્રત્યહમાદરાત્ ।
આમોદતીવ મનસિ પ્રત્યહં નિયમાસ્થિતઃ ॥ ૨૫॥

અનયન્ ચતુરો માસાનેવં તત્ર મુનીશ્વરાઃ ।
જ્ઞાનપ્રસૂનકલિકામહાદેવ્યાઃ પ્રસાદતઃ ॥ ૨૬॥

એકદા તુ સમાસ્તીર્ય ચૈલાજિનકુશોત્તરમ્ ।
આસનં પરમં તસ્મિન્ સ્થિત્વા રુદ્ધેન્દ્રિયો મુનિઃ ॥ ૨૭॥

સમાધિમાસ્થાય સદા પરમાનન્દચિદ્ઘનઃ ।
પરિપૂર્ણઃ શિવોઽસ્મીતિ નિર્વ્યગ્રહૃદયોઽભવમ્ ॥ ૨૮॥

એતસ્મિન્નેવ સમયે મદ્ગુરુઃ કરુણાનિધિઃ ।
નીલજીમૂતસઙ્કાશો વિદ્યુત્પિઙ્ગજટાધરઃ ॥ ૨૯॥

પ્રાંશુઃ કમણ્ડલૂદણ્ડકૃષ્ણાજિનધરઃ સ્વયમ્ ।
ભસ્માવદાતસર્વાઙ્ગઃ સર્વલક્ષણલક્ષિતઃ ॥ ૩૦॥

ત્રિપુણ્ડ્રવિલસદ્ભાલો રુદ્રાક્ષાલઙ્કૃતાકૃતિઃ ।
પદ્મપત્રારુણાયામવિસ્તીર્ણનયનદ્વયઃ ॥ ૩૧॥

પ્રાદુર્ભૂય હૃદમ્ભોજે તદાનીમેવ સત્વરમ્ ।
વિમોહિતસ્તદૈવાસમેતદદ્ ભુતમાસ્તિકાઃ ॥ ૩૨॥

તત ઉન્મીલ્ય નયને વિલાપં કૃતવાનહમ્ ।
આસીન્મમાશ્રુપાતશ્ચ ગિરિનિર્ઝરસન્નિભઃ ॥ ૩૩॥

એતસ્મિન્નેવ સમયે શ્રુતા વાગશરીરિણી ।
વ્યોમ્નો મહાદ્ભુતા વિપ્રાસ્તામેવ શૃણુતાદરાત્ ॥ ૩૪॥

સૂતપુત્ર મહાભાગ ગચ્છ વારાણસીં પુરીમ્ ।
તત્રાસન્મુનયઃ પૂર્વમુપદિષ્ટાસ્ત્વયાધુના ॥ ૩૫॥

ત્વદુપાગમકલ્યાણં કાઙ્ક્ષન્તે વિવશા ભૃશમ્ ।
તિષ્ઠન્તિ તે નિરાહારા ઇત્યુક્ત્વા વિરરામ સા ॥ ૩૬॥

તત ઉત્થાય તરસા દેવં દેવીં ચ ભક્તિતઃ ।
પ્રદક્ષિણીકૃત્ય પુનઃ પ્રણમ્ય ભુવિ દણ્ડવત્ ॥ ૩૭॥

દ્વિષડ્વારં ગુરોરાજ્ઞાં વિજ્ઞાય શિવયોરથ ।
ક્ષેત્રાન્નિર્ગત્ય તરસા ચત્વારિંશદ્દિનાન્તરે ॥ ૩૮॥

આગતોઽસ્મિ મુનિશ્રેષ્ઠા અનુગૃહ્ણન્તુ મામિહ ।
મયા કિમદ્ય વક્તવ્યં ભવન્તસ્તદ્ બ્રુવન્તુ મે ॥ ૩૯॥

ઇતિ સૂતવચઃ શ્રુત્વા ઋષયો હૃષ્ટમાનસાઃ ।

અવોચન્મુનિશાર્દૂલં વ્યાસં નત્વા મુહુર્મુહુઃ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સૂતોપદેશો નામ દશમોઽધ્યાયઃ ॥ ૬.૧૦॥

૬.૧૧

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૧૧. એકાદશોઽયાયઃ । વામદેવબ્રહ્મવર્ણનમ્ ।

ઋષય ઊચુઃ ॥

સૂત સૂત મહાભાગઃ ત્વમસ્મદ્ગુરુરુત્તમઃ ।
અતસ્ત્વાં પરિપૃચ્છામો ભવતોઽનુગ્રહો યદિ ॥ ૧॥

શ્રદ્ધાલુષુ ચ શિષ્યેષુ ત્વાદૃશા ગુરવઃ સદા ।
સ્નિગ્ધભાવા ઇતીદં નો દર્શિતં ભવતાધુના ॥ ૨॥

વિરજાહોમસમયે વામદેવમતં પુરા ।
સૂચિતં ભવતાસ્માભિર્ન શ્રુતં વિસ્તરાન્મુને ॥ ૩॥

તદિદાનીં શ્રોતુકામાઃ શ્રદ્ધયા પરમાદરાત્ ।
વયં સર્વે કૃપાસિન્ધો પ્રીત્યા તદ્વક્તુમર્હસિ ॥ ૪॥

ઇતિ તેષાં વચઃ શ્રુત્વા સૂતો હૃષ્ટતનૂરુહઃ ।
નમસ્કૃત્ય મહાદેવં ગુરોઃ પરતરં ગુરુમ્ ॥ ૫॥

મહાદેવીં ત્રિજનનીં ગુરું વ્યાસં ચ ભક્તિતઃ ।
પ્રાહ ગમ્ભીરયા વાચા મુનીનાહ્લાદયન્નિદમ્ ॥ ૬॥

સૂત ઉવાચ ।
સ્વસ્ત્યસ્તુ મુનયઃ સર્વે સુખિનઃ સન્તુ સર્વદા ।
શિવભક્તાઃ સ્થિરાત્માનઃ શિવભક્તિપ્રવર્તકાઃ ॥ ૭॥

તદતીવ વિચિત્રં હિ શ્રુતં ગુરુમુખામ્બુજાત્ ।
ઇતઃ પૂર્વં મયા નોક્તં ગુહ્યપ્રાકટ્યશઙ્કયા ॥ ૮॥

યૂયં ખલુ મહાભાગાઃ શિવભક્તા દૃઢવ્રતાઃ ।
ઇતિ નિશ્ચિત્ય યુષ્માકં વક્ષ્યામિ શ્રૂયતાં મુદા ॥ ૯॥

પુરા રથન્તરે કલ્પે વામદેવો મહામુનિઃ ।
ગર્ભમુક્તઃ શિવજ્ઞાનવિદાં ગુરુત્તમઃ સ્વયમ્ ॥ ૬.૧૧.૧૦॥

વેદાગમપુરાણાદિસર્વશાસ્ત્રાર્થતત્ત્વવિત્ ।
દેવાસુરમનુષ્યાદિજીવાનાં જન્મકર્મવિત્ ॥ ૧૧॥

ભસ્માવદાતસર્વાઙ્ગો જટામણ્ડલમણ્ડિતઃ ।
નિરાશ્રયો નિઃસ્પૃહશ્ચ નિર્દ્વન્દ્વો નિરહઙ્કૃતિઃ ॥ ૧૨॥

દિગમ્બરો મહાજ્ઞાની મહેશ્વર ઇવાપરઃ ।
શિષ્યભૂતૈર્મુનીન્દ્રૈશ્ચ તાદૃશૈઃ પરિવારિતઃ ॥ ૧૩॥

પર્યટન્પૃથિવીમેતાં સ્વપાદસ્પર્શપુણ્યતઃ ।
પવિત્રયન્પરે ધામ્નિ નિમગ્નહૃદયોઽન્વહમ્ ॥ ૧૪॥

કુમારશિખરં મેરોર્દક્ષિણં પ્રાવિશન્મુદા ।
યત્રાસ્તે ભગવાનીશતનયઃ શિખિવાહનઃ ॥ ૧૫॥

જ્ઞાનશક્તિધરો વીરઃ સર્વાસુરવિમર્દનઃ ।
ગજાવલ્લીસમાયુક્તઃ સર્વૈર્દેવૈર્નમસ્કૃતઃ ॥ ૧૬॥

તત્ર સ્કન્દસરો નામ સરઃ સાગરસન્નિભમ્ ।
શિશિરસ્વાદુપાનીયં સ્વચ્છાગાધબહૂદકમ્ ॥ ૧૭॥

સર્વાશ્ચર્યગુણોપેતં વિદ્યતે સ્વામિસન્નિધૌ ।
તત્ર સ્નાત્વા વામદેવઃ સહશિષ્યૈર્મહામુનિઃ ॥ ૧૮॥

કુમારં શિખરાસીનં મુનિવૃન્દનિષેવિતમ્ ।
ઉદ્યદાદિત્યસઙ્કાશં મયૂરવરવાહનમ્ ॥ ૧૯॥

ચતુર્ભુજમુદારાઙ્ગં મુકુટાદિવિભૂષિતમ્ ।
શક્તિરત્નદ્વયોપાસ્યં શક્તિકુક્કુટધારિણમ્ ॥ ૬.૧૧.૨૦॥

વરદાભયહસ્તં ચ દૃષ્ટ્વા સ્કન્દં મુનીશ્વરઃ ।
સમ્પૂજ્ય પરયા ભક્ત્યા સ્તોતું સમુપચક્રમે ॥ ૨૧॥

વામદેવ ઉવાચ ।
ૐ નમઃ પ્રણવાર્થાય પ્રણવાર્થવિધાયિને ।
પ્રણવાક્ષરબીજાય પ્રણ વાય નમો નમઃ ॥ ૨૨॥

વેદાન્તાર્થસ્વરૂપાય વેદાન્તાર્થવિધાયિને ।

વેદાન્તાર્થવિદે નિત્યં વિદિતાય નમો નમઃ ॥ ૨૩॥

નમો ગુહાય ભૂતાનાં ગુહાસુ નિહિતાય ચ ।
ગુહ્યાય ગુહ્યરૂપાય ગુહ્યાગમવિદે નમઃ ॥ ૨૪॥

અણોરણીયસે તુભ્યં મહતોઽપિ મહીયસે ।
નમઃ પરાવરજ્ઞાય પરમાત્મસ્વરૂપિણે ॥ ૨૫॥

સ્કન્દાય સ્કન્દરૂપાય મિહિરારુણતેજસે ।
નમો મન્દારમાલોદ્યન્મુકુટાદિભૃતે સદા ॥ ૨૬॥

શિવશિષ્યાય પુત્રાય શિવસ્ય શિવદાયિને ।
શિવપ્રિયાય શિવયોરાનન્દનિધયે નમઃ ॥ ૨૭॥

ગાઙ્ગેયાય નમસ્તુભ્યં કાર્તિકેયાય ધીમતે ।
ઉમાપુત્રાય મહતે શરકાનનશાયિને ॥ ૨૮॥

ષડક્ષરશરીરાય ષડ્વિધાર્થવિધાયિને ।
ષડધ્વાતીતરૂપાય ષણ્મુખાય નમો નમઃ ॥ ૨૯॥

દ્વાદશાયતનેત્રાય દ્વાદશોદ્યતબાહવે ।
દ્વાદશાયુધધારાય દ્વાદશાત્મન્નમોઽસ્તુ તે ॥ ૬.૧૧.૩૦॥

ચતુર્ભુજાય શાન્તાય શક્તિકુક્કુટધારિણે ।
વરદાભયહસ્તાય નમોઽસુરવિદારિણે ॥ ૩૧॥

ગજાવલ્લીકુચાલિપ્તકુઙ્કુમાઙ્કિતવક્ષસે ।
નમો ગજાનનાનન્દમહિમાનન્દિતાત્મને ॥ ૩૨॥

બ્રહ્માદિદેવમુનિકિન્નરગીયમાન-ગાથાવિશેષશુચિચિન્તિતકીર્તિધામ્ને ।
વૃન્દારકામલકિરીટવિભૂષણસ્રક્-પૂજ્યાભિરામપદપઙ્કજ તે નમોઽસ્તુ ॥ ૩૩॥

ઇતિ સ્કન્દસ્તવં દિવ્યં વામદેવેન ભાષિતમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સ યાતિ પરમાં ગતિમ્ ॥ ૩૪॥

મહાપ્રજ્ઞાકરં હ્યેતચ્છિવભક્તિવિવર્દ્ધનમ્ ।
આયુરારોગ્યધનકૃત્સર્વ્વકામપ્રદં સદા ॥ ૩૫॥

ઇતિ સ્તુત્વા વામદેવો દેવં સેનાપતિં પ્રભુમ્ ।
પ્રદક્ષિણાત્રયં કૃત્વા પ્રણમ્ય ભુવિ દણ્ડવત્ ॥ ૩૬॥

સાષ્ટાઙ્ગં ચ પુનઃ કૃત્વા પ્રદક્ષિણનમસ્કૃતમ્ ।
અભવત્પાર્શ્વતસ્તસ્ય વિનયાવનતો દ્વિજાઃ ॥ ૩૭॥

વામદેવકૃતં સ્તોત્રં પરમાર્થવિજૃમ્ભિતમ્ ।
શ્રુત્વાભવત્પ્રસન્નો હિ મહેશ્વરસુતઃ પ્રભુઃ ॥ ૩૮॥

તમુવાચ મહાસેનઃ પ્રીતોઽસ્મિ તવ પૂજયા ।
ભક્ત્યા સ્તુત્યા ચ ભદ્રં તે કિમદ્ય કરવાણ્યહમ્ ॥ ૩૯॥

મુને ત્વં યોગિનાં મુખ્યઃ પરિપૂર્ણશ્ચ નિઃસ્પૃહઃ ।
ભવાદૃશાં હિ લોકેસ્મિપ્રાર્થનીયં ન વિદ્યતે ॥ ૬.૧૧.૪૦॥

તથાપિ ધર્મરક્ષાર્યૈ લોકાનુગ્રહકાઙ્ક્ષયા ।
ત્વાદૃશાઃ સાધવઃ સન્તો વિચરન્તિ મહીતલે ॥ ૪૧॥

શ્રોતવ્યમસ્તિ ચેદ્ બ્રહ્મન્ વક્તુમર્હસિ સામ્પ્રતમ્ ।
તદિદાનીમહં વક્ષ્યે લોકાનુગ્રહહેતવે ॥ ૪૨॥

ઇતિ સ્કન્દવચઃ શ્રુત્વા વામદેવો મહામુનિઃ ।
પ્રશ્રયાવનતઃ પ્રાહ મેઘગમ્ભીરયા ગિરા ॥ ૪૩॥

વામદેવ ઉવાચ ।
ભગવન્પરમેશસ્ત્વં પરાપરવિભૂતિદઃ ।
સર્વજ્ઞઃ સર્વકર્ત્તા ચ સર્વશક્તિધરઃ પ્રભુઃ ॥ ૪૪॥

જીવા વયં તુ તે વક્તું સન્નિધૌ પરમેશિતુઃ ।
તથાપ્યનુગ્રહોઽયં તે યત્ત્વં વદસિ માં પ્રતિ ॥ ૪૫॥

કૃતાર્થોઽહં મહાપ્રાજ્ઞ વિજ્ઞાનકણમાત્રતઃ ।
પ્રેરિતઃ પરિપૃચ્છામિ ક્ષન્તવ્યોઽતિક્રમો મમ ॥ ૪૬॥

પ્રણવો હિ પરઃ સાક્ષાત્પરમેશ્વરવાચકઃ ।
વાચ્યઃ પશુપતિર્દેવઃ પશૂનાં પાશમોચકઃ ॥ ૪૭॥

વાચકેન સમાહૂતઃ પશૂન્મોચયતે ક્ષણાત્ ।
તસ્માદ્વાચકતાસિદ્ધિઃ પ્રણવેન શિવમ્પ્રતિ ॥ ૪૮॥

ઓમિતીદં સર્વમિતિ શ્રુતિરાહ સનાતની ।
ઓમિતિ બ્રહ્મ સર્વં હિ બ્રહ્મેતિ ચ સમબ્રવીત્ ॥ ૪૯॥

દેવસેનાપતે તુભ્યં દેવાનામ્પતયે નમઃ ।

નમો યતીનાં પતયે પરિપૂર્ણાય તે નમઃ ॥ ૬.૧૧.૫૦॥

એવં સ્થિતે જગત્યસ્મિન્ શિવાદન્યન્ન વિદ્યતે ।
સર્વરૂપધરઃ સ્વામી શિવો વ્યાપી મહેશ્વરઃ ॥ ૫૧॥

સમષ્ટિવ્યષ્ટિભાવેન પ્રણવાર્થઃ શ્રુતો મયા ।
ન જાતુચિન્મહાસેન સમ્પ્રાપ્તસ્ત્વાદૃશો ગુરુઃ ॥ ૫૨॥

અતઃ કૃત્વાનુકમ્પાં વૈ તમર્થં વક્તુમર્હસિ ।
ઉપદેશવિધાનેન સદાચારક્રમેણ ચ ॥ ૫૩॥

સ્વામ્યેકઃ સર્વજન્તૂનાં પાશચ્છેદકરો ગુરુઃ ।
અતસ્ત્વત્કૃપયા સોઽર્થઃ શ્રોતવ્યો હિ મયા ગુરો ॥ ૫૪॥

ઇતિ સ મુનિના પૃષ્ટઃ સ્કન્દઃ પ્રણમ્ય સદાશિવં-પ્રણવવપુષં સાષ્ટત્રિંશત્કલાવરલક્ષિતમ્ ।
સહિતમુમયા શશ્વત્પાર્શ્વે મુનિપ્રવરાન્વિતં-ગદિતુમુપચક્રામ શ્રેયઃ શ્રુતિષ્વપિ ગોપિતમ્ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં વામદેવબ્રહ્મવર્ણનન્નામૈકાદશોઽધ્યાયઃ ॥ ૬.૧૧॥

૬.૧૨
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૧૨. દ્વાદશોઽધ્યાયઃ । સંન્યાસવિધિવર્ણનમ્ ।

શ્રીબ્રહ્મણ્ય ઉવાચ ।
સાધુસાધુ મહાભાગ વામદેવ મુનીશ્વર ।
ત્વમતીવ શિવે ભક્તઃ શિવજ્ઞાનવતાં વરઃ ॥ ૧॥

ત્વયા ત્વવિદિતં કિઞ્ચિન્નાસ્તિ લોકેષુ કુત્રચિત્ ।
તથાપિ તવ વક્ષ્યામિ લોકાનુગ્રહકારિણઃ ॥ ૨॥

લોકેઽસ્મિન્પશવઃ સર્વે નાનાશાસ્ત્રવિમોહિતાઃ ।
વઞ્ચિતાઃ પરમેશસ્ય માયયાતિવિચિત્રયા ॥ ૩॥

ન જાનન્તિ પરં સાક્ષાત્પ્રણવાર્થં મહેશ્વરમ્ ।
સગુણં નિર્ગુણં બ્રહ્મ ત્રિદેવજનકં પરમ્ ॥ ૪॥

દક્ષિણં બાહુમુદ્ધૃત્ય શપથં પ્રબ્રવીમિ તે ।

સત્યં સત્યં પુનઃ સત્યં સત્યં સત્યં પુનઃ પુનઃ ॥ ૫॥

પ્રણવાર્થઃ શિવઃ સાક્ષાત્પ્રાધાન્યેન પ્રકીર્તિતઃ ।
શ્રુતિષુ સ્મૃતિશાસ્ત્રેષુ પુરાણેષ્વાગમેષુ ચ ॥ ૬॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દં યસ્ય વૈ વિદ્વાન્ન બિભેતિ કુતશ્ચન ॥ ૭॥

યસ્માજ્જગદિદં સર્વં વિધિવિષ્ણ્વિન્દ્રપૂર્વકમ્ ।
સહ ભૂતેન્દ્રિયગ્રામૈઃ પ્રથમં સમ્પ્રસૂયતે ॥ ૮॥

ન સમ્પ્રસૂયતે યો વૈ કુતશ્ચન કદાચન ।
યસ્મિન્ન ભાસતે વિદ્યુન્ન ચ સૂર્યો ન ચન્દ્રમાઃ ॥ ૯॥

યસ્ય ભાસા વિભાતીદં જગત્સર્વં સમન્તતઃ ।
સર્વૈશ્વર્યેણ સમ્પન્નો નામ્ના સર્વેશ્વરઃ સ્વયમ્ ॥ ૬.૧૨.૧૦॥

યો વૈ મુમુક્ષુભિર્ધ્યેયઃ શમ્ભુરાકાશમધ્યગઃ ।
સર્વવ્યાપી પ્રકાશાત્મા ભાસરૂપો હિ ચિન્મયઃ ॥ ૧૧॥

યસ્ય પુંસઃ પરા શક્તિર્ભાવગમ્યા મનોહરા ।
નિર્ગુણા સ્વગુણૈરેવ નિગૂઢા નિષ્કલા શિવા ॥ ૧૨॥

તદીયં ત્રિવિધં રૂપં સ્થૂલં સૂક્ષ્મં પરં તતઃ ।
ધ્યેયં મુમુક્ષુભિર્નિત્યં ક્રમતો યોગિભિર્મુને ॥ ૧૩॥

નિષ્કલઃ સર્વદેવાનામાદિદેવઃ સનાતનઃ ।
જ્ઞાનક્રિયાસ્વભાવો યઃ પરમાત્મેતિ ગીયતે ॥ ૧૪॥

તસ્ય દેવાધિદેવસ્ય મૂર્ત્તિઃ સાક્ષાત્સદાશિવઃ ।
પઞ્ચમન્ત્રતનુર્દેવઃ કલાપઞ્ચકવિગ્રહઃ ॥ ૧૫॥

શુદ્ધસ્ફટિકસઙ્કાશઃ પ્રસન્નઃ શીતલદ્યુતિઃ ।
પઞ્ચવક્ત્રો દશભુજસ્ત્રિપઞ્ચનયનઃ પ્રભુઃ ॥ ૧૬॥

ઈશાનમુકુટોપેતઃ પુરુષાસ્યઃ પુરાતનઃ ।
અઘોરહૃદયો વામદેવગુહ્યપ્રદેશવાન્ ॥ ૧૭॥

સદ્યપાદશ્ચ તન્મૂર્ત્તિઃ સાક્ષાત્સકલનિષ્કલઃ ।
સર્વજ્ઞત્વાદિષટ્શક્તિષડઙ્ગીકૃતવિગ્રહઃ ॥ ૧૮॥

શબ્દાદિશક્તિસ્ફુરિતહૃત્પઙ્કજવિરાજિતઃ ।
સ્વશક્ત્યા વામભાગે તુ મનોન્મન્યા વિભૂષિતઃ ॥ ૧૯॥

મન્ત્રાદિષડ્વિધાર્થાનામર્થોપન્યાસમાર્ગતઃ । સા - મા
સમષ્ટિવ્યષ્ટિભાવાર્થં વક્ષ્યામિ પ્રણવાત્મકમ્ ॥ ૬.૧૨.૨૦॥

ઉપદેશક્રમો હ્યાદૌ વક્તવ્યઃ શ્રૂયતામયમ્ ।
ચાતુર્વ્વર્ણ્યં હિ લોકેસ્મિન્પ્રસિદ્ધમ્માનુષે મુને ॥ ૨૧॥

ત્રૈવર્ણિકાનામેવાત્ર શ્રુત્યાચારસમન્વયઃ ।
શુશ્રૂષામાત્રસારા હિ શૂદ્રાઃ શ્રુતિબહિષ્કૃતાઃ ॥ ૨૨॥

ત્રૈવર્ણિકાનાં સર્વેષાં સ્વસ્વાશ્રમરતાત્મનામ્ ।
શ્રુતિસ્મૃત્યુદિતો ધર્મોઽનુષ્ઠેયો નાપરઃ ક્વચિત્ ॥ ૨૩॥

શ્રુતિસ્મૃત્યુદિતં કર્મ કુર્વન્સિદ્ધિમવાપ્સ્યતિ ।
ઇત્યુક્તં પરમેશેન વેદમાર્ગપ્રદર્શિના ॥ ૨૪॥

વર્ણાશ્રમાચારપુણ્યૈરભ્યર્ચ્ય પરમેશ્વરમ્ ।
તત્સાયુજ્યં ગતાઃ સર્વે બહવો મુનિસત્તમાઃ ॥ ૨૫॥

બ્રહ્મચર્યેણ મુનયો દેવા યજ્ઞક્રિયાધ્વના ।
પિતરઃ પ્રજયા તૃપ્તા ઇતિ હિ શ્રુતિરબ્રવીત્ ॥ ૨૬॥

એવં ઋણત્રયાન્મુક્તો વાનપ્રસ્થાશ્રમં ગતઃ ।
શીતોષ્ણસુખદુઃખાદિસહિષ્ણુર્વિજિતેન્દ્રિયઃ ॥ ૨૭॥

તપસ્વી વિજિતાહારો યમાદ્યં યોગમભ્યસેત્ ।
યથા દૃઢતરા બુદ્ધિરવિચાલ્યા ભવેત્તથા ॥ ૨૮॥

એવં ક્રમેણ શુદ્ધાત્મા સર્વકર્મ્માણિ વિન્યસેત્ ।
સંન્યસ્ય સર્વકર્મ્માણિ જ્ઞાનપૂજાપરો ભવેત્ ॥ ૨૯॥

સા હિ સાક્ષાચ્છિવૈક્યેન જીવન્મુક્તિફલપ્રદા ।
સર્વોત્તમા હિ વિજ્ઞેયા નિર્વિકારા યતાત્મનામ્ ॥ ૬.૧૨.૩૦॥

તત્પ્રકારમહં વક્ષ્યે લોકાનુગ્રહકામ્યયા ।
તવ સ્નેહાન્મહાપ્રાજ્ઞ સાવધાનતયા શ◌ૃણુ ॥ ૩૧॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞં વેદાન્તજ્ઞાનપારગમ્ ।
આચાર્યમુપગચ્છેત્સ યતિર્મતિમતાં વરમ્ ॥ ૩૨॥

તત્સમીપમુપવ્રજ્ય યથાવિધિ વિચક્ષણઃ ।
દીર્ઘદણ્ડપ્રણામાદ્યૈસ્તોષયેદ્યત્નતઃ સુધીઃ ॥ ૩૩॥

યો ગુરુઃ સ શિવઃ પ્રોક્તો યઃ શિવઃ સ ગુરુઃ સ્મૃતઃ ।
ઇતિ નિશ્ચિત્ય મનસા સ્વવિચારં નિવેદયેત્ ॥ ૩૪॥

લબ્ધાનુજ્ઞસ્તુ ગુરુણા દ્વાદશાહં પયોવ્રતી ।
શુક્લપક્ષે ચતુર્થ્યાં વા દશમ્યાં વા વિધાનતઃ ॥ ૩૫॥

પ્રાતઃ સ્નાત્વા વિશુદ્ધાત્મા કૃતનિત્યક્રિયઃ સુધીઃ ।
ગુરુમાહૂય વિધિના નાન્દીશ્રાદ્ધં સમારભેત્ ॥ ૩૬॥

વિશ્વેદેવાઃ સત્યવસુસંજ્ઞાવન્તઃ પ્રકીર્તિતાઃ ।
દેવશ્રાદ્ધે બ્રહ્મવિષ્ણુમહેશાઃ કથિતાસ્ત્રયઃ ॥ ૩૭॥

ઋષિશ્રાદ્ધે તુ સમ્પ્રોક્તા દેવક્ષેત્રમનુષ્યજાઃ ।
દેવશ્રાદ્ધે તુ વસુરુદ્રાદિત્યાઃ સમ્પ્રકીર્તિતાઃ ॥ ૩૮॥

ચત્વારો માનુષશ્રાદ્ધે સનકાદ્યા મુનીશ્વરાઃ ।
ભૂતશ્રાદ્ધે પઞ્ચ મહાભૂતાનિ ચ તતઃ પરમ્ ॥ ૩૯॥

ચક્ષુરાદીન્દ્રિયગ્રામો ભૂતગ્રામશ્ચતુર્વિધઃ ।
પિતૃશ્રાદ્ધે પિતા તસ્ય પિતા તસ્ય પિતા ત્રયઃ ॥ ૬.૧૨.૪૦॥

માતૃશ્રાદ્ધે માતૃપિતામહ્યૌ ચ પ્રપિતામહી ।
આત્મશ્રાદ્ધે તુ ચત્વાર આત્મા પિતૃપિતામહૌ ॥ ૪૧॥

પ્રપિતામહનામા ચ સપત્નીકાઃ પ્રકીર્તિતાઃ ।
માતામહાત્મકશ્રાદ્ધે ત્રયો માતામહાદયઃ ॥ ૪૨॥

પ્રતિશ્રાદ્ધં બ્રાહ્મણાનાં યુગ્મં કૃત્વોપકલ્પિતાન્ ।
આહૂય પાદૌ પ્રક્ષાલ્ય સ્વયમાચમ્ય યત્નતઃ ॥ ૪૩॥

સમસ્તસમ્પત્સમવાપ્તિહેતવઃ, સમુત્થિતાપત્કુલધૂમકેતવઃ ।
અપારસંસારસમુદ્રસેતવઃ, પુનન્તુ માં બ્રાહ્મણપાદરેણવઃ ॥ ૪૪॥

આપદ્ઘનધ્વાન્તસહસ્રભાનવઃ, સમીહિતાર્થાર્પણકામધેનવઃ ।
સમસ્તતીર્થામ્બુપવિત્રમૂર્ત્તયો, રક્ષન્તુ માં બ્રાહ્મણપાદપાંસવઃ ॥ ૪૫॥

ઇતિ જપ્ત્વા નમસ્કૃત્ય સાષ્ટાઙ્ગં ભુવિ દણ્ડવત્ ।

સ્થિત્વા તુ પ્રાઙ્મુખઃ શમ્ભોઃ પાદાબ્જયુગલં સ્મરન્ ॥ ૪૬॥

સપવિત્રકરઃ શુદ્ધ ઉપવીતી દૃઢાસનઃ ।
પ્રાણાયામત્રયં કુર્યાચ્છ્રુત્વા તિથ્યાદિકં પુનઃ ॥ ૪૭॥

મત્સંન્યાસાઙ્ગભૂતં યદ્વિશ્વેદેવાદિકં તથા ।
શ્રાદ્ધમષ્ટવિધં માતામહાન્તં પાર્વણેન વૈ ॥ ૪૮॥

વિધાનેન કરિષ્યામિ યુષ્મદાજ્ઞાપુરઃસરમ્ ।
એવં વિધાય સઙ્કલ્પં દર્ભાનુત્તરતસ્ત્યજેત્ ॥ ૪૯॥

ઉપસ્પૃશ્યાપ ઉત્થાય વરણક્રમમારભેત્ ।
પવિત્રપાણિઃ સંસ્પૃશ્ય પાણી બ્રાહ્મણયોર્વદેત્ ॥ ૬.૧૨.૫૦॥

વિશ્વેદેવાર્થ ઇત્યાદિ ભવદ્ભ્યાં ક્ષણ ઇત્યપિ ॥ ૫૧॥

પ્રસાદનીય ઇત્યન્તં સર્વત્રૈવં વિધિક્રમઃ ।
એવં સમાપ્ય વરણં મણ્ડલાનિ પ્રકલ્પયેત્ ॥ ૫૨॥

ઉદગારભ્ય દશ ચ કૃત્વાભ્યર્ચનમક્ષતૈઃ ।
તેષુ ક્રમેણ સંસ્થાપ્ય બ્રાહ્મણાન્ પાદયોઃ પુનઃ ॥ ૫૩॥

વિશ્વેદેવાદિનામાનિ સસંવબોધનમુચ્ચરેત્ ।
ઇદં વઃ પાદ્યમિતિ સકુશપુષ્પાક્ષતોદકૈઃ ॥ ૫૪॥

પાદ્યં દત્ત્વા સ્વયમપિ ક્ષાલિતાઙ્ઘ્રિરુદઙ્મુખઃ ।
આચમ્ય યુગ્મક્લૃપ્તાંસ્તાનાસનેષૂપવેશ્ય ચ ॥ ૫૫॥

વિશ્વેદેવસ્વરૂપસ્ય બ્રાહ્મણસ્યેદમાસનમ્ ।
ઇતિ દર્ભાસનં દત્ત્વા દર્ભપાણિઃ સ્વયં સ્થિતઃ ॥ ૫૬॥

અસ્મિન્નાન્દીમુખશ્રાદ્ધે વિશ્વેદેવાર્થ ઇત્યપિ ।
ભવદ્ભ્યાં ક્ષણ ઇત્યુક્ત્વા ક્રિયતામિતિ સંવદેત્ ॥ ૫૭॥

પ્રાપ્નુતામિતિ સમ્પ્રોચ્ય ભવન્તાવિતિ સંવદેત્ ।
વદેતાં પ્રાપ્નુયાવેતિ તૌ ચ બ્રાહ્મણપુઙ્ગવૌ ॥ ૫૮॥

સમ્પૂર્ણમસ્તુ સઙ્કલ્પસિદ્ધિરસ્ત્વિતિ તાન્ પ્રતિ ।
ભવન્તોઽનુગૃહ્ણન્ત્વિતિ પ્રાર્થયેદ્ દ્વિજપુઙ્ગવાન્ ॥ ૫૯॥

તતઃ શુદ્ધકદલ્યાદિપાત્રેષુ ક્ષાલિતેષુ ચ ।

અન્નાદિભોજ્યદ્રવ્યાણિ દત્ત્વા દર્ભૈઃ પૃથક્ પૃથક્ ॥ ૬.૧૨.૬૦॥

પરિસ્તીર્ય સ્વયં તત્ર પરિષિચ્યોદકેન ચ ।
હસ્તાભ્યામવલમ્બ્યાથ પાત્રં પ્રત્યેકમાદરાત્ ॥ ૬૧॥

પૃથિવી તે પાત્રમિત્યાદિ કૃત્વા તત્ર વ્યવસ્થિતાન્ ।
દેવાદીંશ્ચ ચતુર્થ્યન્તાનનૂદ્યાક્ષતસંયુતાન્ ॥ ૬૨॥

ઉદગ્ગૃહીત્વા સ્વાહેતિ દેવાર્થેઽન્નં યજેત્પુનઃ ।
ન મમેતિ વદેદન્તે સર્વત્રાયં વિધિક્રમઃ ॥ ૬૩॥

યત્પાદપદ્મસ્મરણાદ્યસ્ય નામજપાદપિ ।
ન્યૂનં કર્મ ભવેત્પૂર્ણં તં વન્દે સામ્બમીશ્વરમ્ ॥ ૬૪॥

ઇતિ જપ્ત્વા તતો બ્રૂયાન્મયા કૃતમિદં પુનઃ ।
નાન્દીમુખશ્રાદ્ધમિતિ યથોક્તં ચ વદેત્તતઃ ॥ ૬૫॥

અસ્ત્વિતિ બ્રૂતેતિ ચ તાન્પ્રસાદ્ય દ્વિજપુઙ્ગવાન્ ।
વિસૃજ્ય સ્વકરસ્થોદં પ્રણમ્ય ભુવિ દણ્ડવત્ ॥ ૬૬॥

ઉત્થાય ચ તતો બ્રૂયાદમૃતં ભવતુ દ્વિજાન્ ।
પ્રાર્થયેચ્ચ પરં પ્રીત્યા કૃતાઞ્જલિરુદારધીઃ ॥ ૬૭॥

શ્રીરુદ્રં ચમકં સૂક્તં પૌરુષં ચ યથાવિધિ ।
ચિત્તે સદાશિવં ધ્યાત્વા જપેદ્ બ્રહ્માણિ પઞ્ચ ચ ॥ ૬૮॥

ભોજનાન્તે રુદ્રસૂક્તં ક્ષમાપય દ્વિજાન્ પુનઃ ।
તન્મન્ત્રેણ તતો દદ્યાદુત્તરાપોશણં પુરઃ ॥ ૬૯॥

પ્રક્ષાલિતાઙ્ઘ્રિરાચમ્ય પિણ્ડસ્થાનં વ્રજેત્તતઃ ।
આસીનઃ પ્રાઙ્મુખો મૌની પ્રાણાયામત્રયં ચરેત્ ॥ ૬.૧૨.૭૦॥

નાન્દીમુખોક્તશ્રાદ્ધાઙ્ગં કરિષ્યે પિણ્ડદાનકમ્ ।
ઇતિ સઙ્કલ્પ્ય દક્ષાદિ સમારભ્યોદકાન્તિકમ્ ॥ ૭૧॥

નવ રેખાઃ સમાલિખ્ય પ્રાગગ્રાન્દ્વાદશ ક્રમાત્ ।
સંસ્તીર્ય દર્ભાન્દક્ષાદિદેવાદિસ્થાનપઞ્ચકમ્ ॥ ૭૨॥

તૂષ્ણીં દદ્યાત્સાક્ષતોદં ત્રિષુ સ્થાનેષુ ચ ક્રમાત્ ।
સ્થાનેષ્વન્યેષુ માતૃષુ માર્જયન્તાસ્તતઃ પરમ્ ॥ ૭૩॥

અત્રેતિ પિતરઃ પશ્ચાત્સાક્ષતોદં સમર્ચ્ય ચ ।
દદ્યાત્તતઃ ક્રમેણૈવ દેવાદિસ્થાનપઞ્ચકે ॥ ૭૪॥

તત્તદ્દેવાદિનામાનિ ચતુર્થ્યન્તાન્યુદીર્ય ચ ।
પિણ્ડત્રયં તતો દદ્યાત્પ્રત્યેકં સ્થાનપઞ્ચકે ॥ ૭૫॥

સ્વગૃહ્યોક્તેન માર્ગેણ દદ્યાત્પિણ્ડાન્પૃથક્પૃથક્ ।
દદ્યાદિદં સાક્ષતં ચ પિતૃસાદ્ગુણ્યહેતવે ॥ ૭૬॥

ધ્યાયેત્સદાશિવં દેવં હૃદયામ્ભોજમધ્યતઃ ।
તત્પાદપદ્મસ્મરણાદિતિ શ્લોકં પઠન્ પુનઃ ॥ ૭૭॥

નમસ્કૃત્ય બ્રાહ્મણેભ્યો દક્ષિણાં ચ સ્વશક્તિતઃ ।
દત્ત્વા ક્ષમાપય ચ તાન્ વિસૃજ્ય ચ તતઃ ક્રમાત્ ॥ ૭૮॥

પિણ્ડાનુત્સૃજ્ય ગોગ્રાસં દદ્યાન્નો ચેજ્જલે ક્ષિપેત્ ।
પુણ્યાહવાચનં કૃત્વા ભુઞ્જીત સ્વજનૈઃ સહ ॥ ૭૯॥

અન્યેદ્યુઃ પ્રાતરુત્થાય કૃતનિત્યક્રિયઃ સુધીઃ ।
ઉપોષ્ય ક્ષૌરકર્માદિ કક્ષોપસ્થવિવર્જિતમ્ ॥ ૬.૧૨.૮૦॥

કેશશ્મશ્રુનખાનેવ કર્માવધિ વિસૃજ્ય ચ ।
સમાષ્ટિકેશાન્વિધિવત્કારયિત્વા વિધાનતઃ ॥ ૮૧॥

સ્નાત્વા ધૌતપટઃ શુદ્ધો દ્વિરાચમ્યાથ વાગ્યતઃ ।
ભસ્મ સન્ધાર્ય વિધિના કૃત્વા પુણ્યાહવાચનમ્ ॥ ૮૨॥

તેન સમ્પ્રોક્ષ્ય સમ્પ્રાપ્ય શુદ્ધદેહસ્વભાવતઃ ।
હોમદ્રવ્યાર્થમાચાર્યદક્ષિણાર્થં વિહાય ચ ॥ ૮૩॥

દ્રવ્યજાતં મહેશાય દ્વિજેભ્યશ્ચ વિશેષતઃ ।
ભક્તેભ્યશ્ચ પ્રદાયાથ શિવાય ગુરુરૂપિણે ॥ ૮૪॥

વસ્ત્રાદિ દક્ષિણાં દત્ત્વા પ્રણમ્ય ભુવિ દણ્ડવત્ ।
દોરકૌપીનવસનં દણ્ડાદ્યં ક્ષાલિતં ભુવિ ॥ ૮૫॥

આદાય હોમદ્રવ્યાણિ સમિધાદીનિ ચ ક્રમાત્ ।
સમુદ્રતીરે નદ્યાં વા પર્વતે વા શિવાલયે ॥ ૮૬॥

અરણ્યે ચાપી ગોષ્ઠે વા વિચાર્ય સ્થાનમુત્તમમ્ ।
સ્થિત્વાચમ્ય તતઃ પૂર્વં કૃત્વા માનસમઞ્જરીમ્ ॥ ૮૭॥

બ્રાહ્મમોઙ્કારસહિતં નમો બ્રહ્મણ ઇત્યપિ ।
જપિત્વા ત્રિસ્તતો બ્રૂયાદગ્નિમીલે પુરોહિતમ્ ॥ ૮૮॥

અથ મહાવ્રતમિતિ અગ્નિર્વૈ દેવનામતઃ ।
તથૈતસ્ય સમામ્નાયમિષે ત્વોર્જ્જેત્વા વેતિ તત્ ॥ ૮૯॥

અગ્ન આયાહિ વીતયે શન્નો દેવીરભિષ્ટયે ।
પશ્ચાત્પ્રોચ્ય મયરસતજભનલગૈઃ સહ ॥ ૬.૧૨.૯૦॥

સમ્મિતં ચ તતઃ પઞ્ચસંવત્સરમયં તતઃ ।
સમામ્નાયઃ સમામ્નાતઃ અથ શિક્ષાં વદેત્પુનઃ ।
પ્રવક્ષ્યામીત્યુદીર્યાથ વૃદ્ધિરાદૈચ્ચ સંવદેત્ ॥ ૯૧॥

અથાતો ધર્મજિજ્ઞાસેત્યુચ્ચાર્ય પુનરઞ્જસા ।
અથાતો બ્રહ્મજિજ્ઞાસા વેદાદીનપિ સઞ્જપેત્ ॥ ૯૨॥

બ્રહ્માણમિન્દ્રં સૂર્યં ચ સોમં ચૈવ પ્રજાપતિમ્ ।
આત્માનમન્તરાત્માનં જ્ઞાનાત્માનમતઃ પરમ્ ॥ ૯૩॥

પરમાત્માનમપિ ચ પ્રણવાદ્યં નમોન્તકમ્ ।
ચતુર્થ્યન્તં જપિત્વાઽથ સક્તુમુષ્ટિં પ્રગૃહ્ય ચ ॥ ૯૪॥

પ્રાશ્યાથ પ્રણવેનૈવ દ્વિરાચમ્યાથ સંસ્પૃશેત્ ।
નાભિં મન્ત્રાન્વક્ષ્યમાણં પ્રણવાદ્યાન્નમોઽન્તકાન્ ॥ ૯૫॥

આત્માનમન્તરાત્માનં જ્ઞાનાત્માનં પુરં પુનઃ ।
આત્માનં ચ સમુચ્ચાર્ય પ્રજાપતિમતઃ પરમ્ ॥ ૯૬॥

સ્વાહાન્તાન્પ્રજપેત્પશ્ચાત્પયોદધિઘૃતં પૃથક્ ।
ત્રિવારં પ્રણવેનૈવ પ્રાશ્યાચમ્ય દ્વિધા પુનઃ ॥ ૯૭॥

પ્રાગાસ્ય ઉપવિશ્યાથ દૃઢચિત્તઃ સ્થિરાસનઃ ।
યથોક્તવિધિના સમ્યક્પ્રાણાયામત્રયં ચરેત્ ॥ ૯૮॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સંન્યાસવિધિવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૬.૧૨॥

૬.૧૩

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૧૩. ત્રયોદશોઽધ્યાયઃ ।

સુબ્રહ્મણ્ય ઉવાચ ।
અથ મધ્યાહ્નસમયે સ્નાત્વા નિયતમાનસઃ ॥

ગન્ધપુષ્પાક્ષતાદીનિ પૂજાદ્રવ્યાણ્યુપાહરેત ॥ ૧॥

નૈરૃત્યે પૂજયેદ્દેવં વિઘ્નેશં દેવપૂજિતમ્ ।
ગણાનાં ત્વેતિ મન્ત્રેણાવાહયેત્સુવિધાનતઃ ॥ ૨॥

રક્તવર્ણં મહાકાયં સર્વાભરણભૂષિતમ્ ।
પાશાઙ્કુશાક્ષાભીષ્ટં ચ દધાનં કરપઙ્કજૈઃ ॥ ૩॥

એવમાવાહ્ય સન્ધ્યાય શમ્ભુપુત્રં ગજાનનમ્ ।
અભ્યર્ચ્ય પાયસાપૂપનાલિકેરગુડાદિભિઃ ॥ ૪॥

નૈવેદ્યમુત્તમં દદ્યાત્તામ્બૂલાદિમથાપરમ્ ।
પરિતોષ્ય નમસ્કૃત્ય નિર્વિઘ્નં પ્રાર્થયેત્તતઃ ॥ ૫॥

ઔપાસનાગ્નૌ કર્ત્તવ્યં સ્વગૃહ્યોક્તવિધાનતઃ ।
આજ્યભાગાન્તમાગ્નેયં મખતન્ત્રમતઃ પરમ્ ॥ ૬॥

ભૂઃસ્વાહેતિ ત્ર્યૃચા પૂર્ણાહુતિં હુત્વા સમાપ્ય ચ ।
ગાયત્રીં પ્રજપેદ્યાવદપરાહ્ણમતન્દ્રિતઃ ॥ ૭॥

અથ સાયન્તનીં સન્ધ્યામુપાસ્ય સ્નાનપૂર્વકમ્ ।
સાયમૌપાસનં હુત્વા મૌની વિજ્ઞાપયેદ્ ગુરુમ્ ॥ ૮॥

શ્રપયિત્વા ચરું તસ્મિન્સમિદન્નાજ્યભેદતઃ ।
જુહુયાદ્રૌદ્રસૂક્તેન સદ્યોજાતાદિપઞ્ચભિઃ ॥ ૯॥

બ્રહ્મભિશ્ચ મહાદેવં સામ્બં વહ્નૌ વિભાવયેત્ ।
ગૌરીર્મિમાય મન્ત્રેણ હુત્વા ગૌરીમનુસ્મરન્ ॥ ૬.૧૩.૧૦॥

તતોઽગ્નયે સ્વિષ્ટકૃતે સ્વાહેતિ જુહુયાત્સકૃત્ ।
હુત્વોપરિષ્ટાત્તન્ત્રં તુ તતોઽગ્નેરુત્તરે બુધઃ ॥ ૧૧॥

સ્થિત્વાસને જપેન્મૌની ચૈલાજિનકુશોત્તરે ।
આબ્રાહ્મં ચ મુહૂર્તં તુ ગાયત્રી દૃઢમાનસઃ ॥ ૧૨॥

તતઃ સ્નાત્વા ત્વશક્તશ્ચેદ્ભસ્મના વા વિધાનતઃ ।
શ્રપયિત્વા ચરું તસ્મિન્નગ્નાવેવાભિધારિતમ્ ॥ ૧૩॥

ઉદગુદ્વાસ્ય બર્હિષ્યાસાદ્યાજ્યેન ચરું તતઃ ।
અભિઘાર્ય વ્યાહૃતીશ્ચ રૌદ્રસૂક્તં ચ પઞ્ચ ચ ॥ ૧૪॥

જપેદ્ બ્રહ્માણિ સન્ધાર્ય ચિત્તં શિવપદામ્બુજે ।
પ્રજાપતિમથેન્દ્રં ચ વિશ્વેદેવાસ્તતઃ પરમ્ ॥ ૧૫॥

બ્રહ્માણં સચતુર્થ્યન્તં સ્વાહાન્તાન્ પ્રણવાદિકાન્ ।
સઞ્જપ્ય વાચયિત્વાથ પુણ્યાહં ચ તતઃ પરમ્ ॥ ૧૬॥

પરસ્તાત્તન્ત્રમગ્નયે સ્વાહેત્યગ્નિમુખાવધિ ।
નિર્વર્ત્ય પશ્ચાત્પ્રાણાય સ્વાહેત્યારભ્ય પઞ્ચભિઃ ॥ ૧૭॥

સાજ્યેન ચરુણા પશ્ચાદગ્નિં સ્વિષ્ટકૃતં હુનેત્ ।
પુનશ્ચ પ્રજપેત્સૂક્તં રૌદ્રં બ્રહ્માણિ પઞ્ચ ચ ॥ ૧૮॥

મહેશાદિ ચતુર્વ્યૂહમન્ત્રાંશ્ચ પ્રજપેત્પુનઃ ।
હુત્વોપરિષ્ટાત્તન્ત્રં તુ સ્વશાખોક્તેન વર્ત્મના ॥ ૧૯॥

તત્તદ્દેવાન્સમુદ્દિશ્ય સાઙ્ગં કુર્યાદ્વિચક્ષણઃ ।
એવમગ્નિમુખાદ્યં યત્કર્મતન્ત્રં પ્રવર્તિતમ્ ॥ ૬.૧૩.૨૦॥

અતઃ પરં પ્રજુહુયાદ્વિરજાહોમમાત્મનઃ ।
ષડ્વિંશતત્ત્વરૂપેસ્મિન્દેહે લીનસ્ય શુદ્ધયે ॥ ૨૧॥

તત્ત્વાન્યેતાનિ મદ્દેહે શુધ્યન્તામિત્યનુસ્મરન્ ।
તત્રાત્મતત્ત્વશુદ્ધ્યર્થં મન્ત્રૈરારુણકેતુકૈઃ ॥ ૨૨॥

પઠ્યમાનૈઃ પૃથિવ્યાદિપુરુષાન્તં ક્રમાન્મુને ।
સાજ્યેન ચરુણા મૌની શિવપાદામ્બુજં સ્મરન્ ॥ ૨૩॥

પૃથિવ્યાદિ ચ શબ્દાદિ વાગાદ્યં પઞ્ચકં પુનઃ ।
શ્રોત્રાદ્યં ચ શિરઃ પાર્શ્વપૃષ્ઠોદરચતુષ્ટયમ્ ॥ ૨૪॥

જઙ્ઘાં ચ યોજયેત્પશ્ચાત્ત્વગાદ્યં ધાતુસપ્તકમ્ ।
પ્રાણાદ્યં પઞ્ચકં પશ્ચાદન્નાદ્યં કોશપઞ્ચકમ્ ॥ ૨૫॥

મનશ્ચિત્તં ચ બુદ્ધિશ્ચાહઙ્કૃતિઃ ખ્યાતિરેવ ચ ।

સઙ્કલ્પં તુ ગુણાઃ પશ્ચાત્પ્રકૃતિઃ પુરુષસ્તતઃ ॥ ૨૬॥

પુરુષસ્ય તુ ભોક્તૃત્વં પ્રતિપન્નસ્ય ભોજને ।
અન્તરઙ્ગતયા તત્ત્વપઞ્ચકં પરિકીર્તિતમ્ ॥ ૨૭॥

નિયતિઃ કાલરાગશ્ચ વિદ્યા ચ તદનન્તરમ્ ।
કલા ચ પઞ્ચકમિદં મયોત્પન્નં મુનીશ્વર ॥ ૨૮॥

માયાં તુ પ્રકૃતિં વિદ્યાદિતિ માયા શ્રુતીરિતા ।
તજ્જાન્યેતાનિ તત્ત્વાનિ શ્રુત્યુક્તાનિ ન સંશયઃ ॥ ૨૯॥

કાલસ્વભાવો નિયતિરિતિ ચ શ્રુતિરબ્રવીત્ ।
એતત્પઞ્ચકમેવાસ્ય પઞ્ચકઞ્ચુકમુચ્યતે ॥ ૬.૧૩.૩૦॥

અજાનન્પઞ્ચતત્ત્વાનિ વિદ્વાનપિ ચ મૂઢધીઃ ।
નિપત્યાધસ્તાત્પ્રકૃતેરુપરિષ્ટાત્પુમાનયમ્ ॥ ૩૧॥

કાકાક્ષિન્યાયમાશ્રિત્ય વર્તતે પાર્શ્વતોઽન્વહમ્ ।
વિદ્યાતત્ત્વમિદં પ્રોક્તં શુદ્ધવિદ્યામહેશ્વરૌ ॥ ૩૨॥

સદાશિવશ્ચ શક્તિશ્ચ શિવશ્ચેદં તુ પઞ્ચકમ્ ।
શિવતત્ત્વમિદં બ્રહ્મન્ પ્રજ્ઞાનં બ્રહ્મ વાગ્યતઃ ॥ ૩૩॥

પૃથિવ્યાદિશિવાન્તં યત્તત્ત્વજાતં મુનીશ્વર ।
સ્વકારણલયદ્વારા શુદ્ધિરસ્ય વિધીયતામ્ ॥ ૩૪॥

એકાદશાનાં મન્ત્રાણાં પરસ્મૈપદપૂર્વકમ્ ।
શિવજ્યોતિશ્ચતુર્થ્યન્તમિદં પદમથોચ્ચરેત્ ॥ ૩૫॥

ન મમેતિ વદેત્પશ્ચાદુદ્દેશત્યાગ ઈરિતઃ ।
અતઃ પરં વિવિધૈતિ કર્ષોત્કાયેતિ મન્ત્રયોઃ ॥ ૩૬॥

વ્યાપકાય પદસ્યાન્તે પરમાત્મન ઇત્યપિ ।
શિવજ્યોતિશ્ચતુર્થ્યન્તં વિશ્વભૂતપદં પુનઃ ॥ ૩૭॥

ઘસનોત્સુકશબ્દશ્ચ ચતુર્થ્યન્તમથો વદેત્ ।
પરસ્મૈપદમુચ્ચાર્ય દેવાય પદમુચ્ચરેત્ ॥ ૩૮॥

ઉત્તિષ્ઠસ્વેતિ મન્ત્રસ્ય વિશ્વરૂપાય શબ્દતઃ ।
પુરુષાય પદં બ્રૂયાદોંસ્વાહેત્યસ્ય સંવદેત્ ॥ ૩૯॥

લોકત્રયપદસ્યાન્તે વ્યાપિને પરમાત્મને ।
શિવાયેદં ન મમ ચ પદં બ્રૂયાદતઃ પરમ્ ॥ ૬.૧૩.૪૦॥

સ્વશાખોક્તપ્રકારેણ પુરસ્તાત્તન્ત્રકર્મ ચ ।
નિર્વર્ત્ય સર્પિષા મિશ્રં ચરું પ્રાશ્ય પુરોધસે ॥ ૪૧॥

પ્રદદ્યાદ્ દક્ષિણાં તસ્મૈ હેમાદિપરિબૃંહિતામ્ ।
બ્રહ્માણમુદ્વાસ્ય તતઃ પ્રાતરૌપાસનં હુનેત્ ॥ ૪૨॥

સં મા સિઞ્ચન્તુ મરુત ઇતિ મન્ત્રં જપેન્નરઃ ।
યાતે અગ્ન ઇત્યનેન મન્ત્રેણાગ્નૌ પ્રતાપ્ય ચ ॥ ૪૩॥

હસ્તમગ્નૌ સમારોપ્ય સ્વાત્મન્યદ્વૈતધામનિ ।
પ્રાભાતિકીં તતઃ સન્ધ્યામુપાસ્યાદિત્યમપ્યથ ॥ ૪૪॥

ઉપસ્થાય પ્રવિશ્યાપ્સુ નાભિદઘ્નં પ્રવેશયન્ ।
તન્મન્ત્રાં પેરજપેત્પ્રીત્યા નિશ્ચલાત્મા સમુત્સુકઃ ॥ ૪૫॥

આહિતાગ્નિસ્તુ યઃ કુર્યાત્પ્રાજાપત્યેષ્ટિમાહિતે ।
શ્રૌતે વૈશ્વાનરે સમ્યક્ સર્વવેદસદક્ષિણામ્ ॥ ૪૬॥

અથાગ્નિમાત્મન્યારોપ્ય બ્રાહ્મણઃ પ્રવ્રજેદ્ ગૃહાત્ ।
સાવિત્રીપ્રથમં પાદં સાવિત્રીમિત્યુદીર્ય ચ ॥ ૪૭॥

પ્રવેશયામિ શબ્દાન્તે ભૂરોમિતિ ચ સંવદેત્ ।
દ્વિતીયં પાદમુચ્ચાર્ય સાવિત્રીમિતિ પૂર્વવત્ ॥ ૪૮॥

પ્રવેશયામિ શબ્દાન્તે ભૂરોમિતિ ચ સંવદેત્ ।
તૃતીયં પાદમુચ્ચાર્ય સાવિત્રીમિત્યતઃ પરમ્ ॥ ૪૯॥

પ્રવેશયામિ શબ્દાન્તે સુવરોમિત્યુદીરયેત્ ।
ત્રિપાદમુચ્ચરેત્પૂર્વં સાવિત્રીમિત્યતઃ પરમ્ ॥ ૬.૧૩.૫૦॥

પ્રવેશયામિ શબ્દાન્તે ભૂર્ભુવઃ સુવરોમિતિ ।
ઉદીરયેત્પરં પ્રીત્યા નિશ્ચલાત્મા મુનીશ્વર ॥ ૫૧॥

ઇયં ભગવતી સાક્ષાચ્છઙ્કરાર્દ્ધશરીરિણી ।
પઞ્ચવક્ત્રા દશભુજા ત્રિપઞ્ચનયનોજ્જ્વલા ॥ ૫૨॥

નવરત્નકિરીટોદ્યચ્ચન્દ્રલેખાવતંસિની ।
શુદ્ધસ્ફટિકસઙ્કાશા દશાયુધધરા શુભા ॥ ૫૩॥

હારકેયૂરકટકકિઙ્કિણીનૂપુરાદિભિઃ ।
ભૂષિતાવયવા દિવ્યવસના રત્નભૂષણા ॥ ૫૪॥

વિષ્ણુના વિધિના દેવઋષિગન્ધર્વદાનવૈઃ ।
માનવૈશ્ચ સદા સેવ્યા સર્વાત્મવ્યાપિની શિવા ॥ ૫૫॥

સદાશિવસ્ય દેવસ્ય ધર્મપત્ની મનોહરા ।
જગદમ્બા ત્રિજનની ત્રિગુણા નિર્ગુણાપ્યજા ॥ ૫૬॥

ઇત્યેવં સંવિચાર્યાથ ગાયત્રીં પ્રજપેત્સુધીઃ ।
આદિદેવીં ચ ત્રિપદાં બ્રાહ્મણત્વાદિદામજામ્ ॥ ૫૭॥

યો હ્યન્યથા જપેત્પાપો ગાયત્રીં શિવરૂપિણીમ્ ।
સ પચ્યતે મહાઘોરે નરકે કલ્પસઙ્ખ્યયા ॥ ૫૮॥

સા વ્યાહૃતિભ્યઃ સઞ્જાતા તાસ્વેવ વિલયં ગતા ।
તાશ્ચ પ્રણવસમ્ભૂતા પ્રણવે વિલયં ગતાઃ ॥ ૫૯॥

પ્રણવઃ સર્વવેદાદિઃ પ્રણવઃ શિવવાચકઃ ।
મન્ત્રાધિરાજરાજશ્ચ મહાબીજં મનુઃ પરઃ ॥ ૬.૧૩.૬૦॥

શિવો વા પ્રણવો હ્યેષ પ્રણવો વા શિવઃ સ્મૃતઃ ।
વાચ્યવાચકયોર્ભેદો નાત્યન્તં વિદ્યતે યતઃ ॥ ૬૧॥

એનમેવ મહામન્ત્રં જીવાનાં ચ તનુત્યજામ્ ।
કાશ્યાં સંશ્રાવ્ય મરણે દત્તે મુક્તિં પરાં શિવઃ ॥ ૬૨॥

તસ્માદેકાક્ષરં દેવં શિવં પરમકારણમ્ ।
ઉપાસતે યતિશ્રેષ્ઠા હૃદયામ્ભોજમધ્યગમ્ ॥ ૬૩॥

મુમુક્ષવોઽપરે ધીરા વિરક્તા લૌકિકા નરાઃ ।
વિષયાન્મનસા જ્ઞાત્વોપાસતે પરમં શિવમ્ ॥ ૬૪॥

એવં વિલાપ્ય ગાયત્રીં પ્રણવે શિવવાચકે ।
અહં વૃક્ષસ્ય રેરિવેત્યનુવાકં જપેત્પુનઃ ॥ ૬૫॥

યશ્છન્દસામામૃષભ ઇત્યનુવાકમુપક્રમાત્ ।
ગોપાયાન્તં જપન્પશ્ચાદુત્થિતોહમિતીરયેત્ ॥ ૬૬॥

વદેજ્જપેત્ ત્રિધા મન્દમધ્યોચ્ચ્રાયક્રમાન્મુને ।

પ્રણવં પૂર્વમુદ્ધૃત્ય સૃષ્ટિસ્થિતિલયક્રમાત્ ॥ ૬૭॥

તેષામથ ક્રમાદ્ભૂયાદ્ભૂઃ સંન્યસ્તમ્ભુવસ્તથા ।
સંન્યસ્તં સુવરિત્યુક્ત્વા સન્ન્યસ્તં પદમુચ્ચરમ્ ॥ ૬૮॥

સર્વમન્ત્રાન્ત પ્રદેશે મયેતિ ચ પદં વદેત્ ।
પ્રણવં પૂર્વમુદ્ધૃત્ય સમષ્ટિવ્યાહૃતીર્વદેત્ ॥ ૬૯॥

સમસ્તમિત્યતો બ્રૂયાન્મયેતિ ચ સમબ્રવીત્ ।
સદાશિવં હૃદિ ધ્યાત્વા મન્દાદીતિ તતો મુને ॥ ૬.૧૩.૭૦॥

પ્રૈષમન્ત્રાંસ્તુ જપ્ત્વૈવં સાવધાનેન ચેતસા ।
અભયં સર્વભૂતેભ્યો મત્તઃ સ્વાહેતિ સઞ્જપન્ ॥ ૭૧॥

પ્રાચ્યાં દિશ્યપ ઉદ્ધૃત્ય પ્રક્ષિપેદજલિં તતઃ ।
શિખાં યજ્ઞોપવીતં ચ યત્રોત્પાટ્ય ચ પાણિના ॥ ૭૨॥

ગૃહીત્વા પ્રણવં ભૂશ્ચ સમુદ્રં ગચ્છ સંવદેત્ ।
વહ્નિજાયાં સમુચ્ચાર્ય્ય સોદકાઞ્જલિના તતઃ ॥ ૭૩॥

અપ્સુ હૂયાદથ પ્રૈષૈરભિમન્ત્ર્ય ત્રિધા ત્વપઃ ।
પ્રાશ્ય તીરે સમાગત્ય ભૂમૌ વસ્ત્રાદિકં ત્યજેત્ ॥ ૭૪॥

ઉદઙ્મુખઃ પ્રાઙ્મુખો વા ગચ્છેસ્સપ્તપદાધિકમ્ ।
કિઞ્ચિદ્દૂરમથાચાર્યસ્તિષ્ઠ તિષ્ઠેતિ સંવદેત્ ॥ ૭૫॥

લોકસ્ય વ્યવહારાર્થં કૌપીનં દણ્ડમેવ ચ ।
ભગવન્સ્વીકુરુષ્વેતિ દદ્યાત્સ્વેનૈવ પાણિના ॥ ૭૬॥

દત્ત્વા સુદોરં કૌપીનં કાષાયવસનં તતઃ ।
આચ્છાદ્યાચમ્ય ચ દ્વેધા ત શિષ્યમિતિ સંવદેત્ ॥ ૭૭॥

ઇન્દ્રસ્ય વજ્રોઽસિ તત ઇતિ મન્ત્રમુદાહરેત્ ।
સમ્પ્રાર્થ્ય દણ્ડં ગૃહ્ણીયાત્સખાય ઇતિ સઞ્જપન્ ॥ ૭૮॥

અથ ગત્વા ગુરોઃ પાર્શ્વં શિવપાદામ્બુજં સ્મરન્ ।
પ્રણમેદ્દણ્ડવદ્ભૂમૌ ત્રિવારં સંયતાત્મવાન્ ॥ ૭૯॥

પુનરુત્થાય ચ શનૈઃ પ્રેમ્ણા પશ્યન્ગુરું નિજમ્ ।
કૃતાઞ્જલિપુટસ્તિષ્ઠેદ્ગુરુપાદ સમીપતઃ ॥ ૬.૧૩.૮૦॥

કર્મ્મારમ્ભાત્પૂર્વમેવ ગૃહીત્વા ગોમયં શુભમ્ ।
સ્થૂલામલકમાત્રેણ કૃત્વા પિણ્ડાન્વિશોષયેત ॥ ૮૧॥

સૌરૈસ્તુ કિરણૈરેવ હોમારમ્ભાગ્નિમધ્યગાન્ ।
નિક્ષિપ્ય હોમસમ્પૂર્ત્તૌ ભસ્મ સઙ્ગૃહ્ય ગોપયેત્ ॥ ૮૨॥

તતો ગુરુસ્સમાદાય વિરજાનલજં સિતમ્ ।
ભસ્મ તેનૈવ તં શિષ્યમગ્નિરિત્યાદિભિઃ ક્રમાત્ ॥ ૮૩॥

મન્ત્રૈરઙ્ગાનિ સંસ્પૃશ્ય મૂર્દ્ધાદિચરણાન્તતઃ ।
ઈશાનાદ્યૈઃ પઞ્ચમન્ત્રૈ શિર આરભ્ય સર્વતઃ ॥ ૮૪॥

સમુદ્ધૃત્ય વિધાનેન ત્રિપુણ્ડ્રં ધારયેત્તતઃ ।
ત્રિયાયુષૈસ્ત્ર્યમ્બકૈશ્ચ મૂર્ધ્ન આરભ્ય ચ ક્રમાત્ ॥ ૮૫॥

તતસ્સદ્ભક્તિયુક્તેન ચેતસા શિષ્યસત્તમઃ ।
હૃત્પઙ્કજે સમાસીનં ધ્યાયેચ્છિવમુમાસખમ્ ॥ ૮૬॥

હસ્તં નિધાય શિરસિ શિષ્યસ્ય સ ગુરુર્વદેત્ ।
ત્રિવારં પ્રણવં દક્ષકર્ણે ઋષ્યાદિસંયુતમ્ ॥ ૮૭॥

તતઃ કૃત્વા ચ કરુણાં પ્રણવસ્યાર્થ માદિશેત્ ।
ષડ્વિધાર્ત્થપરિ જ્ઞાનસહિતં ગુરુસત્તમઃ ॥ ૮૮॥

દ્વિષટ્પ્રકારં સ ગુરું પ્રણમેદ્ભુવિ દણ્ડવત્ ।
તદધીનો ભવેન્નિત્યં નાન્યત્કર્મ્મ સમાચરેત્ ॥ ૮૯॥

તદાજ્ઞયા તતઃ શિષ્યો વેદાન્તાર્થાનુસારતઃ ।
શિવજ્ઞાનપરો ભૂયાત્સગુણાગુણભેદતઃ ॥ ૬.૧૩.૯૦॥

તતસ્તેનૈવ શિષ્યેણ શ્રવણાદ્યઙ્ગપૂર્વ્વકમ્ ।
પ્રભાતિકાદ્યનુષ્ઠાનં જપાન્તે કારયેદ્ગુરુઃ ॥ ૯૧॥

પૂજાં ચ મણ્ડલે તસ્મિન્કૈલાસપ્રસ્તરાહ્વયે ।
શિવોદિતેન માર્ગેણ શિષ્યસ્તત્રૈવ પૂજયેત્ ॥ ૯૨॥

દેવન્નિત્યમશક્તશ્ચેત્પૂજિતું ગુરુણા શુભમ્ ।
સ્ફાટિકં પીઠિકોપેતં ગૃહ્ણીયાલ્લિઙ્ગમૈશ્વરમ્ ॥ ૯૩॥

વરં પ્રાણપરિત્યાગશ્છેદનં શિરસોઽપિ મે ।
ન ત્વનભ્યર્ચ્ય ભુઞ્જીયાં ભગવન્તં ત્રિલોચનમ્ ॥ ૯૪॥

એવન્ત્રિવારમુચ્ચાર્ય્ય શપથં ગુરુસન્નિધૌ ।
કુર્ય્યાદ્દૃઢમનાશ્શિષ્યઃ શિવભક્તિસમુદ્વહન્ ॥ ૯૫॥

તત એવ મહાદેવં નિત્યમુદ્યુક્તમાનસઃ ।
પૂજયેત્પરયા ભક્ત્યા પઞ્ચાવરણમાર્ગતઃ ॥ ૯૬॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં ત્રયોદશોઽધ્યાયઃ ॥ ૬.૧૩॥

૬.૧૪
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૧૪. ચતુર્દશોઽધ્યાયઃ । શિવરૂપપ્રણવવર્ણનમ્ ।

વામદેવ ઉવાચ ।
ભગવન્ષણ્મુખાશેષવિજ્ઞાનામૃતવારિધે ।
વિશ્વામરેશ્વરસુત પ્રણતાર્ત્તિપ્રભઞ્જન ॥ ૧॥

ષડ્વિધાર્ત્થપરિજ્ઞાનમિષ્ટદં કિમુદાહૃતમ્ ।
કે તત્ર ષડ્વિધા અર્થાઃ પરિજ્ઞાનં ચ કિં પ્રભો ॥ ૨॥

પ્રતિપાદ્યશ્ચ કસ્તસ્ય પરિજ્ઞાને ચ કિં ફલમ્ ।
એતત્સર્વં સમાચક્ષ્વ યદ્યત્પૃષ્ટં મયા ગુહ ॥ ૩॥

એતમર્ત્થમવિજ્ઞાય પશુશાસ્ત્રવિમોહિતઃ ।
અદ્યાપ્યહં મહાસેન ભ્રાન્તશ્ચ શિવમાયયા ॥ ૪॥

અહં શિવપદદ્વન્દ્વજ્ઞાનામૃતરસાયનમ્ ।
પીત્ત્વા વિગતસમ્મોહો ભવિષ્યામિ યથા તથા ॥ ૫॥

કૃપામૃતાર્દ્રયા દૃષ્ટ્યા વિલોક્ય સુચિરં મયિ ।
કર્ત્તવ્યોઽનુગ્રહઃ શ્રીમત્પાદાબ્જશરણાગતે ॥ ૬॥

ઇતિ શ્રુત્વા મુનીન્દ્રોક્તં જ્ઞાનશક્તિધરો વિભુઃ ।
પ્રાહાન્યદર્શનમહાસન્ત્રાસજનકં વચઃ ॥ ૭॥

સુબ્રહ્મણ્ય ઉવાચ ।

શ્રૂયતાં મુનિશાર્દૂલ ત્વયા યત્પૃષ્ટમાદરાત્ ।
સમષ્ટિવ્યષ્ટિભાવેન પરિજ્ઞાનમ્મહેશિતુઃ ॥ ૮॥

પ્રણવાર્થપરિજ્ઞાનરૂપં તદ્વિસ્તરાદહમ્ ।
વદામિ ષડ્વિધાર્થૈક્યપરિજ્ઞાનેન સુવ્રત ॥ ૯॥

પ્રથમો મન્ત્રરૂપઃ સ્યાદ્ દ્વિતીયો મન્ત્રભાવિતઃ ।
દેવતાર્થસ્તૃતીયોઽર્થઃ પ્રપઞ્ચાર્થસ્તતઃ પરમ્ ॥ ૬.૧૪.૧૦॥

ચતુર્થઃ પઞ્ચમાર્થઃ સ્યાદ્ ગુરુરૂપપ્રદર્શકઃ ।
ષષ્ઠઃ શિષ્યાત્મરૂપોઽર્થઃ ષડ્વિધાર્થાઃ પ્રકીર્તિતાઃ ॥ ૧૧॥

તત્ર મન્ત્રસ્વરૂપં તે વદામિ મુનિસત્તમ ।
યેન વિજ્ઞાતમાત્રેણ મહાજ્ઞાની ભવેન્નરઃ ॥ ૧૨॥

આદ્યઃ સ્વરઃ પઞ્ચમશ્ચ પઞ્ચમાન્તસ્તતઃ પરઃ ।
બિન્દુનાદૌ ચ પઞ્ચાર્ણાઃ પ્રોક્તા વેદૈર્ન ચાન્યથા ॥ ૧૩॥

એતત્સમષ્ટિરૂપો હિ વેદાદિઃ સમુદાહૃતઃ ।
નાદઃ સર્વસમષ્ટિઃ સ્યાદ્ બિન્દ્વાદ્યં યચ્ચતુષ્ટયમ્ ॥ ૧૪॥

વ્યષ્ટિરૂપેણ સંસિદ્ધં પ્રણવે શિવવાચકે ।
યન્ત્રરૂપં શૃણુ પ્રાજ્ઞ શિવલિઙ્ગં તદેવ હિ ॥ ૧૫॥

સર્વાધસ્તાલ્લિખેત્પીઠં તદૂર્ધ્વં પ્રથમં સ્વરમ્ ।
ઉવર્ણં ચ તદૂર્ધ્વસ્થં પવર્ગાન્તં તદૂર્ધ્વગમ્ ॥ ૧૬॥

તન્મસ્તકસ્થં બિન્દું ચ તદૂર્ધ્વં નાદમાલિખેત્ ।
યન્ત્રે સમ્પૂર્ણતાં યાતે સર્વકામઃ પ્રસિધ્યતિ ॥ ૧૭॥

એવં યન્ત્રં સમાલિખ્ય પ્રણવે નવ વેષ્ટયેત્ । ત-વ
તદુત્થેનૈવ નાદેન વિદ્યન્નાદાવસાનકમ્ ॥ ૧૮॥

દેવતાર્થં પ્રવક્ષ્યામિ ગૂઢં સર્વત્ર યન્મુને ।
તવ સ્નેહાદ્ વામદેવ યથા શઙ્કરભાષિતમ્ ॥ ૧૯॥

સદ્યોજાતં પ્રપદ્યામીત્યુપક્રમ્ય સદાશિવોમ્ ।

ઇતિ પ્રાહ શ્રુતિસ્તારં બ્રહ્મપઞ્ચકવાચકમ્ ॥ ૬.૧૪.૨૦॥

વિજ્ઞેયા બ્રહ્મરૂપિણ્યઃ સૂક્ષ્માઃ પઞ્ચૈવ દેવતાઃ ।

એતા એવ શિવસ્યાપિ મૂર્તિત્વેનોપબૃંહિતાઃ ॥ ૨૧॥

શિવસ્ય વાચકો મન્ત્રઃ શિવમૂર્ત્તેશ્ચ વાચકઃ ।
મૂર્ત્તિમૂર્તિમતોર્ભેદો નાત્યન્તં વિદ્યતે યતઃ ॥ ૨૨॥

ઈશાનમુકુટોપેત ઇત્યારભ્ય પુરોદિતઃ ।
શિવસ્ય વિગ્રહઃ પઞ્ચવક્ત્રાણિ શ‌ૃણુ સામ્પ્રતમ્ ॥ ૨૩॥

પઞ્ચમાદિ સમારભ્ય સદ્યોજાતાદ્યનુક્રમાત્ ।
ઊર્ધ્વાન્તમીશાનાન્તં ચ મુખપઞ્ચકમીરિતમ્ ॥ ૨૪॥

ઈશાનસ્યૈવ દેવસ્ય ચતુર્વ્યૂહપદે સ્થિતમ્ ।
પુરુષાદ્યં ચ સદ્યાન્તં બ્રહ્મરૂપં ચતુષ્ટયમ્ ॥ ૨૫॥

પઞ્ચ બ્રહ્મસમષ્ટિઃ સ્યાદીશાનં બ્રહ્મ વિશ્રુતમ્ ।
પુરુષાદ્યં તુ તદ્વ્યષ્ટિઃ સદ્યોજાતાન્તિકં મુને ॥ ૨૬॥

અનુગ્રહમયં ચક્રમિદં પઞ્ચાર્થકારણમ્ ।
પરબ્રહ્માત્મકં સૂક્ષ્મં નિર્વિકારમનામયમ્ ॥ ૨૭॥

અનુગ્રહોઽપિ દ્વિવિધસ્તિરોભાવાદિગોચરઃ ।
પ્રભુશ્ચાન્યસ્તુ જીવાનાં પરાવરવિમુક્તિદઃ ॥ ૨૮॥

એતત્સદાશિવસ્યૈવ કૃત્યદ્વયમુદાહૃતમ્ ।
અનુગ્રહેઽપિ સૃષ્ટ્યાદિકૃત્યાનાં પઞ્ચકં વિભોઃ ॥ ૨૯॥

મુને તત્રાપિ સદ્યાદ્યા દેવતાઃ પરિકીર્તિતાઃ ।
પરબ્રહ્મસ્વરૂપાસ્તાઃ પઞ્ચ કલ્યાણદાઃ સદા ॥ ૬.૧૪.૩૦॥

અનુગ્રહમયં ચક્રં શાન્ત્યતીતકલામયમ્ ।
સદાશિવાધિષ્ઠિતં ચ પરમં પદમુચ્યતે ॥ ૩૧॥

એતદેવ પદં પ્રાપ્ય યતીનાં ભવિતાત્મનામ્ ।
સદાશિવોપાસકાનાં પ્રણવાસક્તચેતસામ્ ॥ ૩૨॥

એતદેવ પદં પ્રાપ્ય તેન સાકં મુનીશ્વરાઃ ।
ભુક્ત્વા સુવિપુલાન્ભોગાન્દેવેન બ્રહ્મરૂપિણા ॥ ૩૩॥

મહાપ્રલયસમ્ભૂતૌ શિવસામ્યં ભજન્તિ હિ ।
ન પતન્તિ પુનઃ ક્વાપિ સંસારાબ્ધૌ જનાશ્ચ તે ॥ ૩૪॥

તે બ્રહ્મલોક ઇતિ ચ શ્રુતિરાહ સનાતની ।
ઐશ્વર્યં તુ શિવસ્યાપિ સમષ્ટિરિદમેવ હિ ॥ ૩૫॥

સર્વૈશ્વર્યેણ સમ્પન્ન ઇત્યાહાથર્વણી શિખા ।
સર્વૈશ્વર્યપ્રદાતૃત્વમસ્યૈવ પ્રવદન્તિ હિ ॥ ૩૬॥

ચમકસ્ય પદાન્નાન્યદધિકં વિદ્યતે પદમ્ ।
બ્રહ્મપઞ્ચકવિસ્તારપ્રપઞ્ચઃ ખલુ દૃશ્યતે ॥ ૩૭॥

બ્રહ્મભ્ય એવં સઞ્જાતા નિવૃત્ત્યાદ્યાઃ કલા મતાઃ ।
સૂક્ષ્મભૂતસ્વરૂપિણ્યઃ કારણત્વેન વિશ્રુતાઃ ॥ ૩૮॥

સ્થૂલરૂપસ્વરૂપસ્ય પ્રપઞ્ચસ્યાસ્ય સુવ્રત ।
પઞ્ચધાવસ્થિતં યત્તદ્ બ્રહ્મપઞ્ચકમિષ્યતે ॥ ૩૯॥

પુરુષઃ શ્રોત્રવાણ્યૌ ચ શબ્દકાશૌ ચ પઞ્ચકમ્ ।
વ્યાપ્તમીશાનરૂપેણ બ્રહ્મણા મુનિસત્તમ ॥ ૬.૧૪.૪૦॥

પ્રકૃતિસ્ત્વક્ચ પાણિશ્ચ સ્પર્શો વાયુશ્ચ પઞ્ચકમ્ ।
વ્યાપ્તં પુરુષરૂપેણ બ્રહ્મણૈવ મુનીશ્વર ॥ ૪૧॥

અહઙ્કારસ્તથા ચક્ષુઃ પાદો રૂપં ચ પાવકઃ ।
અઘોરબ્રહ્મણા વ્યાપ્તમેતત્પઞ્ચકમઞ્ચિતમ્ ॥ ૪૨॥

બુદ્ધિશ્ચ રસના પાયૂ રસ આપશ્ચ પઞ્ચકમ્ ।
બ્રહ્મણા વામદેવેન વ્યાપ્તં ભવતિ નિત્યશઃ ॥ ૪૩॥

મનો નાસા તથોપસ્થો ગન્ધો ભૂમિશ્ચ પઞ્ચકમ્ ।
સદ્યેન બ્રહ્મણા વ્યાપ્તં પઞ્ચબ્રહ્મમયં જગત્ ॥ ૪૪॥

યન્ત્રરૂપેણોપદિષ્ટઃ પ્રણવઃ શિવવાચકઃ ।
સમષ્ટિઃ પઞ્ચવર્ણાનાં બિન્દ્વાદ્યં યચ્ચતુષ્ટયમ્ ॥ ૪૫॥

શિવોપદિષ્ટમાર્ગેણ યન્ત્રરૂપં વિભાવયેત્ ।
પ્રણવં પરમં મન્ત્રાધિરાજં શિવરૂપિણમ્ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં શિવરૂપપ્રણવવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૬.૧૪॥

૬.૧૫

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૧૫. પઞ્ચદશોઽધ્યાયઃ । ઉપાસનામૂર્ત્તિવર્ણનમ્ ।

ઈશ્વર ઉવાચ ।
તતઃ પરં પ્રવક્ષ્યામિ સૃષ્ટિપદ્ધતિમુત્તમામ્ ।
સદાશિવાન્મહેશાદિચતુષ્કસ્ય વરાનને ॥ ૧॥

સદાશિવઃ સમષ્ટિઃ સ્યાદાકાશધિપતિઃ પ્રભુઃ ।
અસ્યૈવ વ્યષ્ટિતાપન્નં મહેશાદિચતુષ્ટયમ્ ॥ ૨॥

સદાશિવસહસ્રાંશાન્મહેશસ્ય સમુદ્ભવઃ ।
પુરુષાનન્તરૂપત્વાદ્વાયોરધિપતિશ્ચ સઃ ॥ ૩॥

માયાશક્તિયુતો વામે સકલશ્ચ ક્રિયાધિકઃ ।
અસ્યૈવ વ્યષ્ટિરૂપં સ્યાદીશ્વરાદિચતુષ્ટયમ્ ॥ ૪॥

ઈશો વિશ્વેશ્વરઃ પશ્ચાત્પરમેશસ્તતઃ પરમ્ ।
સર્વેશ્વર ઇતીદં તુ તિરોધાચક્રમુત્તમમ્ ॥ ૫॥

તિરોભાવો દ્વિધા ભિન્ન એકો રુદ્રાદિગોચરઃ ।
અન્યશ્ચ દેહભાવેન પશુવર્ગસ્ય સન્તતેઃ ॥ ૬॥

ભોગાનુરઞ્જનપરઃ કર્મસામ્યક્ષણાવધિ ।
કર્મસામ્યે સ એકઃ સ્યાદનુગ્રહમયો વિભુઃ ॥ ૭॥

તત્ર સર્વેશ્વરા યાસ્તે દેવતાઃ પરિકીર્તિતાઃ ।
પરબ્રહ્માત્મકાઃ સાક્ષાન્નિર્વિકલ્પા નિરામયાઃ ॥ ૮॥

તિરોભાવાત્મકં ચક્રં ભવેચ્છાન્તિકલામયમ્ ।
મહેશ્વરાધિષ્ઠિતં ચ પદમેતદનુત્તમમ્ ॥ ૯॥

એતદેવ પદં પ્રાપ્યં મહેશપદસેવિનામ્ ।
માહેશ્વરાણાં સાલોક્યક્રમાદેવ વિમુક્તિદમ્ ॥ ૬.૧૫.૧૦॥

મહેશ્વરસહસ્રાંશાદ્ રુદ્રમૂર્તિરજાયત ।
અઘોરવદનાકારસ્તેજસ્તત્ત્વાધિપશ્ચ સઃ ॥ ૧૧॥

ગૌરીશક્તિયુતો વામે સર્વસંહારકૃત્પ્રભુઃ ।
અસ્યૈવ વ્યષ્ટિરૂપં સ્યાચ્છિવાદ્યથ ચતુષ્ટયમ્ ॥ ૧૨॥

શિવો હરો મૃડભવૌ વિદિતં ચક્રમદ્ભુતમ્ ।
સંહારાખ્યં મહાદિવ્યં પરમં હિ મુનીશ્વર ॥ ૧૩॥

સ સંહારસ્ત્રિધા પ્રોક્તો બુધૈર્નિત્યાદિભેદતઃ ।
નિત્યો જીવસુષુપ્ત્યાખ્યો વિધેર્નૈમિત્તિકઃ સ્મૃતઃ ॥ ૧૪॥

વિલયસ્તસ્ય તુ મહાનિતિ વેદનિદર્શિતઃ ।
જીવાનાં જન્મદુઃખાદિશાન્તાનામુષિતાત્મનામ્ ॥ ૧૫॥

વિશ્રાન્ત્યર્થં મુનિશ્રેષ્ઠ કર્મણાં પાકહેતવે ।
સંહારઃ કલ્પિતસ્ત્રેધા રુદ્રેણામિતતેજસા ॥ ૧૬॥

રુદ્રસ્યૈવ તુ કૃત્યાનાં ત્રયમેતદુદાહૃતમ્ ।
સંહૃતવપિ સૃષ્ટ્યાદિકૃત્યાનાં પઞ્ચકં વિભોઃ ॥ ૧૭॥

મુને તત્ર ભવાદ્યાસ્તે દેવતાઃ પરિકીર્તિતાઃ ।
પરબ્રહ્મસ્વરૂપાશ્ચ લોકાનુગ્રહકારકાઃ ॥ ૧૮॥

સંહારાખ્યમિદં ચક્રં વિદ્યારૂપકલામયમ્ ।
અધિષ્ઠિતં ચ રુદ્રેણ પદમેતન્નિરામયમ્ ॥ ૧૯॥

એતદેવ પદં પ્રાપ્યં રુદ્રારાધનકાઙ્ક્ષિણામ્ ।
રુદ્રાણાં તદ્ધિ સાલોક્યક્રમાત્સાયુજ્યદં મુને ॥ ૬.૧૫.૨૦॥

રુદ્રમૂર્તેઃ સહસ્રાંશાદ્વિષ્ણોશ્ચૈવાભવજ્જનિઃ ।
સ વામદેવચક્રાત્મા વારિતત્ત્વૈકનાયકઃ ॥ ૨૧॥

રમાશક્તિયુતો વામે સર્વ્વરક્ષાકરો મહાન્ ।
ચતુર્ભુજોઽરવિન્દાક્ષઃ શ્યામઃ શઙ્ખાદિચિહ્નભૃત્ ॥ ૨૨॥

અસ્યૈવ વાસુદેવાદિચતુષ્કં વ્યષ્ટિતાં ગતમ્ ।
ઉપાસનરતાનાં વૈ વૈષ્ણવાનાં વિમુક્તિદમ્ ॥ ૨૩॥

વાસુદેવોઽનિરુદ્ધશ્ચ તતઃ સઙ્કર્ષણઃ પરઃ ।
પ્રદ્યુમ્નશ્ચેતિ વિખ્યાતં સ્થિતિચક્રમનુત્તમમ્ ॥ ૨૪॥

સ્થિતિઃ સૃષ્ટસ્ય જગતસ્તત્કર્ત્રા સહ પાલનમ્ ।
આરબ્ધકર્મભોગાન્તં જીવાનાં ફલભોગિનામ્ ॥ ૨૫॥

વિષ્ણોરેવેદમાખ્યાતં કૃત્યં રક્ષાવિધાયિનઃ ।
સ્થિતાવપિ તુ સૃષ્ટ્યાદિકૃત્યાનાં પઞ્ચકં વિભોઃ ॥ ૨૬॥

તત્ર પ્રદ્યુમ્નમુખ્યાસ્તે દેવતાઃ પરિકીર્તિતાઃ ।
નિર્વિકલ્પા નિરાતઙ્કા મુક્તાનન્દકરાઃ સદા ॥ ૨૭॥

સ્થિતિચક્રમિદં બ્રહ્મન્ પ્રતિષ્ઠારૂપમુત્તમમ્ ।
જનાર્દનાધિષ્ઠિતં ચ પરમં પદમુચ્યતે ॥ ૨૮॥

એવદેવ પદં પ્રાપ્યં વિષ્ણુપાદાબ્જસેવિનામ્ ।
વૈષ્ણવાનાં ચક્રમિદં સાલોક્યાદિપદપ્રદમ્ ॥ ૨૯॥

વિષ્ણોરેવ સહસ્રાંશાત્સમ્બભૂવ પિતામહઃ ।
સદ્યોજાતમુખાત્મા યઃ પૃથિવીતત્ત્વનાયકઃ ॥ ૬.૧૫.૩૦॥

વાગ્દેવીસહિતો વામે સૃષ્ટિકર્ત્તા જગત્પ્રભુઃ ।
ચતુર્મુખો રક્તવર્ણો રજોરૂપસ્વરૂપવાન્ ॥ ૩૧॥

હિણ્યગર્ભાદ્યસ્યૈવ વ્યષ્ટિરૂપં ચતુષ્ટયમ્ ।
હિરણ્યગર્ભોઽથ વિરાટ્ પુરુષઃ કાલ એવ ચ ॥ ૩૨॥

સૃષ્ટિચક્રમિદં બ્રહ્મ પુત્રાદિઋષિસેવિતમ્ ।
સર્વકામાર્થદં બ્રહ્મન્પરિવારસુખપ્રદમ્ ॥ ૩૩॥

સૃષ્ટિસ્તુ સંહૃતસ્યાસ્ય જીવસ્ય પ્રકૃતૌ બહિઃ ।
આનીય કર્મભોગાર્થં સાધનાઙ્ગફલૈસ્સહ ॥ ૩૪॥

સંયોજનમિતીદં તુ કૃત્યં પૈતામહં વિદુઃ ।
જગત્સૃષ્ટિક્રિયાવિજ્ઞા યાવદ્ વ્યૂહં સુખાવહમ્ ॥ ૩૫॥

જગત્સૃષ્ટાવપિ મુને કૃત્યાનાં ચ પઞ્ચકં વિભોઃ ।
અસ્તિ કાલોદયસ્તત્ર દેવતાઃ પરિકીર્તિતાઃ ॥ ૩૬॥

નિવૃત્તિરૂપમાખ્યાતં સૃષ્ટિચક્રમિદં બુધૈઃ ।
પિતામહાધિષ્ઠિતં ચ પદમેતદ્ધિ શોભનમ્ ॥ ૩૭॥

એતદેવ પ્રદં પ્રાપ્યં બ્રહ્માર્પિતધિયાં નૃણામ્ ।
પૈતામહાનામેતદ્ધિ સાલોક્યાદિવિમુક્તિદમ્ ॥ ૩૮॥

અસ્મિન્નપિ ચતુષ્કે તુ ચક્રાણાં પ્રણવો ભવેત્ ।
મહેશાદિક્રમાદેવ ગૌણ્યા વૃત્ત્યા સ વાચકઃ ॥ ૩૯॥

ઇદં ખલુ જગચ્ચક્રં શ્રુતિવિશ્રુતવૈભવમ્ ।

પઞ્ચારં ચક્રમિતિ હ સ્તૌતિ શ્રુતિરિદં મુને ॥ ૬.૧૫.૪૦॥

એકમેવ જગચ્ચક્રં શમ્ભોઃ શક્તિવિજૃમ્ભિતમ્ ।
સૃષ્ટ્યાદિપઞ્ચાવયવં પઞ્ચારમિતિ કથ્યતે ॥ ૪૧॥

અલાતચક્રભ્રમિવદવિચ્છિન્નલયોદયમ્ ।
પરિતો વર્તતે યસ્માત્તસ્માચ્ચક્રમિતીરિતમ્ ॥ ૪૨॥

સૃષ્ટ્યાદિપૃથુસૃષ્ટિત્વાત્પૃથુત્વેનોપદૃશ્યતે ।
હિરણ્મયસ્ય દેવસ્ય શમ્ભોરમિતતેજસઃ ॥ ૪૩॥

શક્તિકાર્યમિદં ચક્રં હિરણ્યજ્યોતિરાશ્રિતમ્ ।
સલિલેનાવૃતમિદં સલિલં વહ્નિનાવૃતમ્ ॥ ૪૪॥

આવૃતો વાયુના વહ્નિરાકાશેનાવૃતં મહત્ ।
ભૂતાદિના તથાકાશો ભૂતાદિર્મહતાવૃતઃ ॥ ૪૫॥

અવ્યક્તેનાવૃતસ્તદ્વન્મહાનિત્યેવમાસ્તિકૈઃ ।
બ્રહ્માણ્ડમિતિ સમ્પ્રોક્તમાચાર્યૈર્મુનિસત્તમ ॥ ૪૬॥

ઉક્તાનિ સપ્તાવરણાન્યસ્ય વિશ્વસ્ય ગુપ્તયે ।
ચક્રાદ્દશગુણાધિક્યં સલિલસ્ય વિધીયતે ॥ ૪૭॥

ઉપર્યુપરિ ચાન્યોઽન્યમેવં દશગુણાધિકમ્ ।
બ્રહ્માણ્ડમિતિ વિજ્ઞેયં તદ્ વિજ્ઞૈર્મુનિનાયક ॥ ૪૮॥

ઇમમર્થમુરીકૃત્ય ચક્રસામીપ્યવર્ત્તનાત્ ।
સલિલસ્ય ચ તન્મધ્યે ઇતિ પ્રાહ શ્રુતિઃ સ્વયમ્ ॥ ૪૯॥

અનુગ્રહતિરોભાવસંહૃતિસ્થિતિસૃષ્ટિભિઃ ।
કરોત્યવિરતં લીલામેકઃ શક્તિયુતઃ શિવઃ ॥ ૬.૧૫.૫૦॥

બહુનેહ કિમુક્તેન મુને સારં વદામિ તે ।
શિવ એવેદમખિલં શક્તિમાનિતિ નિશ્ચિતમ્ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયામુપાસનામૂર્ત્તિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૬.૧૫॥

૬।૧૬

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ॐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૧૬. ષોડશોઽધ્યાયઃ । શિવતત્ત્વવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રુત્વોપદિષ્ટં ગુરુણા વેદાર્થં મુનિપુઙ્ગવઃ ।
પરમાત્મનિ સન્દિગ્ધં પરિપપ્રચ્છ સાદરમ્ ॥ ૧॥

વામદેવ ઉવાચ ।
જ્ઞાનશક્તિધર સ્વામિન્પરમાનન્દવિગ્રહ ।
પ્રણવાર્થામૃતં પીતં શ્રીમુખાબ્જાત્પરિસ્રુતમ્ ॥ ૨॥

દૃઢપ્રજ્ઞશ્ચ જાતોઽસ્મિ સન્દેહો વિગતો મમ ।
કિઞ્ચિદન્યન્મહાસેન પૃચ્છામિ ત્વાં શ‌ૃણુ પ્રભો ॥ ૩॥

સદાશિવાદિકીટાન્તરૂપસ્ય જગતઃ સ્થિતિઃ ।
સ્ત્રીપુંરૂપેણ સર્વત્ર દૃશ્યતે ન હિ સંશયઃ ॥ ૪॥

એવં રૂપસ્ય જગતઃ કારણં યત્સનાતનમ્ ।
સ્ત્રીરૂપં તત્કિમાહોસ્વિત્પુરુષો વા નપુંસકમ્ ॥ ૫॥

ઉત મિશ્રં કિમન્યદ્વા ન જાતસ્તત્ર નિર્ણયઃ ।
બહુધા વિવદન્તીહ વિદ્વાંસઃ શાસ્ત્રમોહિતાઃ ॥ ૬॥

જગત્સૃષ્ટિવિધાયિન્યઃ શ્રુતયો જગતા સહ ।
વિષ્ણુબ્રહ્માદયો દેવાઃ સિદ્ધાશ્ચ ન વિદન્તિ હિ ॥ ૭॥

યથૈક્યભાવં ગચ્છેયુરેતદન્યચ્ચ વેદય ।
જાનામીતિ કરોમીતિ વ્યવહારઃ પ્રદૃશ્યતે ॥ ૮॥

સ હિ સર્વાત્મસંસિદ્ધો વિવાદો નાત્ર કસ્યચિત્ ।
સર્વદેહેન્દ્રિયમનોબુદ્ધ્યહઙ્કારસમ્ભવઃ ॥ ૯॥

આહોસ્વિદાત્મનો રૂપં મહાનત્રાપિ સંશયઃ ।
દ્વયમેતદ્ધિ સર્વેષાં વિવાદાસ્પદમદ્ભુતમ્ ॥ ૬।૧૬।૧૦॥

ઉત્પાટ્યાજ્ઞાનસમ્ભૂતં સંશયાખ્યં વિષદ્રુમમ્ ।
શિવાદ્વૈતમહાકલ્પવૃક્ષભૂમિર્યથા ભવેત્ ॥ ૧૧॥

ચિત્તં મમ યથા દેવ બોધ્યોઽસ્મિ કૃપયા તવ ।
કૃપાતસ્તવ દેવેશ દૃઢજ્ઞાની ભવામ્યહમ્ ॥ ૧૨॥

સૂત ઉવાચ ।
શ્રુત્વૈવં મુનિના પૃષ્ટં વચો વેદાન્તનિર્વૃતમ્ ।
રહસ્યં પ્રભુરાહેદં કિઞ્ચિત્પ્રહસિતાનનઃ ॥ ૧૩॥

સુબ્રહ્મણ્ય ઉવાચ ।
એતદેવ મુને ગુહ્યં શિવેન પરિભાષિતમ્ ।
અમ્બાયાઃ શૃણ્વતો દેવ્યા વામદેવ મમાપિ હિ ॥ ૧૪॥

તસ્યાઃ સ્તન્યં તદા પીત્વા સન્તૃપ્તોઽસ્મિ મુહુર્મુહુઃ ।
શ્રુતવાન્નિશ્ચલં તદ્ધૈ નિશ્ચિતં મે વિચારિતમ્ ॥ ૧૫॥

તત્તે વદામિ દયયા વામદેવ મહામુને ।
મહદ્ગુહ્યં ચ પરમં સુત ત્વં શૃણુ સામ્પ્રતમ્ ॥ ૧૬॥

કર્માસ્તિ તત્ત્વાદારભ્ય શાસ્ત્રવાદઃ સુવિસ્તરઃ ।
યથાવિવેકં શ્રોતવ્યો જ્ઞાનિના જ્ઞાનદો મુને ॥ ૧૭॥

ત્વયોપદિષ્ટા યે શિષ્યાસ્તત્ર કો વા ભવત્સમઃ ।
કપિલાદિષુ શાસ્ત્રેષુ ભ્રમન્ત્યદ્યાપિ તેઽધમાઃ ॥ ૧૮॥

તે શપ્તા મુનિભિઃ ષડ્ભિઃ શિવનિન્દાપરાઃ પુરા ।
ન શ્રોતવ્યા હિ તદ્વાર્ત્તા તેઽન્યથાવાદિનો યતઃ ॥ ૧૯॥

અનુમાનપ્રયોગસ્યાપ્યવકાશોઽત્રન વિદ્યતે ।
પઞ્ચાવયવયુક્તસ્ય સ તુ ધૂમસ્ય દર્શનાત્ ॥ ૬।૧૬।૨૦॥

પર્વતસ્યાગ્નિમદ્ભાવં વદન્ત્યત્રાપિ સુવ્રત ।
પ્રત્યક્ષસ્ય પ્રપઞ્ચસ્ય દર્શનાલમ્બનં ત્વતઃ ॥ ૨૧॥

જ્ઞાતવ્યઃ પરમેશાનઃ પરમાત્મા ન સંશયઃ ।
સ્ત્રીપુંરૂપમયં વિશ્વં પ્રત્યક્ષેણૈવ દૃશ્યતે ॥ ૨૨॥

ષટ્કોશરૂપઃ પિણ્ડો હિ તત્ર ચાદ્યત્રયં ભવેત્ ।
માત્રંશજં પુનશ્ચાન્યત્પિત્રંશજમિતિ શ્રુતિઃ ॥ ૨૩॥

એવં સર્વશરીરેષુ સ્ત્રીપુમ્ભાવવિદો જનાઃ ।
પરમાત્મન્યપિ મુને સ્ત્રીપુમ્ભાવં વિદુર્બુધાઃ ॥ ૨૪॥

સચ્ચિદાનદરૂપત્વં વદતિ બ્રહ્મણઃ શ્રુતિઃ ।
અસન્નિવર્તકઃ શબ્દઃ સદાત્મેતિ નિગદ્યતે ॥ ૨૫॥

નિવર્તનં જડત્વસ્ય ચિચ્છબ્દેન વિધીયતે ।
ત્રિલિઙ્ગવર્તી સચ્છબ્દઃ પુરુષોઽત્ર વિધીયતામ્ ॥ ૨૬॥

પ્રકાશવાચી સ ભવેત્સત્પ્રકાશ ઇતિ સ્ફુટમ્ ।
જ્ઞાનશબ્દસ્ય પર્યાયશ્ચિચ્છબ્દઃ સ્ત્રીત્વમાગતઃ ॥ ૨૭॥

પ્રકાશશ્ચિચ્ચ મિથુનં જગત્કારણતાં ગતમ્ ।
સચ્ચિદાત્મન્યપિ તથા જગત્કારણતાં ગતે ॥ ૨૮॥

એકત્રૈવ શિવઃ શક્તિરિતિ ભાવો વિધીયતે ।
તૈલવર્ત્યાદિમાલિન્યાત્પ્રકાશસ્યાપિ વર્તતે ॥ ૨૯॥

માલિન્યમશિવત્વં ચ ચિતાગ્ન્યાદિષુ દૃશ્યતે ।
એવં નિવર્તકત્વેન શિવત્વં શ્રુતિચોદિતમ્ ॥ ૬।૧૬।૩૦॥

જીવાશ્રિતાયાશ્ચિચ્છક્તેર્દૌર્બલ્યં વિદ્યતે સદા ।
તન્નિવૃત્ત્યર્થમેવાત્ર શક્તિત્વં સાર્વકાલિકમ્ ॥ ૩૧॥

બલવાન્ શક્તિમાંશ્ચેતિ વ્યવહારઃ પ્રદૃશ્યતે ।
લોકે વેદે ચ સતતં વામદેવ મહામુને ॥ ૩૨॥

એવં શિવત્વં શક્તિત્વં પરમાત્મનિ દર્શિતમ્ ।
શિવશક્ત્યોસ્તુ સંયોગાદાનન્દઃ સતતોદિતઃ ॥ ૩૩॥

અતો મુને તમુદ્દિશ્ય મુનયઃ ક્ષીણકલ્મષાઃ ।
શિવે મનઃ સમાધાય પ્રાપ્તાઃ શિવમનામયમ્ ॥ ૩૪॥

સર્વાત્મત્વં તયોરેવં બ્રહ્મેત્યુપનિષત્સુ ચ ।
ગીયતે બ્રહ્મશબ્દેન બૃંહિધાત્વર્થગોચરમ્ ॥ ૩૫॥

બૃંહણત્વં બૃહત્વં ચ શમ્ભ્વાખ્યવિગ્રહે ।
પઞ્ચબ્રહ્મમયે વિશ્વપ્રતીતિર્બ્રહ્મશબ્દિતા ॥ ૩૬॥

પ્રતિલોમાત્મકં હંસે વક્ષ્યામિ પ્રણવોદ્ભવમ્ ।
તવ સ્નેહાદ્વામદેવ સાવધાનતયા શ‌ૃણુ ॥ ૩૭॥

વ્યઞ્જનસ્ય સકારસ્ય હકારસ્ય ચ વર્જનાત્ ।
ઓમિત્યેવ ભવેત્સ્થૂલો વાચકઃ પરમાત્મનઃ ॥ ૩૮॥

મહામન્ત્રઃ સ વિજ્ઞેયો મુનિભિસ્તત્ત્વદર્શિભિઃ ।
તત્ર સૂક્ષ્મો મહામન્ત્રસ્તદુદ્ધારં વદામિ તે ॥ ૩૯॥

આદ્યે ત્રિપઞ્ચરૂપે ચ સ્વરે ષોડશકે ત્રિષુ ।
મહામન્ત્રો ભવેદાદૌ સસકારો ભવેદ્યદા ॥ ૬।૧૬।૪૦॥

હંસસ્ય પ્રતિલોમઃ સ્યાત્સકારાર્થઃ શિવઃ સ્મૃતઃ ।
શક્ત્યાત્મકો મહામન્ત્રવાચ્યઃ સ્યાદિતિ નિર્ણયઃ ॥ ૪૧॥

ગુરૂપદેશકાલે તુ સોઽહંશક્ત્યાત્મકઃ શિવઃ ।
ઇતિ જીવપરો ભૂયાન્મહામન્ત્રસ્તદા પશુઃ ॥ ૪૨॥

શક્ત્યાત્મકઃ શિવાંશશ્ચ શિવૈક્યાચ્છિવસામ્યભાક્ ।
પ્રજ્ઞાનં બ્રહ્મવાક્યે તુ પ્રજ્ઞાનાર્થઃ પ્રદૃશ્યતે ॥ ૪૩॥

પ્રજ્ઞાનશબ્દશ્ચૈતન્યપર્યાયઃ સ્યાન્ન સંશયઃ ।
ચૈતન્યમાત્મેતિ મુને શિવસૂત્રં પ્રવર્તિતમ્ ॥ ૪૪॥

ચૈતન્યમિતિ વિશ્વસ્ય સર્વજ્ઞાનક્રિયાત્મકમ્ ।
સ્વાતન્ત્ર્યં તત્સ્વભાવો યઃ સ આત્મા પરિકીર્તિતઃ ॥ ૪૫॥

ઇત્યાદિશિવસૂત્રાણાં વાર્તિકં કથિતં મયા ।
જ્ઞાનં બન્ધ ઇતીદં તુ દ્વિતીયં સૂત્રમીશિતુઃ ॥ ૪૬॥

જ્ઞાનમિત્યાત્મનસ્તસ્ય કિઞ્ચિજ્જ્ઞાનક્રિયાત્મકમ્ ।
ઇત્યાહાદ્યપદેનેશઃ પશુવર્ગસ્ય લક્ષણમ્ ॥ ૪૭॥

એતદ્ દ્વયં પરાશક્તેઃ પ્રથમં સ્પન્દતાં ગતમ્ ।
એતામેવ પરાં શક્તિં શ્વેતાશ્વતરશાખિનઃ ॥ ૪૮॥

સ્વાભાવિકી જ્ઞાનબલક્રિયા ચેત્યસ્તુવન્મુદા ।
જ્ઞાનક્રિયેચ્છારૂપં હિ શમ્ભોર્દૃષ્ટિત્રયં વિદુઃ ॥ ૪૯॥

એતન્મનોમધ્યગં સદિન્દ્રિયજ્ઞાનગોચરમ્ ।
અનુપ્રવિશ્ય જાનાતિ કરોતિ ચ પશુઃ સદા ॥ ૬।૧૬।૫૦॥

તસ્માદાત્મન એવેદં રૂપમિત્યેવ નિશ્ચિતમ્ ।
પ્રપઞ્ચાર્થં પ્રવક્ષ્યામિ પ્રણવૈક્યપ્રદર્શનમ્ ॥ ૫૧॥

ઓમિતીદં સર્વમિતિ શ્રુતિરાહ સનાતની ।

તસ્માદ્વેતીત્યુપક્રમ્ય જગત્સૃષ્ટિઃ પ્રકીર્તિતા ॥ ૫૨॥

તસ્યાઃ શ્રુતેસ્તુ તાત્પર્યં વક્ષ્યામિ શ્રૂયતામિદમ્ ।
તવ સ્નેહાદ્વામદેવ વિવેકાર્થવિજૃમ્ભિતમ્ ॥ ૫૩॥

શિવશક્તિસમાયોગઃ પરમાત્મેતિ નિશ્ચિતમ્ ।
પરાશક્તેસ્તુ સઞ્જાતા ચિચ્છક્તિસ્તુ તદુદ્ભવા ॥ ૫૪॥

આનન્દશક્તિસ્તજ્જા સ્યાદિચ્છાશક્તિસ્તદુદ્ભવા ।
જ્ઞાનશક્તિસ્તતો જાતા ક્રિયાશક્તિસ્તુ પઞ્ચમી ।
એતાભ્ય એવ સઞ્જાતા નિવૃત્ત્યાદ્યાઃ કલા મુને ॥ ૫૫॥

ચિદાનન્દસમુત્પન્નૌ નાદબિન્દૂ પ્રકીર્તિતૌ ।
ઇચ્છાશક્તેર્મકારસ્તુ જ્ઞાનશક્તેસ્તુ પઞ્ચમઃ ॥ ૫૬॥

સ્વરઃ ક્રિયાશક્તિજાતો હ્યકારસ્તુ મુનીશ્વર ।
ઇત્યુક્તા પ્રણવોત્પત્તિઃ પઞ્ચબ્રહ્મોદ્ભવં શ‌ૃણુ ॥ ૫૭॥

શિવાદીશાન ઉત્પન્નસ્તતસ્તત્પુરુષોદ્ભવઃ ।
તતોઽઘોરસ્તતો વામઃ સદ્યોજાતોદ્ભવસ્તતઃ ॥ ૫૮॥

એતસ્માન્માતૃકાદષ્ટત્રિંશન્માતૃસમુદ્ભવઃ ।
ઈશાનાચ્છાન્ત્યતીતાખ્યા કલા જાતાથ પૂરુષાત્ ।
ઉત્પદ્યતે શાન્તિકલા વિદ્યાઘોરસમુદ્ભવા ॥ ૫૯॥

પ્રતિષ્ઠા ચ નિવૃત્તિશ્ચ વામસદ્યોદ્ભવે મતે ।
ઈશાચ્ચિચ્છક્તિમુખતો વિભોર્મિથુનપઞ્ચકમ્ ॥ ૬।૧૬।૬૦॥

અનુગ્રહાદિકૃત્યાનાં હેતુઃ પઞ્ચકમિષ્યતે ।
તદ્વિદ્ભિર્મુનિભિઃ પ્રાજ્ઞૈર્વરતત્ત્વપ્રદર્શિભિઃ ॥ ૬૧॥

વાચ્યવાચકસમ્બન્ધાન્મિથુનત્વમુપેયુષિ ।
કલાવર્ણસ્વરૂપેઽસ્મિન્પઞ્ચકે ભૂતપઞ્ચકમ્ ॥ ૬૨॥

વિયદાદિક્રમાદાસીદુત્પન્નં મુનિપુઙ્ગવ ।
આદ્યં મિથુનમારભ્ય પઞ્ચમં યન્મયં વિદુઃ ॥ ૬૩॥

શબ્દૈકગુણ આકાશઃ શબ્દસ્પર્શગુણો મરુત્ ।
શબ્દસ્પર્શરૂપગુણપ્રધાનો વહ્નિરુચ્યતે ॥ ૬૪॥

શબ્દસ્પર્શરૂપરસગુણકં સલિલં સ્મૃતમ્ ।

શબ્દસ્પર્શરૂપરસગન્ધાઢ્યા પૃથિવી સ્મૃતા ॥ ૬૫॥

વ્યાપકત્વઞ્ચ ભૂતાનામિદમેવ પ્રકીર્તિતમ્ ।
વ્યાપ્યત્વં વૈપરીત્યેન ગન્ધાદિક્રમતો ભવેત્ ॥ ૬૬॥

ભૂતપઞ્ચકરૂપોઽયં પ્રપઞ્ચઃ પરિકીર્ત્યતે ।
વિરાટ્ સર્વસમષ્ટ્યાત્મા બ્રહ્માણ્ડમિતિ ચ સ્ફુટમ્ ॥ ૬૭॥

પૃથિવીતત્ત્વમારભ્ય શિવતત્ત્વાવધિં ક્રમાત્ ।
નિલીય તત્ત્વસન્દોહે જીવ એવ વિલીયતે ॥ ૬૮॥

સંશક્તિકઃ પુનઃ સૃષ્ટૌ શક્તિદ્વારા વિનિર્ગતઃ ।
સ્થૂલપ્રપઞ્ચરૂપેણ તિષ્ઠત્યાપ્રલયં સુખમ્ ॥ ૬૯॥

નિજેચ્છયા જગત્સૃષ્ટમુદ્યુક્તસ્ય મહેશિતુઃ ।
પ્રથમો યઃ પરિસ્પન્દઃ શિવતત્ત્વં તદુચ્યતે ॥ ૬।૧૬।૭૦॥

એષૈવેચ્છા શક્તિતત્ત્વં સર્વકૃત્યાનુવર્તનાત્ ।
જ્ઞાનક્રિયાશક્તિયુગ્મે જ્ઞાનાધિક્યે સદાશિવઃ ॥ ૭૧॥

મહેશ્વરં ક્રિયોદ્રેકે તત્ત્વં વિદ્ધિ મુનીશ્વર ।
જ્ઞાનક્રિયાશક્તિસામ્યં શુદ્ધં વિદ્યાત્મકં મતમ્ ॥ ૭૨॥

સ્વાઙ્ગરૂપેષુ ભાવેષુ માયાતત્ત્વવિભેદધીઃ ।
શિવો યદા નિજં રૂપં પરમૈશ્વર્યપૂર્વકમ્ ॥ ૭૩॥

નિગૃહ્ય માયયાઽશેષપદાર્થગ્રાહકો ભવેત્ ।
તદા પુરુષ ઇત્યાખ્યા તત્સૃષ્ટ્વેત્યભવચ્છ્રુતિઃ ॥ ૭૪॥

અયમેવ હિ સંસારી માયયા મોહિતઃ પશુઃ ।
શિવજ્ઞાનવિહીનો હિ નાનાકર્મવિમૂઢધીઃ ॥ ૭૫॥

શિવાદભિન્નં ન જગદાત્માનં ભિન્નમિત્યપિ ।
જાનતોઽસ્ય પશોરેવ મોહો ભવતિ ન પ્રભો ॥ ૭૬॥

યથૈન્દ્રજાલિકસ્યાપિ યોગિનો ન ભવેદ્ ભ્રમઃ ।
ગુરુણા જ્ઞાપિતૈશ્વર્યઃ શિવો ભવતિ ચિદ્ઘનઃ ॥ ૭૭॥

સર્વકર્તૃત્વરૂપા ચ સર્વજ્ઞત્વસ્વરૂપિણી ।
પૂર્ણત્વરૂપા નિત્યત્વવ્યાપકત્વસ્વરૂપિણી ॥ ૭૮॥

શિવસ્ય શક્તયઃ પઞ્ચ સઙ્કુચદ્રૂપભાસ્કરાઃ ॥ ૭૯॥

અપિ સઙ્કોચરૂપેણ વિભાન્ત્ય ઇતિ નિત્યશઃ ।
પશોઃ કલાખ્યવિદ્યેતિ રાગકાલૌ નિયત્યપિ ।
તત્ત્વપઞ્ચકરૂપેણ ભવત્યત્ર કલેતિ સા ॥ ૬।૧૬।૮૦॥

કિઞ્ચિત્કર્તૃત્વહેતુઃ સ્યાત્ કિઞ્ચિત્તત્ત્વૈકસાધનમ્ ।
સા તુ વિદ્યા ભવેદ્રાગો વિષયેષ્વનુરઞ્જકઃ ॥ ૮૧॥

કાલો હિ ભાવભાવાનાં ભાસાનાં ભાસનાત્મકઃ ।
ક્રમાવચ્છેદકો ભૂત્વા ભૂતાદિરિતિ કથ્યતે ॥ ૮૨॥

ઇદં તુ મમ કર્તવ્યમિદં નેતિ નિયામિકા ।
નિયતિઃ સ્યાદ્વિભોઃ શક્તિસ્તદાક્ષેપાત્પતેત્ પશુઃ ॥ ૮૩॥

એતત્પઞ્ચકમેવાસ્ય સ્વરૂપાવારકત્વતઃ ।
પઞ્ચકઞ્ચુકમાખ્યાતમન્તરઙ્ગં ચ સાધનમ્ ॥ ૮૪॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં શિવતત્ત્વવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૬.૧૬॥

૬।૧૭
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૧૭. સપ્તદશોઽધ્યાયઃ । શિવાદ્વૈતજ્ઞાનકથનાદિ સૃષ્ટિકથનમ્ ।

વામદેવ ઉવાચ ।
નિયત્યધસ્તાત્પ્રકૃતેરુપરિસ્થઃ પુમાનિતિ ।
પૂર્વત્ર ભવતા પ્રોક્તમિદાનીં કથમન્યથા ॥ ૧॥

માયયા સઙ્કુચદ્રૂપસ્તદાધસ્તાદિતિ પ્રભો ।
ઇતિ મે સંશયં નાથ છેત્તુમર્હસિ તત્ત્વતઃ ॥ ૨॥

શ્રીસુબ્રહ્મણ્ય ઉવાચ ।
અદ્વૈતશૈવવાદોઽયં દ્વૈતં ન સહતે ક્વચિત્ ।

દ્વૈતં ચ નશ્વરં બ્રહ્માદ્વૈતં પરમનશ્વરમ્ ॥ ૩॥

સર્વજ્ઞઃ સર્વકર્તા ચ શિવઃ સર્વેશ્વરોઽગુણઃ ।
ત્રિદેવજનકો બ્રહ્મા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૪॥

સ એવ શઙ્કરો દેવઃ સ્વેચ્છયા ચ સ્વમાયયા ।
સઙ્કુચદ્રૂપ ઇવ સન્પુરુષઃ સમ્બભૂવ હ ॥ ૫॥

કલાદિપઞ્ચકેનૈવ ભોક્તૃત્વેન પ્રકલ્પિતઃ ।
પ્રકૃતિસ્થઃ પુમાનેષ ભુઙ્ક્તે પ્રકૃતિજાન્ગુણાન્ ॥ ૬॥

ઇતિ સ્થાનદ્વયાન્તઃસ્થઃ પુરુષો ન વિરોધકઃ ।
સઙ્કુચન્નિજરૂપાણાં જ્ઞાનાદીનાં સમષ્ટિમાન્ ॥ ૭॥

સત્ત્વાદિગુણસાધ્યં ચ બુદ્ધ્યાદિ ત્રિતયાત્મકમ્ ।
ચિત્તમ્પ્રકૃતિતત્ત્વં તદાસીત્સત્ત્વાદિકારણાત્ ॥ ૮॥

સાત્ત્વિકાદિવિભેદેન ગુણાઃ પ્રકૃતિસમ્ભવાઃ ।
ગુણેભ્યો બુદ્ધિરુત્પન્ના વસ્તુનિશ્ચયકારિણી ॥ ૯॥

તતો મહાનહઙ્કારસ્તતો બુદ્ધીન્દ્રિયાણિ ચ ।
જાતાનિ મનસો રૂપં સ્યાત્સઙ્કલ્પવિકલ્પકમ્ ॥ ૬।૧૭।૧૦॥

બુદ્ધીન્દ્રિયાણિ શ્રોત્રત્વક્ ચક્ષુર્જિહ્વા ચ નાસિકા ।
શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધશ્ચ ગોચરઃ ॥ ૧૧॥

બુદ્ધીન્દ્રિયાણાં કથિતઃ શ્રોત્રાદિક્રમતસ્તતઃ ।
વૈકારિકાદહઙ્કારાત્તન્માત્રાણ્યભવન્ક્રમાત્ ॥ ૧૨॥

તાનિ પ્રોક્તાનિ સૂક્ષ્માણિ મુનિભિસ્તત્ત્વદર્શિભિઃ ।
કર્મેન્દ્રિયાણિ જ્ઞેયાનિ સ્વકાર્યસહિતાનિ ચ ॥ ૧૩॥

વિપ્રર્ષે વાક્કરૌ પાદૌ પાયૂપસ્થૌ ચ તત્ક્રિયાઃ ।
વચનાદાનગમનવિસર્ગાનન્દસંજ્ઞિતાઃ ॥ ૧૪॥

ભૂતાદિકાદહઙ્કારાત્તન્માત્રાણ્યભવન્ક્રમાત્ ।
તાનિ સૂક્ષ્માણિ રૂપાણી શબ્દાદીનામિતિ સ્થિતિઃ ॥ ૧૫॥

તેભ્યશ્ચાકાશવાય્વગ્નિજલભૂમિજનિઃ ક્રમાત્ ।
વિજ્ઞેયા મુનિશાર્દૂલ પઞ્ચભૂતમિતીષ્યતે ॥ ૧૬॥

અવકાશપ્રદાનં ચ વાહકત્વં ચ પાચનમ્ ।
સંરમ્ભો ધારણં તેષાં વ્યાપારાઃ પરિકીર્તિતાઃ ॥ ૧૭॥

વામદેવ ઉવાચ ।
ભૂતસૃષ્ટિઃ પુરા પ્રોક્તા કલાદિભ્યઃ કથં પુનઃ ।
અન્યથા પ્રોચ્યતે સ્કન્દ સન્દેહોઽત્ર મહાન્મમ ॥ ૧૮॥

આત્મતત્ત્વમકારઃ સ્યાદ્વિદ્યા સ્યાદુસ્તતઃ પરમ્ ।
શિવતત્ત્વં મકારઃ સ્યાદ્વામદેવેતિ ચિન્ત્યતામ્ ॥ ૧૯॥

બિન્દુનાદૌ તુ વિજ્ઞેયૌ સર્વતત્ત્વાર્થકાવુભૌ ।
તત્રત્યા દેવતા યાશ્ચ તા મુને શ‍ૃણુ સામ્પ્રતમ્ ॥ ૬।૧૭।૨૦॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ મહેશ્વરસદાશિવૌ ।
તે હિ સાક્ષાચ્છિવસ્યૈવ મૂર્તયઃ શ્રુતિવિશ્રુતાઃ ॥ ૨૧॥

ઇત્યુક્તં ભવતા પૂર્વમિદાનીમુચ્યતેઽન્યથા ।
તન્માત્રેભ્યો ભવન્તીતિ સન્દેહોઽત્ર મહાન્મમ ॥ ૨૨॥

કૃત્વા તત્કરુણાં સ્કન્દ સંશયં છેત્તુમર્હસિ ।
ઇત્યાકર્ણ્ય મુનેર્વાક્યં કુમારઃ પ્રત્યભાષત ॥ ૨૩॥

શ્રીસુબ્રહ્મણ્ય ઉવાચ ।
તસ્માદ્વેતિ સમારભ્ય ભૂતસૃષ્ટિક્રમે મુને ।
તાઞ્છૃણુષ્વ મહાપ્રાજ્ઞ સાવધાનતયાદરાત્ ॥ ૨૪॥

જાતાનિ પઞ્ચ ભૂતાનિ કલાભ્ય ઇતિ નિશ્ચિતમ્ ।
સ્થૂલપ્રપઞ્ચરૂપાણિ તાનિ ભૂતપતેર્વપુઃ ॥ ૨૫॥

શિવતત્ત્વાદિપૃથ્વ્યન્તં તત્ત્વાનામુદયક્રમે ।
તન્માત્રેભ્યો ભવન્તીતિ વક્તવ્યાનિ ક્રમાન્મુને ॥ ૨૬॥

તન્માત્રાણાં કલાનામપ્યૈક્યં સ્યાદ્ ભૂતકારણમ્ ।
અવિરુદ્ધત્વમેવાત્ર વિદ્ધિ બ્રહ્માવિદાં વર ॥ ૨૭॥

સ્થૂલસૂક્ષ્માત્મકે વિશ્વે ચન્દ્રસૂર્યાદયો ગ્રહાઃ ।
સનક્ષત્રાશ્ચ સઞ્જાતાસ્તથાન્યે જ્યોતિષાં ગણાઃ ॥ ૨૮॥

બ્રહ્મવિષ્ણુમહેશાદિદેવતા ભૂતજાતયઃ ।
ઇન્દ્રાદયોઽપિ દિક્પાલા દેવાશ્ચ પિતરોઽસુરાઃ ॥ ૨૯॥

રાક્ષસા માનુષાશ્ચાન્યે જઙ્ગમત્વવિભાગિનઃ ।
પશવઃ પક્ષિણઃ કીટાઃ પન્નગાદિપ્રભેદિનઃ ॥ ૬।૧૭।૩૦॥

તરુગુલ્મલતૌષધ્યઃ પર્વતાશ્ચાષ્ટ વિશ્રુતાઃ ।
ગઙ્ગાદ્યાઃ સરિતઃ સપ્ત સાગરાશ્ચ મહર્દ્ધયઃ ॥ ૩૧॥

યત્કિઞ્ચિદ્વસ્તુજાતં તત્સર્વમત્ર પ્રતિષ્ઠિતમ્ ।
વિચારણીયં સદ્બુધ્યા ન બહિર્મુનિસત્તમ ॥ ૩૨॥

સ્ત્રીપુંરૂપમિદં વિશ્વં શિવશક્ત્યાત્મકં બુધૈઃ ।
ભવાદૃશૈરુપાસ્યં સ્યાચ્છિવજ્ઞાનવિશારદૈઃ ॥ ૩૩॥

સર્વં બ્રહ્મેત્યુપાસીત સર્વં વૈ રુદ્ર ઇત્યપિ ।
શ્રુતિરાહ મુને તસ્માત્પ્રપઞ્ચાત્મા સદાશિવઃ ॥ ૩૪॥

અષ્ટત્રિંશત્કલાન્યાસસામર્થ્યાદ્ દ્વૈતભાવનાત્ ।
સદાશિવોઽહમેવેતિ ભાવિતાત્મા ગુરુઃ શિવઃ ॥ ૩૫॥

એવંવિચારી સચ્છિષ્યો ગુરુઃ સ્યાત્સ શિવઃ સ્વયમ્ ।
પ્રપઞ્ચદેવતાયન્ત્રમન્ત્રાત્મા ન હિ સંશયઃ ॥ ૩૬॥

આચાર્યકૃપયા વિપ્ર સઞ્છિન્નાખિલબન્ધનઃ ।
શિષ્યઃ શિવપદાસક્તો ગુર્વાત્મા ભવતિ ધ્રુવમ્ ॥ ૩૭॥

યદસ્તિ વસ્તુ તત્સર્વં ગુણપ્રાધાન્યયોગતઃ ।
સમસ્તં વ્યસ્તમપિ ચ પ્રણવાર્થં પ્રચક્ષતે ॥ ૩૮॥

રાગાદિદોષરહિતં વેદસારઃ શિવોદિતમ્ ।
તુભ્યં મે કથિતં પ્રીત્યાદ્વૈતજ્ઞાનં શિવપ્રિયમ્ ॥ ૩૯॥

યો હ્યન્યથૈતન્મનુતે મદ્વચો મદગર્વિતઃ ।
દેવો વા દાનવઃ સિદ્ધો ગન્ધર્વો મનુજોઽપિ વા ॥ ૬।૧૭।૪૦॥

દુરાત્મનસ્તસ્ય શિરઃ છિન્દ્યસમતયા ધ્રુવમ્ ।
સચ્છક્ત્યા રિપુકાલાગ્નિકલ્પયા ન હિ સંશયઃ ॥ ૪૧॥

ભવાનેવ મુને સાક્ષાચ્છિવાદ્વૈતવિદાં વરઃ ।
શિવજ્ઞાનોપદેશે હિ શિવાચારપ્રદર્શકઃ ॥ ૪૨॥

યદ્દેહભસ્મસમ્પર્કાત્સઞ્છિન્નાઘવ્રજોઽશુચિઃ ।
મહાપિશાચઃ સમ્પ્રાપ ત્વત્કૃપાતઃ સતાં ગતિમ્ ॥ ૪૩॥

શિવયોગીતિ સઙ્ખ્યાતત્રિલોકવિભવો ભવાન્ ।
ભવત્કટાક્ષસમ્પર્કાત્પશુઃ પશુપતિર્ભવેત્ ॥ ૪૪॥

તવ તસ્ય મયિ પૃચ્છા લોકાશિક્ષાર્થમાદરાત્ ।
લોકોપકારકરણે વિચરન્તીહ સાધવઃ ॥ ૪૫॥

ઇદં રહસ્યં પરમં પ્રતિષ્ઠિતમતસ્ત્વયિ ।
ત્વમપિ શ્રદ્ધયા ભક્ત્યા પ્રણવેષ્વેવ સાદરમ્ ॥ ૪૬॥

ઉપવિશ્ય ચ તાન્સર્વાન્સંયોજ્ય પરમેશ્વરે ।
શિવાચારં ગ્રાહયસ્વ ભૂતિરુદ્રાક્ષમિશ્રિતમ્ ॥ ૪૭॥

ત્વં શિવો હિ શિવાચારી સમ્પ્રાપ્તાદ્વૈતભાવતઃ ।
વિચરઁલ્લોકરક્ષાયૈ સુખમક્ષયમાપ્નુહિ ॥ ૪૮॥

સૂત ઉવાચ ।
શ્રુત્વેદમદ્ભુતમતં હિ ષડાનનોક્તં
વેદાન્તનિષ્ઠિતમૃષિસ્તુ વિનમ્રમૂર્તિઃ ।
ભૂત્વા પ્રણમ્ય બહુશો ભુવિ દણ્ડવત્ત-
ત્પાદારવિન્દવિહરન્મધુપત્વમાપ ॥ ૪૯॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં શિવાદ્વૈતજ્ઞાનકથનાદિ સૃષ્ટિકથનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૬.૧૭॥

૬।૧૮
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૧૮. અષ્ટાદશોઽધ્યાયઃ । સંન્યાસપદ્ધતૌ શિષ્યકરણવિધિઃ ।

શૌનક ઉવાચ ।
શ્રુત્વા વેદાન્તસારં તદ્રહસ્યં પરમાદ્ભુતમ્ ।
કિં પૃષ્ટવાન્ વામદેવો મહેશ્વરસુતં તદા ॥ ૧॥

ધન્યો યોગી વામદેવઃ શિવજ્ઞાનરતઃ સદા ।
યત્સમ્બન્ધાત્કથોત્પન્ના દિવ્યા પરમપાવની ॥ ૨॥

ઇતિ શ્રુત્વા મુનીનાં તદ્વચનં પ્રેમગર્ભિતમ્ ।
સૂતઃ પ્રાહ પ્રસન્નસ્તાન્ શિવાસક્તમના બુધઃ ॥ ૩॥

સૂત ઉવાચ ।
ધન્યા યૂયં મહાદેવભક્તા લોકોપકારકાઃ ।
શ઼ૃણુધ્વં મુનયઃ સર્વે સંવાદં ચ તયોઃ પુનઃ ॥ ૪॥

શ્રુત્વા મહેશતનયવચનં દ્વૈતનાશકમ્ ।
અદ્વૈતજ્ઞાનજનકં સન્તુષ્ટોઽભૂન્મહાન્મુનિઃ ॥ ૫॥

નત્વા સ્તુત્વા ચ વિવિધં કાર્તિકેયં શિવાત્મજમ્ ।
પુનઃ પપ્રચ્છ તત્ત્વં હિ વિનયેન મહામુનિઃ ॥ ૬॥

વામદેવ ઉવાચ ।
ભગવન્સર્વતત્ત્વજ્ઞ ષણ્મુખામૃતવારિધે ।
ગુરુત્વં કથમેતેષાં યતીનાં ભાવિતાત્મનામ્ ॥ ૭॥

જીવાનાં ભોગમોક્ષાદિસિદ્ધિઃ સિધ્યતિ યદ્વશાત્ ।
પારમ્પર્યં વિના નૈષામુપદેશાધિકારિતા ॥ ૮॥

એવં ચ ક્ષૌરકર્માઙ્ગં સ્નાનં ચ કથમીદૃશમ્ ।
ઇતિ વિજ્ઞાપય સ્વામિન્ સંશયં છેત્તુમર્હસિ ॥ ૯॥

ઇતિ શ્રુત્વા કાર્તિકેયો વામદેવવચઃ સ્મરન્ ।
શિવં શિવાં ચ મનસા વ્યાચષ્ટુમુપચક્રમે ॥ ૬।૧૮।૧૦॥

શ્રીસુબ્રહ્મણ્ય ઉવાચ ।
યોગપટ્ટં પ્રવક્ષ્યામિ ગુરુત્વં યેન જાયતે ।
તવ સ્નેહાદ્વામદેવ મહદ્ગોપ્યં વિમુક્તિદમ્ ॥ ૧૧॥

વૈશાખે શ્રાવણે માસિ તથાશ્વયુજિ કાર્તિકે ।
માર્ગશીર્ષે ચ માઘે વા શુક્લપક્ષે શુભે દિને ॥ ૧૨॥

પઞ્ચમ્યાં પૌર્ણમાસ્યાં વા કૃતપ્રાભાતિકક્રિયઃ ।
લબ્ધાનુજ્ઞસ્તુ ગુરુણા સ્નાત્વા નિયતમાનસઃ ॥ ૧૩॥

પર્યઙ્કશૌચં કૃત્વા તદ્વાસસાઙ્ગં પ્રમૃજ્ય ચ ।
દ્વિગુણં દોરમાબધ્ય વાસસી પરિધાય ચ ॥ ૧૪॥

ક્ષાલિતાઙ્ઘ્રિર્દ્વિરાચમ્ય ભસ્મ સદ્યાદિમન્ત્રતઃ ।
ધારયેદ્ધિ સમાદાય સમુદ્ધૂલનમાર્ગતઃ ॥ ૧૫॥

ગૃહીતહસ્તો ગુરુણા સાનુકૂલેન વૈ મુને ।
સ શિષ્યઃ સાઞ્જલિઃ સ્વાભ્યાં હસ્તાભ્યાં પ્રાઙ્મુખો યથા ॥ ૧૬॥

તથોપવેષ્ટિતસ્તિષ્ઠેન્મણ્ડપે સમલઙ્કૃતે ।
ગુર્વાસનવરે શુદ્ધે ચૈલાજિનકુશોત્તરે ॥ ૧૭॥

અથ દેશિક આદાય શઙ્ખં સાધારમસ્ત્રતઃ ।
વિશોધ્ય તસ્ય પુરતઃ સ્થાપયેત્સાનુકૂલતઃ ॥ ૧૮॥

સાધારં શઙ્ખમપિ ચ સમ્પૂજ્ય કુસુમાદિભિઃ ।
નિઃક્ષિપેદસ્ત્રવર્મભ્યાં શોધિતં તત્ર સજ્જલમ્ ॥ ૧૯॥

આપૂર્ય પૂર્વવત્પૂજ્ય ષડઙ્ગોક્તક્રમેણ ચ ।
પ્રણવેન પુનસ્તદ્વૈ સપ્તધૈવાભિમન્ત્રયેત્ ॥ ૨૦॥

અભ્યર્ચ્ય ગન્ધપુષ્પાદ્યૈર્ધૂપદીપૌ પ્રદર્શ્ય ચ ।
સંરક્ષ્યાસ્ત્રેણ તં શઙ્ખં વર્મણાથાવગુણ્ઠયેત્ ॥ ૨૧॥

ધેનુશઙ્ખાખ્યમુદ્રે ચ દર્શયેદથ દેશિકઃ ।
પુનઃ સ્વપુરતઃ શઙ્ખં દક્ષિણે દેશ ઉત્તમે ॥ ૨૨॥

પૂજ્યાદ્યોક્તવિધાનેન સુન્દરં મણ્ડલં શુભમ્ ।
કુર્યાત્સમ્પૂજયેત્તં ચ સુગન્ધકુસુમાદિભિઃ ॥ ૨૩॥

સાધારં શોધિતં શુદ્ધં ઘટં તન્તુપરિષ્કૃતમ્ ।
ધૂપિતં સ્થાપિતં શુદ્ધવાસિતોદપ્રપૂરિતમ્ ॥ ૨૪॥

પઞ્ચત્વક્પઞ્ચપત્રૈશ્ચ મૃત્તિકાભિશ્ચ પઞ્ચભિઃ ।
મિલિતં ચ સુગન્ધેન લેપયેત્તં મુનીશ્વર ॥ ૨૫॥

વસ્ત્રામ્રદલદૂર્વાગ્રનારિકેલસુમૈસ્તતઃ ।
તં ઘટં વસ્તુભિશ્ચાન્યૈઃ સઙ્કુર્યાત્સમલઙ્કૃતમ્ ॥ ૨૬॥

વિન્યસેત્પઞ્ચરત્નાનિ ઘટે તત્ર મુનીશ્વર ।
હિરણ્યં ચાપિ તેષાં વાભાવે ભક્ત્યા પ્રવિન્યસેત્ ॥ ૨૭॥

નીલાખ્યરત્નં ચ તથા રત્ને માણિક્યહેમની ।
પ્રવાલગોમેદકે ચ પઞ્ચરત્નમિદં સ્મૃતમ્ ॥ ૨૮॥

નૃમ્લુસ્કમિતિ સમ્પ્રોચ્ય ગ્લૂમિત્યન્તેઽથ દેશિકઃ ।
સમ્યગ્વિધાનતઃ પ્રીત્યા સાનુકૂલઃ સમર્ચયેત્ ॥ ૨૯॥

આધારશક્તિમારભ્ય યજનોક્તવિધાનતઃ ।
પઞ્ચાવરણમાર્ગેણ દેવમાવાહ્ય પૂજયેત્ ॥ ૬।૧૮।૩૦॥

નિવેદ્ય પાયસાન્નં ચ તામ્બૂલાદિ યથા પુરા ।
નામાષ્ટકાર્ચનાન્તં ચ કૃત્વા તમભિમન્ત્રયેત્ ॥ ૩૧॥

પ્રણવાષ્ટોત્તરશતં બ્રહ્મભિઃ પઞ્ચભિઃ ક્રમાત્ ।
સદ્યાદીશાન્તમપ્યસ્ત્રં રક્ષિતં વર્મણા પુનઃ ॥ ૩૨॥

અવગુણ્ઠ્ય પ્રદર્શ્યાથ ધૂપદીપૌ ચ ભક્તિતઃ ।
ધેનુયોન્યાખ્યમુદ્રે ચ સમ્યક્ તત્ર પ્રદર્શયેત્ ॥ ૩૩॥

તતશ્ચ દેશિકસ્તસ્ય દર્ભૈરાચ્છાદ્ય મસ્તકમ્ ।
મણ્ડલસ્થેશદિગ્ભાગે ચતુરસ્રં પ્રકલ્પયેત્ ॥ ૩૪॥

તદુપર્યાસનં રમ્યં કલ્પયિત્વા વિધાનતઃ ।
તત્ર સંસ્થાપયેચ્છિષ્યં તં શિશું સાનુકૂલતઃ ॥ ૩૫॥

તતઃ કુમ્ભં સમુત્થાપ્ય સ્વસ્તિવાચનપૂર્વકમ્ ।
અભિષિઞ્ચેદ્ ગુરુઃ શિષ્યં પ્રાદક્ષિણ્યેન મસ્તકે ॥ ૩૬॥

પ્રણવં પૂર્વમુચ્ચાર્ય સમધા બ્રહ્મભિસ્તતઃ ।
પઞ્ચભિશ્ચાભિષેકાન્તે શઙ્ખોદેનાભિવેષ્ટયેત્ ॥ ૩૭॥

ચારુદીપં પ્રદર્શ્યાથ વાસસા પરિમૃજ્ય ચ ।
નૂતનં દોરકૌપીનં વાસસી પરિધાપયેત્ ॥ ૩૮॥

ક્ષાલિતાઙ્ઘ્રિર્દ્વિરાચમ્ય ધૃતભસ્મગુરુઃ શિશુમ્ ।
હસ્તાભ્યામવલમ્બ્યાથ હસ્તૌ મણ્ડપમધ્યતઃ ॥ ૩૯॥

તદઙ્ગેષુ સમાલિપ્ય તદ્ભસ્મ વિધિના ગુરુઃ ।
આસને સમ્પ્રવેશ્યાથ કલ્પિતે સ્થાપયેત્સુખમ્ ॥ ૬।૧૮।૪૦॥

પૂર્વાભિમુખમાત્મીયતત્ત્વજ્ઞાનાભિલાષિણમ્ ।

સ્વાસનસ્થો ગુરુર્બ્રૂયાદમલાત્મા ભવેતિ તમ્ ॥ ૪૧॥

ગુરુશ્ચ પરિપૂર્ણોઽસ્મિ શિવ ઇત્યચલસ્થિતિઃ ।
સમાધિમાચરેત્સમ્યઙ્ મુહૂર્ત્તં ગૂઢમાનસઃ ॥ ૪૨॥

પશ્ચાદુન્મીલ્ય નયને સાનુકૂલેન ચેતસા ।
સાઞ્જલિં સંસ્થિતં શુદ્ધં પશ્યેચ્છિષ્યમનાકુલઃ ॥ ૪૩॥

સ્વહસ્તં ભસિતાલિપ્તં વિન્યસ્ય શિશુમસ્તકે ।
દક્ષશ્રુતાવુપદિશેદ્ધંસઃ સોઽહમિતિ સ્ફુટમ્ ॥ ૪૪॥

તત્રાદ્યહમ્પદસ્યાર્થઃ શક્ત્યાત્મા સ શિવઃ સ્વયમ્ ।
સ એવાહં શિવોઽસ્મીતિ સ્વાત્માનં સંવિભાવય ॥ ૪૫॥

ય ઇત્યણોરર્થતત્ત્વમુપદિશ્ય તતો વદેત્ ।
અવાન્તરાણાં વાક્યાનામર્થતાત્પર્યમાદરાત્ ॥ ૪૬॥

વાક્યાનિ વચ્મિ તે બ્રહ્મન્સાવધાનમતિઃ શ‍ૃણુ ।
તાનિ ધારય ચિત્તે હિ સ બ્રૂયાદિતિ સંસ્ફુટમ્ ॥ ૪૭॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં સંન્યાસપદ્ધતૌ શિષ્યકરણવિધિર્નામાષ્ટાદશોઽધ્યાયઃ ॥ ૬.૧૮॥

૬।૧૯

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૧૯. એકોનવિંશોઽધ્યાયઃ । યોગપટ્ટવિધિવર્ણનમ્ ।

સુબ્રહ્મણ્ય ઉવાચ ।
“અથ મહાવાક્યાનિ”

(૧) પ્રજ્ઞાનં બ્રહ્મ

(૨) અહં બ્રહ્માસ્મિ

(૩) તત્ત્વમસિ

(૪) અયામાત્મા બ્રહ્મ

(૫) ઈશા વાસ્યમિદં સર્વં
(૬) પ્રાણોઽસ્મિ
(૭) પ્રજ્ઞાનાત્મા
(૮) યદેવેહ તદમુત્ર યદમુત્ર તદન્વિહ
(૯) અન્યદેવ તદ્વિદિતાદથો અવિદિતાદધિ
(૧૦) એષ ન આત્માન્તર્યામ્યમૃતઃ
(૧૧) સ યશ્ચાયં પુરુષે યશ્ચાસાવાદિત્યે સ એકઃ
(૧૨) અહમસ્મિ પરં બ્રહ્મ પરાપરપરાત્પરમ્
(૧૩) વેદશાસ્ત્રગુરુત્વાત્તુ સ્વયમાનન્દલક્ષણમ્
(૧૪) સર્વભૂતસ્થિતં બ્રહ્મ તદેવાહં ન સંશયઃ
(૧૫) તત્ત્વસ્ય પ્રાણોઽહમસ્મિ પૃથિવ્યાઃ પ્રાણોઽહમસ્મિ
(૧૬) અપાં ચ પ્રાણોઽહમસ્મિ તેજસશ્ચ પ્રાણોઽહમસ્મિ
(૧૭) વાયોશ્ચ પ્રાણોઽહમસ્મિ આકાશસ્ય પ્રાણોઽહમસ્મિ
(૧૮) ત્રિગુણસ્ય પ્રાણોઽહમસ્મિ
(૧૯) સર્વોઽહં સર્વાત્મકોઽહં સંસારી યદ્ભૂતં યચ્ચ ભવ્યં યદ્વર્તમાનં સર્વાત્મકત્વાદદ્વિતીયોઽહમ્
(૨૦) સર્વં ખલ્વિદં બ્રહ્મ
(૨૧) સર્વોઽહં વિમુક્તોઽહમ્
(૨૨) યોઽસૌ સોઽહં હંસઃ સોઽહમસ્મિ ॥

“ઇત્યેવં સર્વત્ર સદા ધ્યાયેદિતિ”

॥ અથ મહાવાક્યાનામર્થમાહ ॥

પ્રજ્ઞાનં બ્રહ્મવાક્યાર્થઃ પૂર્વમેવ પ્રબોધિતઃ ।
અહમ્પદસ્યાર્થભૂતઃ શક્ત્યાત્મા પરમેશ્વરઃ ॥ ૧॥

અકારઃ સર્વવર્ણાગ્ર્યઃ પ્રકાશઃ પરમઃ શિવઃ ।
હકારો વ્યોમરૂપઃ સ્યાચ્છક્ત્યાત્મા સમ્પ્રકીર્તિતઃ ॥ ૨॥

શિવશક્ત્યોસ્તુ સંયોગાદાનન્દઃ સતતોદિતઃ ।
બ્રહ્મેતિ શિવશક્ત્યોસ્તુ સર્વાત્મત્વમિતિ સ્ફુટમ્ ॥ ૩॥

પૂર્વમેવોપદિષ્ટં તત્સોઽહમસ્મીતિ ભાવયેત્ ।
તત્ત્વમિત્યત્ર તદિતિ તચ્છબ્દાર્થઃ પ્રબોધિતઃ ॥ ૪॥

અન્યથા સોઽહમિત્યત્ર વિપરીતાર્થભાવના ।
અહંશબ્દસ્તુ પુરુષસ્તદિતિ સ્યાન્નપુંસકમ્ ।

એવમન્યોઽન્યવૈરુધ્યાદન્વયો ન ભવેત્તયોઃ ॥ ૫॥

સ્ત્રીપુંરૂપસ્ય જગતઃ કારણં ચાન્યથા ભવેત્ ।
સ તત્ત્વમસિ ઇત્યેવમુપદેશાર્થભાવના ॥ ૬॥

અયમાત્મેતિ વાક્યે ચ પુંરૂપં પદયુગ્મકમ્ ।
ઈશેન રક્ષણીયત્વાદીશાવાસ્યમિદં જગત્ ॥ ૭॥

પ્રજ્ઞાનાત્મા યદેવેહ તદમુત્રેતિ ચિન્તયેત્ ।
યઃ સ એવેતિ વિદ્વદ્ભિઃ સિધ્દાન્તિભિરિહોચ્યતે ॥ ૮॥

ઉપરિસ્થિતવાક્યે ચ યોઽમુત્ર સ ઇહ સ્થિતઃ ।
ઇતિ પૂર્વવદેવાર્થઃ પુરુષો વિદુષાં મતઃ ॥ ૯॥

અન્યદેવ તદ્વિદિતાદથો અવિદિતાદપિ ।
અસ્મિન્વાક્યે ફલસ્યાપિ વૈપરીત્યવિભાવના ॥ ૬।૧૯।૧૦॥

યથા સ્યાત્તદ્વદેવાત્ર વક્ષ્યામિ શ્રૂયતાં મુને ।
અયથાવિદિતાશબ્દો પૂર્વવદ્વિદિતાદિતિ ॥ ૧૧॥

પ્રવૃત્તઃ સ્યાત્તદ્વિદિતાત્તથૈવાવિદિતાત્પરમ્ ।
અન્યદેવ હિ સંસિદ્ધ્યૈ ન ભવેદિતિ નિશ્ચિતમ્ ॥ ૧૨॥

એષ ત આત્માન્તર્યામી યોઽમૃતશ્ચ શિવઃ સ્વયમ્ ।
યશ્ચાયં પુરુષે શમ્ભુર્યશ્ચાદિત્યે વ્યવસ્થિતઃ ॥ ૧૩॥

સ ચાઽસૌ સેતિ પાર્થક્યં નૈકં સર્વં સ ઈરિતઃ ।
સોપાધિદ્વયમસ્યાર્થ ઉપચારાત્તથોચ્યતે ॥ ૧૪॥

તં શમ્ભુનાથં શ્રુતયો વદન્તિ હિ હિરણ્મયમ્ ।
હિરણ્યબાહવ ઇતિ સર્વાઙ્ગસ્યોપલક્ષલમ્ ॥ ૧૫॥

અન્યથા તત્પતિત્વં તુ ન ભવેદિતિ યત્નતઃ ।
ય એષોઽન્તરિતિ શમ્ભુશ્છાન્દોગ્યે શ્રૂયતે શિવઃ ॥ ૧૬॥

હિરણ્યશ્મશ્રુવાંસ્તદ્વદ્ધિરણ્યમયકેશવાન્ ।
નખમારભ્ય કેશાન્તં સર્વત્રાપિ હિરણ્મયઃ ॥ ૧૭॥

અહમસ્મિ પરં બ્રહ્મ પરાપરપરાત્પરમ્ ।
ઇતિ વાક્યસ્ય તાત્પર્યં વદામિ શ્રૂયતામિદમ્ ॥ ૧૮॥

અહમ્પદસ્યાર્થભૂતઃ શક્ત્યાત્મા શિવ ઈરિતઃ ।
સ એવાસ્મીતિ વાક્યાર્થ યોજના ભવતિ ધ્રુવમ્ ॥ ૧૯॥

સર્વોત્કૃષ્ટશ્ચ સર્વાત્મા પરબ્રહ્મ સ ઈરિતઃ ।
પરશ્ચાથાપરશ્ચેતિ પરાત્પરમિતિ ત્રિધા ॥ ૬।૧૯।૨૦॥

રુદ્રો બ્રહ્મા ચ વિષ્ણુશ્ચ પ્રોક્તાઃ શ્રુત્યૈવ નાન્યથા ।
તેભ્યશ્ચ પરમો દેવઃ પરશબ્દેન બોધિતઃ ॥ ૨૧॥

વેદશાસ્ત્રગુરૂણાં ચ વાક્યાભ્યાસવશાચ્છિશોઃ ।
પૂર્ણાનન્દમયઃ શમ્ભુઃ પ્રાદુર્ભૂતો ભવેદ્ધૃદિ ॥ ૨૨॥

સર્વભૂતસ્થિતઃ શમ્ભુઃ સ એવાહં ન સંશયઃ ।
તત્ત્વજાતસ્ય સર્વસ્ય પ્રાણોઽસ્મ્યહમહં શિવઃ ॥ ૨૩॥

ઇત્યુક્ત્વા પુનરપ્યાહ શિવસ્તત્ત્વત્રયસ્ય ચ ।
પ્રાણોઽસ્મીત્યત્ર પૃથ્વ્યાદિગુણાન્તગ્રહણાન્મુને ॥ ૨૪॥

આત્મતત્ત્વાનિ સર્વાણિ ગૃહીતાનીતિ ભાવય ।
પુનશ્ચ સર્વગ્રહણં વિદ્યાતત્ત્વે શિવાત્મનોઃ ॥ ૨૫॥

તત્ત્વયોશ્ચાસ્મ્યહં પ્રાણાઃ સર્વઃ સર્વાત્મકો હ્યહમ્ ।
જીવસ્ય ચાન્તર્યામિત્વાજ્જીવોઽહં તસ્ય સર્વદા ॥ ૨૬॥

યદ્ભૂતં યચ્ચ ભવ્યં યદ્ભવિષ્યત્સર્વમેવ ચ ।
મન્મયત્વાદહં સર્વઃ સર્વો વૈ રુદ્ર ઇત્યપિ ॥ ૨૭॥

શ્રુતિરાહ મુને સા હિ સાક્ષાચ્છિવમુખોદ્ગતા ।
સર્વાત્મા પરમૈરેભિર્ગુણૈર્નિત્યસમન્વયાત્ ॥ ૨૮॥

સ્વસ્માત્પરાત્મવિરહાદદ્વિતીયોઽહમેવ હિ ।
સર્વં ખલ્વિદં બ્રહ્મેતિ વાક્યાર્થઃ પૂર્વમીરિતઃ ॥ ૨૯॥

પૂર્ણોઽહં ભાવરૂપત્વાન્નિત્યમુક્તોઽહમેવ હિ ।
પશવો મત્પ્રસાદેન મુક્તા મદ્ભાવમાશ્રિતાઃ ॥ ૬।૧૯।૩૦॥

યોઽસૌ સર્વાત્મકઃ શમ્ભુઃ સોઽહં હંસ શિવોઽસ્મ્યહમ્ ।
ઇતિ વૈ સર્વવાક્યાર્થો વામદેવ શિવોદિતઃ ॥ ૩૧॥

ઇતીશશ્રુતિવાક્યાભ્વામુપદિષ્ટાર્થમાદરાત્ ।
સાક્ષાચ્છિવૈક્યદં પુંસાં શિશોર્ગુરુરુપાદિશેત્ ॥ ૩૨॥

આદાય શઙ્ખં સાધારમસ્ત્રમન્ત્રેણ ભસ્મના ।
શોધ્ય તત્પુરતઃ સ્થાપ્ય ચતુરસ્રે સમર્ચિતે ॥ ૩૩॥

ઓમિત્યભ્યર્ચ્ય ગન્ધાદ્યૈરસ્ત્રં વસ્ત્રોપશોભિતમ્ ।
વાસિતં જલમાપૂર્ય સમ્પૂજ્યોમિતિ મન્ત્રતઃ ॥ ૩૪॥

સપ્તધૈવાભિમન્ત્ર્યાથ પ્રણવેન પુનશ્ચ તમ્ ।
યસ્ત્વન્તરં કિઞ્ચિદપિ કુરુતે સોઽતિભીતિભાક્ ॥ ૩૫॥

ઇત્યાહ શ્રુતિસત્તત્ત્વં દૃઢાત્મા ગતભીર્ભવ ।
ઇત્યાભાષ્ય સ્વયં શિષ્યં દેવં ધ્યાયન્ સમર્ચયેત્ ॥ ૩૬॥

શિષ્યાસનં સમ્પ્રપૂજ્ય ષડુત્થાપનમાર્ગતઃ ।
શિવાસનં ચ સઙ્કલ્પ્ય શિવમૂર્તિં પ્રકલ્પયેત્ ॥ ૩૭॥

પઞ્ચ બ્રહ્માણિ વિન્યસ્ય શિરઃ પાદાવસાનકમ્ ।
મુણ્ડવક્ત્રકલાભેદૈઃ પ્રણવસ્ય કલા અપિ ॥ ૩૮॥

અષ્ટત્રિંશન્મન્ત્રરૂપાઃ શિષ્યદેહેઽથ મસ્તકે ।
સમાવાહ્ય શિવં મુદ્રાઃ સ્થાપનીયાઃ પ્રદર્શયેત્ ॥ ૩૯॥

તતશ્ચાઙ્ગાનિ વિન્યસ્ય સર્વજ્ઞાનીત્યનુક્રમાત્ ।
કલ્પયેદુપચારાંશ્ચ ષોડશાસનપૂર્વકામ્ ॥ ૬।૧૯।૪૦॥

પાયસાન્નં ચ નૈવેદ્યં સમર્પ્યોમગ્નિજાયયા ।
ગણ્ડૂષાચમનાર્ઘ્યાદિ ધૂપદીપાદિકં ક્રમાત્ ॥ ૪૧॥

નામાષ્ટકેન સમ્પૂજ્ય બ્રાહ્મણૈર્વેદપારગૈઃ ।
જપેદ્ બ્રહ્મવિદાપ્નોતિ ભૃગુર્વૈ વારુણિસ્તતઃ ॥ ૪૨॥

યો દેવાનામુપક્રમ્ય યઃ પરઃ સ મહેશ્વરઃ ।
ઇત્યન્તં તસ્ય પુરતઃ કહ્લારાદિવિનિર્મિતામ્ ॥ ૪૩॥

આદાય માલામુત્થાય શ્રીવિરૂપાક્ષનિર્મિતે ।
શાસ્ત્રે પઞ્ચાસ્યકે રૂપે સિદ્ધિસ્કન્ધં જપેચ્છનૈઃ ॥ ૪૪॥

ખ્યાતિઃ પૂર્ણોઽહમિત્યન્તં સાનુકૂલેન ચેતસા ।
દેશિકસ્તસ્ય શિષ્યસ્ય કણ્ઠદેશે સમર્પયેત્ ॥ ૪૫॥

તિલકં ચન્દનેનાથ સર્વાઙ્ગાલેપનં પુનઃ ।

સ્વસમ્પ્રદાયાનુગુણં કારયેચ્ચ યથાવિધિ ॥ ૪૬॥

તતશ્ચ દેશિકઃ પ્રીત્યા નામ શ્રીપાદસંજ્ઞિતમ્ ।
છત્રં ચ પાદુકાં દદ્યાદ્ દૂર્વાકલ્પવિકલ્પનમ્ ॥ ૪૭॥

વ્યાખ્યાતૃત્વં ચ કર્માદિ ગુર્વાસનપરિગ્રહમ્ ।
અનુગૃહ્ય ગુરુસ્તસ્મૈ શિષ્યાય શિવરૂપિણે ॥ ૪૮॥

શિવોઽહમસ્મીતિ સદા સમાધિસ્થો ભવેતિ તમ્ ।
સમ્પ્રોચ્યાથ સ્વયં તસ્મૈ નમસ્કારં સમાચરેત્ ॥ ૪૯॥

સમ્પ્રદાયાનુગુણ્યેન નમસ્કુર્યુસ્તથાપરે ।
શિષ્યસ્તદા સમુત્થાય નમસ્કુર્યાદ્ ગુરું તથા ।
ગુરોરપિ ગુરું તસ્ય શિષ્યાંશ્ચ સ્વગુરોરપિ ॥ ૬.૧૯.૫૦॥

એવં કૃતનમસ્કારં શિષ્યં દદ્યાદ્ ગુરુઃ સ્વયમ્ ।
સુશીલં યતવાચં તં વિનયાવનતં સ્થિતમ્ ॥ ૫૧॥

અદ્ય પ્રભૃતિ લોકાનામનુગ્રહપરો ભવ ।
પરીક્ષ્ય વત્સરં શિષ્યમઙ્ગીકુરુ વિધાનતઃ ॥ ૫૨॥

રાગાદિદોષાન્સન્ત્યજ્ય શિવધ્યાનપરો ભવ ।
સત્સમ્પ્રદાયસંસિદ્ધૈઃ સઙ્ગં કુરુ ન ચેતરૈઃ ॥ ૫૩॥

અનભ્યર્ચ્ય શિવં જાતુ મા ભુઙ્ક્ષ્વાપ્રાણ સઙ્ક્ષયમ્ ।
ગુરુભક્તિં સમાસ્થાય સુખી ભવ સુખી ભવ ॥ ૫૪॥

ઇતિ ક્રમાદ્ ગુરુવરો દયાલુર્જ્ઞાનસાગરઃ ।
સાનુકૂલેન ચિત્તેન સમં શિષ્યં સમાચરેત્ ॥ ૫૫॥

તવ સ્નેહાન્મયાયં વૈ વામદેવ મુનીશ્વર ।
યોગપટ્ટપ્રકારસ્તે પ્રોક્તો ગુહ્યતરોઽપિ હિ ॥ ૫૬॥

ઇત્યુક્ત્વા ષણ્મુખસ્તસ્મૈ ક્ષૌરસ્નાનવિધિક્રમમ્ ।
વક્તુમારભતે પ્રીત્યા યતીનાં કૃપયા શુભમ્ ॥ ૫૭॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં યોગપટ્ટવિધિવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૬.૧૯॥

૬.૨૦

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૨૦. વિંશોઽધ્યાયઃ । ક્ષૌરસ્નાનવિધિવર્ણનમ્ ।

સુબ્રહ્મણ્ય ઉવાચ ।
ક્ષૌરસ્નાનવિધિં વક્ષ્યે વામદેવ મહામુને ।
યસ્ય સદ્યો વિધાનેન શુદ્ધિઃ સ્યાદ્યતિનઃ પરા ॥ ૧॥

યોગપટ્ટપ્રકારસ્ય વિધિં પ્રાપ્ય મુનીશ્વર ।
સ શિષ્યઃ સ્યાદ્ વ્રતી પૂર્ણઃ ક્ષૌરકર્મોદ્યતો ભવેત્ ॥ ૨॥

ગુરું નત્વા વિશેષેણ લબ્ધાનુજ્ઞસ્તતો ગુરોઃ ।
શિરઃ સક્ષાલ્ય ચાચમ્ય સવાસાઃ ક્ષૌરમાચરેત્ ॥ ૩॥

ક્ષાલયેદ્વસનં પશ્ચાન્મૃદમ્ભોભિઃ ક્ષુરાદિકમ્ ।
તદ્ધસ્તૌ ચ મૃદાલિપ્ય ક્ષાલયેતિ મૃદં દદેત્ ॥ ૪॥

સ્થાપિતં પ્રોક્ષિતં તોયૈઃ શિવં શિવમિતીરયન્ ।
સ્વનેત્રે પિહિતે ચૈવાનામાઙ્ગુષ્ઠાભિમન્ત્રિતે ॥ ૫॥

અસ્ત્રેણોન્મીલ્ય સન્દૃશ્ય ક્ષુરાદિક્ષૌરસાધનમ્ ।
અભિમન્ત્ર્ય દ્વાદશાથ પ્રોક્ષયેદસ્ત્રમન્ત્રતઃ ॥ ૬॥

ક્ષુરં ગૃહીત્વા તારેણ દક્ષભાગે નિકૃન્તયેત્ ।
કેશાંશ્ચ કાંશ્ચિદગ્રેષુ વપ્ત્વા સર્વં ચ વાપયેત્ ॥ ૭॥

પૃથિવ્યાં પર્ણમાદાય વિક્ષિપેન્ન ભુવઃ સ્થલે ।
શ્મશ્રૂણિ હસ્તપાદસ્થનખાનિ ચ નિકૃન્તયેત્ ॥ ૮॥

બિલ્વાશ્વત્થતુલસ્યાદિસ્થાને સઙ્ગૃહ્ય મૃત્તિકામ્ ।
દ્વિષડ્વારં નિમજ્યાપ્સુ તીરં ગત્વોપવિશ્ય ચ ॥ ૯॥

શુદ્ધે દેશે તુ સંસ્થાપ્ય મૃદં ત્રેધા વિભજ્ય ચ ।
એવં પુનસ્ત્રિધા કૃત્વા પ્રોક્ષ્યાસ્ત્રેણાભિમન્ત્રયેત્ ॥ ૬.૨૦.૧૦॥

તત્રૈકાં મૃદમાદાય દાપયિત્વાન્યપાણિના ।
કરૌ દ્વાદશધાલિપ્ય પ્રત્યેકં કેન ક્ષાલયેત્ ॥ ૧૧॥

પુનરેકાં પાદયોશ્ચ મુખે ચાન્યાં કરે ક્રમાત્ ।
સંલિપ્યાક્ષાલ્ય ચામ્ભોભિઃ પુનશ્ચ જલમાવિશેત્ ॥ ૧૨॥

અન્યાં મૃદં ભાગયિત્વા શિરસિ દ્વાદશ ક્રમાત્ ।
આલિપ્ય મૃદમાસ્યાન્તં નિમજ્ય ચ પુનઃ પુનઃ ॥ ૧૩॥

તીરં ગત્વા તુ ગણ્ડૂષાન્ ષોડશાચમનં દ્વિધા ।
પ્રાણાનાયમ્ય ચ પુનઃ પ્રણવં દ્વ્યષ્ટસઙ્ખ્યયા ॥ ૧૪॥

મૃદમન્યાં પુનસ્ત્રેધા વિભજ્ય ચ તદેકયા ।
કટિશૌચં પાદશૌચં વિધાયાચમ્ય ચ દ્વિધા ॥ ૧૫॥

પ્રણવેનાથ ષોડશ પ્રાણાનાયમ્ય વાગ્યતઃ ।
પુનરન્યાં સ્વોરુદેશે ત્રિધા વિન્યસ્ય ચોમિતિ ॥ ૧૬॥

પ્રોક્ષ્યાભિમન્ત્રયેત્સપ્ત સ્વપાણ્યોસ્તલમેકધા ।
ત્રિધાલિપ્યાથ સમ્પશ્યેત્સૂર્યમૂર્તિં ચ પાવનીમ્ ॥ ૧૭॥

સ્વકક્ષયોઃ સમાલિપ્ય વ્યત્યસ્તાભ્યામથાન્યયા ।
પાણિભ્યાં ચ મૃદા શિષ્યઃ સુમતિર્દૃઢમાનસઃ ॥ ૧૮॥

ગૃહીત્વાન્યાં મૃદં શુદ્ધાં તથાસૌ ગુરુભક્તિમાન્ ।
શિર આરભ્ય પાદાન્તં વિલિપ્યાદિત્યદૃષ્ટયા ॥ ૧૯॥

સમુત્થાય તતોઽસૌ વૈ દણ્ડમાદાય ભૂતલે ।
સ્વગુરું મન્ત્રદં ભક્ત્યા સંસ્મરેજ્જ્ઞાનનિશ્ચયા ॥ ૬.૨૦.૨૦॥

તતઃ સામ્બં મહેશાનં શઙ્કરં ચન્દ્રશેખરમ્ ।
સંસ્મરેદ્ભક્તિતઃ શિષ્ય સર્વૈશ્વર્યપતિં શિવમ્ ॥ ૨૧॥

ત્રિવારં પ્રણમેત્પ્રીત્યા સાષ્ટાઙ્ગં ચ ગુરું શિવમ્ ।
પઞ્ચાઙ્ગેનૈકવારં ચ સમુત્થાય ચ વન્દયેત્ ॥ ૨૨॥

તીર્થં પ્રવિશ્ય તન્મધ્યે નિમજ્યોન્મજ્ય તાં મૃદમ્ ।
સ્કન્ધે સંસ્થાપ્ય પૂર્વોક્તપ્રકારેણ વિલેપયેત્ ॥ ૨૩॥

તત્રાવશિષ્ટં સઙ્ગૃહ્ય જલમધ્યે પ્રવિશ્ય ચ ।
વિલોડ્ય સમ્યક્ તાં તત્ર સર્વાઙ્ગેષુ વિલિપ્ય ચ ॥ ૨૪॥

ત્રિવારમોમિતિ પ્રોચ્ય શિવપાદામ્બુજં સ્મરન્ ।
સંસારામ્બુધિસન્તારં સદા યદ્વિધિતો હિ સઃ ॥ ૨૫॥

અભિષિચ્યોમિતિ જલં વિરજાભસ્મલોલિતમ્ ।
અઙ્ગોપમાર્જનં કૃત્વા સુસ્નાયાદ્ભસ્મના તતઃ ॥ ૨૬॥

ત્રિપુણ્ડ્રં ચ વિધાયાથ યથોક્તવિધિના શુભમ્ ।
યથોક્તાઙ્ગેષુ સર્વેષુ સાવધાનતયા મુને ॥ ૨૭॥

તતઃ શુદ્ધમના ભૂત્વા કુર્યાન્મધ્યદિનક્રિયાઃ ।
મહેશ્વરં નમસ્કૃત્ય ગુરૂંસ્તીર્થાદિકાનિ ચ ॥ ૨૮॥

સમ્પૂજયેન્મહેશાનં ભક્ત્યા પરમયા મુને ।
સામ્બિકં જ્ઞાનદાતારં પાતારં ત્રિભવસ્ય વૈ ॥ ૨૯॥

તતોઽસૌ દૃઢચેતસ્કો યતિઃ સ્વવૃષસંસ્થિતઃ ।
ભિક્ષાર્થં પ્રવ્રજેચ્છુદ્ધો વિપ્રવર્ગેષુ સાધુષુ ॥ ૬.૨૦.૩૦॥

તતસ્તત્ર ચ શુદ્ધાત્મા પઞ્ચધા પરિકલ્પિતમ્ ।
ભૈક્ષ્યં યથોચિતં કુર્યાદ્ દૂષિતાન્નં વિવર્જયેત્ ॥ ૩૧॥

શૌચં સ્નાનં તથા ભિક્ષાં નિત્યમેકાન્તસેવનમ્ ।
ભિક્ષૌશ્ચત્વારિ કર્માણિ પઞ્ચમં નૈવ વિદ્યતે ॥ ૩૨॥

અલાબું વેણુપાત્રં ચ દારવં મૃણ્મયં તથા ।
ભિક્ષોશ્ચત્વારિ પાત્રાણિ પઞ્ચમં નૈવ વિદ્યતે ॥ ૩૩॥

તામ્બૂલં તૈજસં પાત્રં રેતસ્સેકં સિતામ્બરમ્ ।
દિવાસ્વાપો હિનક્તાન્નં યતીનાં ષડ્વિવર્જિતાઃ ॥ ૩૪॥

સાક્ષરા વિપરીતાશ્ચ રાક્ષસાસ્ત ઇતિ સ્મૃતાઃ ।
તસ્માદ્વૈ વિપરીતં ચ કર્મ નૈવાચરેદ્ યતિઃ ॥ ૩૫॥

યતિઃ પ્રયત્નતઃ કુર્યાત્ક્ષૌરસ્નાનં ચ શુદ્ધયે ।
સંસ્મરન્મનસા શુદ્ધં પરં બ્રહ્મ સદાશિવમ્ ॥ ૩૬॥

ઇત્યેવ મુનિશાર્દૂલ તવ સ્નેહાન્મયાખિલઃ ।
ક્ષૌરસ્નાનવિધિઃ પ્રોક્તઃ કિમ્ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં ક્ષૌરસ્નાનવિધિવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૬.૨૦॥

૬.૨૧

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૨૧. એકવિંશોઽધ્યાયઃ । યતીનાં મરણાનન્તરદશાહપર્યન્તકૃત્યવર્ણનમ્ ।

વામદેવ ઉવાચ ।
યે મુક્તા યતયસ્તેષાં દાહકર્મ ન વિદ્યતે ।
મૃતે શરીરે ખનનં તદ્દેહસ્ય શ્રુતં મયા ॥ ૧॥

તત્કર્માચક્ષ્વ સુપ્રીત્યા કાર્તિકેય ગુરો મમ ।
ત્વત્તોઽન્યો ન હિ સંવક્તા ત્રિષુ લોકેષુ વિદ્યતે ॥ ૨॥

પૂર્ણાહમ્ભાવમાશ્રિત્ય યે મુક્તા દેહપઞ્જરાત્ ।
યે તૂપાસનમાર્ગેણ દેહમુક્તાઃ પરં ગતાઃ ॥ ૩॥

તેષાં ગતિવિશેષં ચ ભગવન્ શઙ્કરાત્મજ ।
વક્તુમર્હસિ સુપ્રીત્યા માં વિચાર્ય સ્વશિષ્યતઃ ॥ ૪॥

સૂત ઉવાચ ।
મુનિવિજ્ઞપ્તિમાકર્ણ્ય શક્તિપુત્રઃ સુરારિહા ।
પ્રાહાત્યન્તરહસ્યં તદ્ ભૃગુણા શ્રુતમીશ્વરાત્ ॥ ૫॥

સુબ્રહ્મણ્ય ઉવાચ ।
ઇદમેવ મુને ગુહ્યં ભૃગવે શિવયોગિને ।
ઉક્તં ભગવતા સાક્ષાત્સર્વજ્ઞેન પિનાકિના ॥ ૬॥

વક્ષ્યે તદદ્ય તે બ્રહ્મન્ન દેયં યસ્ય કસ્યચિત્ ।
દેયં શિષ્યાય શાન્તાય શિવભક્તિયુતાય વૈ ॥ ૭॥

સમાધિસ્થો યતિઃ કશ્ચિચ્છિવભાવેન દેહમુક્ ।
અસ્તિ ચેત્સ મહાધીરઃ પરિપૂર્ણઃ શિવો ભવેત્ ॥ ૮॥

અધૈર્યચિત્તો યઃ કશ્ચિત્સમાધિં ન ચ વિન્દતિ ।
તદુપાયં પ્રવક્ષ્યામિ સાવધાનતયા શ‍ૃણુ ॥ ૯॥

ત્રિપદાર્થપરિજ્ઞાનં વેદાન્તાગમવાક્યજમ્ ।
શ્રુત્વા ગુરોર્મુખાદ્યોગમભ્યસેત્સ યમાદિકમ્ ॥ ૬.૨૧.૧૦॥

તત્કુર્વન્સ યતિઃ સમ્યક્ શિવધ્યાનપરો ભવેત્ ।

નિયમેન મુને નિત્યં પ્રણવાસક્તમાનસઃ ॥ ૧૧॥

દેહદૌર્બલ્યવશતો યદ્યધૈર્યધરો યતિઃ ।
અકામશ્ચ શિવં સ્મૃત્વા સ જીર્ણાં સ્વાં તનું ત્યજેત્ ॥ ૧૨॥

સદાશિવાનુગ્રહતો નન્દિના પ્રેરિતા મુને ।
આતિવાહિકરૂપિણ્યો દેવતાઃ પઞ્ચ વિશ્રુતાઃ ॥ ૧૩॥

અઞ્ચહન્તાકૃતિઃ કાચિજ્જ્યોત્તિઃપુઞ્જવપુષ્મતી ।
અહ્નોઽભિમાનિની કાચિચ્છુક્લપક્ષાભિમાનિની ॥ ૧૪॥

ઉત્તરાયણરૂપા ચ પઞ્ચાનુગ્રહતત્પરા ।
ધૂમ્રા તમસ્વિની રાત્રિઃ કૃષ્ણપક્ષાભિમાનિની ॥ ૧૫॥

દક્ષિણાયનરૂપેતિ વિશ્રુતાઃ પઞ્ચ દેવતાઃ ।
તાસાં વૃત્તિં શ ૃણુષ્વાદ્ય વામદેવ મહામુને ॥ ૧૬॥

તાઃ પઞ્ચ દેવતા જીવાન્ કર્માનુષ્ઠાનતત્પરાન્ ।
ગૃહીત્વા ત્રિદિવં યાન્તિ તત્પુણ્યવશતો મુને ॥ ૧૭॥

ભુક્ત્વા ભોગાન્યથોક્તાંશ્ચ તે તત્પુણ્યક્ષયે પુનઃ ।
માનુષં લોકમાસાદ્ય ભજતે જન્મ પૂર્વવત્ ॥ ૧૮॥

તાઃ પુનઃ પઞ્ચધા માર્ગં વિભજ્યારભ્ય ભૂતલમ્ ।
અઞ્ચાદિક્રમતાં ગૃહ્ય સદાશિવપદં યતિઃ ॥ ૧૯॥

નિનીય વન્દ્યચરણૌ દેવદેવસ્ય પૃષ્ઠતઃ ।
તિષ્ઠન્ત્યનુગ્રહાકારાઃ કર્મણ્યેવ પ્રયોજિતાઃ ॥ ૬.૨૧.૨૦॥

સમાગતમભિપ્રેક્ષ્ય દેવદેવઃ સદાશિવઃ ।
વિરક્તશ્ચેન્મહામન્ત્રતાત્પર્યમુપદિશ્ય ચ ॥ ૨૧॥

સ્વસામ્યં ચ વપુર્દત્તે ગાણપત્યેભિષિચ્ય ચ ।
અનુગૃહ્ણાતિ સર્વેશઃ શઙ્કરઃ સર્વનાયકઃ ॥ ૨૨॥

મૃગટઙ્કત્રિશૂલાગ્ર્યવરદાનવિભૂષિતમ્ ।
ત્રિનેત્રં ચન્દ્રશકલં ગઙ્ગોલ્લાસિજટાધરમ્ ॥ ૨૩॥

અધિષ્ઠિતવિમાનાગ્ર્યં સર્વગં સર્વકામદમ્ ।
ઇતિ શાખાવિરક્તસ્ય રુદ્રકન્યાસમાવૃતમ્ ॥ ૨૪॥

નૃત્યગીતમૃદઙ્ગાદિવાદ્યઘોષમનોહરમ્ ।
દિવ્યામ્બરસ્રગાલેપભૂષણૈરપિ ભૂષિતમ્ ॥ ૨૫॥

દિવ્યામૃતઘટૈઃ પૂર્ણં દિવ્યામ્ભઃપરિપૂરિતમ્ ।
સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ॥ ૨૬॥

મનોવેગં સર્વગં ચ વિમાનમનુગૃહ્ય ચ ।
ભુક્તભોગસ્ય તસ્યાપિ ભોગકૌતૂહલક્ષયે ॥ ૨૭॥

નિપાત્ય શક્તિં તીવ્રતરાં પ્રકૃત્યા હ્યતિદુર્ગમામ્ ।
કાન્તારં દગ્ધુકામાં તાં પ્રલયાનલસુપ્રભામ્ ॥ ૨૮॥

અનુગૃહ્ય મહામન્ત્રતાત્પર્યં પરમેશ્વરઃ ।
પૂર્ણોઽહં ભાવનારૂપઃ શમ્ભુરસ્મીતિ નિશ્ચલમ્ ॥ ૨૯॥

અનુગૃહ્ય સમાધિં ચ સ્વદાસ્યસ્પન્દરૂપિણીઃ ।
રવ્યાદિકર્મ્મસામર્થ્યરૂપાઃ સિદ્ધીરનર્ગલાઃ ॥ ૬.૨૧.૩૦॥

આયુઃક્ષયે પદ્મયોનેઃ પુનરાવૃત્તિવર્જિતામ્ ।
મુક્તિં ચ પરમાં તસ્મૈ પ્રયચ્છતિ જગદ્ગુરુઃ ॥ ૩૧॥

એતદેવ પદં તસ્માત્સર્વૈશ્વર્યં સમષ્ટિમત્ ।
મુક્તિઘણ્ટાપથં ચેતિ વેદાન્તાનાં વિનિશ્ચયઃ ॥ ૩૨॥

મુમૂર્ષોસ્તસ્ય મન્દસ્ય યતેઃ સત્સમ્પ્રદાયિનઃ ।
યતયઃ સાનુકૂલત્વાત્તિષ્ઠેયુઃ પરિતસ્તદા ॥ ૩૩॥

તતઃ સર્વે ચ તે તત્ર પ્રણવાદીન્યનુક્રમાત્ ।
ઉપદિશ્ય ચ વાક્યાનિ તાત્પર્યં ચ સમાહિતાઃ ॥ ૩૪॥

વર્ણયેયુઃ સ્ફુટં પ્રીત્યા શિવં સંસ્મારયન્સદા ।
નિર્ગુણં પરમજ્યોતિઃ પ્રણમ્ય વિલયાવધિ ॥ ૩૫॥

એતેષાં સમમેવાત્ર સંસ્કારક્રમ ઉચ્યતે ।
અસંસ્કૃતશરીરાણાં દૌર્ગત્યં નૈવ જાયતે ॥ ૩૬॥

સંન્યસ્ય સર્વકર્માણિ શિવાશ્રયપરા યતઃ ।
દેહં દૂષયતસ્તેષાં રાજ્ઞો રાષ્ટ્રં ચ નશ્યતિ ॥ ૩૭॥

તદ્ગ્રામવાસિનસ્તેઽપિ ભવેયુર્ભૃશદુઃખિનઃ ।
તદ્દોષપરિહારાય વિધાનં ચૈવમુચ્યતે ॥ ૩૮॥

સ તુ નમ ઇરિણ્યાય ચેત્યારભ્ય વિનમ્રધીઃ ।
નમ આમીવત્કેભ્યાન્તં તત્કાલે પ્રજપેન્મનુમ્ ॥ ૩૯॥

ઓમિત્યન્તે જપન્ દેવયજનં પૂરયેત્તતઃ ।
તતઃ શાન્તિર્ભવેત્તસ્ય દોષસ્ય હિ મુનીશ્વર ॥ ૬.૨૧.૪૦॥

પુત્રાદયો યથાન્યાયં કુર્યુઃ સંસ્કારમુત્તમમ્ ।
વચ્મિ તત્કૃપયા વિપ્ર સાવધાનતયા શ‍ૃણુ ॥ ૪૧॥

અભ્યર્ચ્ય સ્નાપ્ય શુદ્ધોદૈરભ્યર્ચ્ય કુસુમાદિભિઃ ।
શ્રીરુદ્રચમકાભ્યાં ચ રુદ્રસૂક્તેન ચ ક્રમાત્ ॥ ૪૨॥

શઙ્ખં ચ પુરતઃ સ્થાપ્ય તજ્જલેનાભિષિચ્ય ચ ।
પુષ્પં નિધાય શિરસિ પ્રણવેન પ્રમાર્જયેત્ ॥ ૪૩॥

કૌપીનાદીનિ સન્ત્યજ્ય પુનરન્યાનિ ધારયેત્ ।
ભસ્મનોદ્ધૂલયેત્તસ્ય સર્વાઙ્ગં વિધિના તતઃ ॥ ૪૪॥

ત્રિપુણ્ડ્રં ચ વિધાનેન તિલકં ચન્દનેન ચ ।
વિરચ્ય પુષ્પૈર્માલાભિરલઙ્કુર્યાત્કલેવરમ્ ॥ ૪૫॥

ઉરઃકણ્ઠશિરોબાહુપ્રકોષ્ઠશ્રુતિષુ ક્રમાત્ ।
રુદ્રાક્ષમાલાભરણૈરલઙ્કુર્યાચ્ચ મન્ત્રતઃ ॥ ૪૬॥

સુધૂપિતં સમુત્થાપ્ય શિક્યોપરિ નિધાય ચ ।
પઞ્ચબ્રહ્મમયે રમ્યે રથે સંસ્થાપયેત્તનુમ્ ॥ ૪૭॥

ઓમદ્યૈઃ પઞ્ચભિર્બ્રહ્મમન્ત્રૈઃ સદ્યાદિભિઃ ક્રમાત્ ।
સુગન્ધકુસુમૈર્માલ્યૈરલઙ્કુર્યાદ્રથં ચ તમ્ ॥ ૪૮॥

નૃત્યવાદ્યૈર્બ્રાહ્મણાનાં વેદઘોષૈશ્ચ સર્વતઃ ।
ગ્રામં પ્રદક્ષિણીકૃત્ય ગચ્છેત્પ્રેતં તમુદ્વહન્ ॥ ૪૯॥

તતસ્તે યતિનઃ સર્વે તથા પ્રાચ્યામથાપિ વા ।
ઉદીચ્યાં પુણ્યદેશે તુ પુણ્યવૃક્ષસમીપતઃ ॥ ૬.૨૧.૫૦॥

ખનિત્વા દેવયજનં દણ્ડમાત્રપ્રમાણતઃ ।
પ્રણવવ્યાહૃતિભ્યાં ચ પ્રોક્ષ્ય ચાસ્તીર્ય ચ ક્રમાત્ ॥ ૫૧॥

શમીપત્રૈશ્ચ કુસુમૈરુત્તરાગ્રં તદૂર્ધ્વતઃ ।

આસ્તીર્ય દર્ભાંસ્તત્પીઠં ચૈલાજિનકુશોત્તરમ્ ॥ ૫૨॥

પ્રણવેન બ્રહ્મભિશ્ચ પઞ્ચગવ્યેન તાં તનુમ્ ।
પ્રોક્ષ્યાભિષિચ્ય રૌદ્રેણ સૂક્તેન પ્રણવેન ચ ॥ ૫૩॥

શઙ્ખતોયેનાભિષિચ્ય મૂર્ધ્નિ પુષ્પં વિનિઃક્ષિપેત્ ।
તદ્ગતસ્યાનુકૂલોઽસૌ શિવસ્મરણતત્પરઃ ॥ ૫૪॥

ઓમિત્યથ સમુદ્ધૃત્ય સ્વસ્તિવાચનપૂર્વકમ્ ।
ગર્તે યોગાસને સ્થાપ્ય પ્રાઙ્મુખં સ્યાદ્યથા તથા ॥ ૫૫॥

ગન્ધપુષ્પૈરલઙ્કૃત્વા ધૂપગુગ્ગુલુના તતઃ ।
વિષ્ણો હવ્યમિતિ પ્રોચ્ય રક્ષસ્વેતિ વદન્ દદેત્ ॥ ૫૬॥

દણ્ડં દક્ષિણહસ્તે તુ વામે દદ્યાત્કમણ્ડલુમ્ ।
પ્રજાપતે ન ત્વદેતાન્યન્યોમન્ત્રેણ સોદકમ્ ॥ ૫૭॥

બ્રહ્મજજ્ઞાનં પ્રથમમિતિ મન્ત્રેણ મસ્તકે ।
સ્પૃશઞ્જપ્ત્વા રુદ્રસૂક્તં ભ્રુવોર્મધ્યે સ્પૃશઞ્જપેત્ ॥ ૫૮॥

માનોમહાન્તમિત્યાદિ ચતુર્ભિર્મસ્તકં તતઃ ।
નાલિકેરેણ નિર્ભિદ્યાદવટં પૂરયેત્તતઃ ॥ ૫૯॥

પઞ્ચભિર્બ્રહ્મભિઃ સ્પૃષ્ટ્વા જપેત્ સ્થલમનન્યધીઃ ।
યો દેવાનામુપક્રમ્ય યઃ પરઃ સ મહેશ્વરઃ ॥ ૬.૨૧.૬૦॥

ઇતિ જપ્ત્વા મહાદેવં સામ્બં સંસારભેષજમ્ ।
સર્વજ્ઞમપરાધીનં સર્વાનુગ્રહકારકમ્ ॥ ૬૧॥

એકારત્નિસમુત્સેધમરત્નિદ્વયવિસ્તૃતમ્ ।
મૃદા પીઠં પ્રકલ્પ્યાથ ગોમયેનોપલેપયેત્ ॥ ૬૨॥

ચતુરસ્રં ચ તન્મધ્યે ગન્ધાક્ષતસમન્વિતેઃ ।
સુગન્ધકુસુમૈર્બિલ્વૈસ્તુલસ્યા ચ સમર્ચયેત્ ॥ ૬૩॥

પ્રણવેન તતો દદ્યાદ્ ધૂપદીપૌ પયો હવિઃ ।
દત્ત્વા પ્રદક્ષિણીકૃત્ય નમસ્કુર્યાચ્ચ પઞ્ચધા ॥ ૬૪॥

પ્રણવં દ્વાદશાવૃત્ત્વા સઞ્જપ્ય પ્રણમેત્તતઃ ।
દિગ્વિદિક્ક્રમતો દદ્યાદ્ બ્રહ્માર્ઘ્યં પ્રણવેન ચ ॥ ૬૫॥

એવં દશાહપર્યન્તં વિધિસ્તે સમુદાહૃતઃ ।
યતીનાં મુનિવર્યાથૈકાદશાહવિધિં શ્ૃણુ ॥ ૬૬॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં યતીનાં મરણાનન્તરદશાહપર્યન્તકૃત્યવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૬.૨૧॥

૬.૨૨
॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ ૐ નમઃ શિવાય ॥

ષષ્ઠી કૈલાસસંહિતા

## ૬.૨૨. દ્વાવિંશોઽધ્યાયઃ । યતીનામેકાદશાહકૃત્યવર્ણનમ્ ।

સુબ્રહ્મણ્ય ઉવાચ ।
એકાદશેઽહ્નિ સમ્પ્રાપ્તે યો વિધિઃ સમુદાહૃતઃ ।
તં વક્ષ્યે મુનિશાર્દૂલ યતીનાં સ્નેહતસ્તવ ॥ ૧॥

સમ્માર્જ્ય વેદીમાલિપ્ય કૃત્વા પુણ્યાહવાચનમ્ ।
પ્રોક્ષ્ય પશ્ચિમમારભ્ય પૂર્વાન્તં પઞ્ચ ચ ક્રમાત્ ॥ ૨॥

મણ્ડલાન્યુત્તરાશાસ્યઃ કુર્યાત્સ્વયમવસ્થિતઃ ।
પ્રાદેશમાત્રં સઙ્કલ્પ્ય ચતુરસ્રં ચ મધ્યતઃ ॥ ૩॥

બિન્દુત્રિકોણષટ્કોણવૃત્તાકારાણિ ચ ક્રમાત્ ।
શઙ્ખં ચ પુરતઃ સ્થાપ્ય પૂજોક્તક્રમમાર્ગતઃ ॥ ૪॥

પ્રાણાનાયમ્ય સઙ્કલ્પ્ય પૂજયિત્વા સુરેશ્વરીઃ ।
દેવતાઃ પઞ્ચ પૂર્વોક્તા અતિવાહિકરૂપિણીઃ ॥ ૫॥

સન્ત્યજ્યોત્તરતો દર્ભાનયશ્ચ સંસ્પૃશેત્ તતઃ ।
પશ્ચિમાદિ સમારભ્ય ષડુત્થાસનમાર્ગતઃ ॥ ૬॥

મણ્ડલાનિ ચ તેષ્વન્તઃ પુષ્પાણ્યાધાય પીઠવત્ ।
ૐ હ્રીમિત્યુક્ત્વાગ્નિરૂપાં તામતિવાહિકદેવતામ્ ॥ ૭॥

આવાહયામિ નમ ઇત્યન્તં સર્વત્ર ભાવયેત્ ।

દર્શયેત્સ્થાપનાદ્યાસ્તુ મુદ્રાઃ પ્રત્યેકમાદરાત્ ॥ ૮॥

હ્રાંહ્રીમિત્યાદિના કુર્યાદાસામઙ્ગાનિ ચ ક્રમાત્ ।
પાશાઙ્કુશાભયાભીષ્ટપાણિચન્દ્રોપલપ્રભાઃ ॥ ૯॥

રક્તાઙ્ગુલીયકચ્છાયરઞ્જિતાખિલદિઙ્મુખાઃ ।
રક્તામ્બરધરાઃ હસ્તપદપઙ્કજશોભિતાઃ ॥ ૬.૨૨.૧૦॥

ત્રિનેત્રોલ્લાસિવદનપૂર્ણચન્દ્રમનોહરાઃ ।
માણિક્યમુકુટોદ્ભાસિચન્દ્રલેખાવતંસિતાઃ ॥ ૧૧॥

કુણ્ડલામૃષ્ટગણ્ડાશ્ચ પીનોન્નતપયોધરાઃ ।
હારકેયૂરકટકકાઞ્ચીદામમનોહરાઃ ॥ ૧૨॥

તનુમધ્યાઃ પૃથુશ્રોણ્યો રક્તદિવ્યામ્બરાવૃતાઃ ।
માણિક્યમયમઞ્જીરસિઞ્જત્પદસરોરુહાઃ ।
પાદાઙ્ગુલીયકશ્રોણીર્મઞ્જુલાતિમનોહરાઃ ॥ ૧૩॥

અનુગ્રહેણ મૂર્તેન શિવવત્ કિં નુ સાધ્યતે ।
તસ્માચ્છક્ત્યાત્મમૂર્તેન સર્વં સાધ્યં મહેશવત્ ॥ ૧૪॥

સર્વાનુગ્રહકર્ત્રૈવ સ્વીકૃતાઃ પઞ્ચમૂર્તયઃ ।
સર્વકાર્યકરા દિવ્યાઃ પરાનુગ્રહતત્પરાઃ ॥ ૧૫॥

એવં ધ્યાત્વા તુ તાઃ સર્વા અનુગ્રહપરાઃ શિવાઃ ।
પાદયોઃ પાદ્યમેતાસાં દદ્યાચ્છઙ્ખોદબિન્દુભિઃ ॥ ૧૬॥

હસ્તેષ્વાચમનીયં ચ મૌલિષ્વર્ઘ્યં પ્રદાપયેત્ ।
શઙ્ખોદબિન્દુભિસ્તાસાં સ્નાનકર્મ ચ ભાવયેત્ ॥ ૧૭॥

રક્તામ્બરાણિ દિવ્યાનિ સોત્તરીયાણિ દાપયેત્ ।
મુકુટાદીન્યનર્ઘ્યાણિ દદ્યાદાભરણાનિ ચ ॥ ૧૮॥

સુવાસિતં ચ શ્રીખણ્ડમક્ષતાંશ્ચાતિશોભનાન્ ।
સુરભીણિ મનોજ્ઞાનિ કુસુમાનિ ચ દાપયેત્ ॥ ૧૯॥

ધૂપં ચ પરમામોદં સાજ્યવર્તિં ચ દીપકમ્ ।
સર્વં સમર્પયામીતિ પ્રણવં હ્રીમુપક્રમાત્ ॥ ૬.૨૨.૨૦॥

નમોઽન્તં ચ તતો દદ્યાત્પાયસં મધુનાપ્લુતમ્ ।
સાજ્યશર્કરયાપૂપકદલીગુડપૂરિતમ્ ॥ ૨૧॥

પ્રત્યેકં કદલીપત્રે ભરિતં ચ સુવાસિતમ્ ।
ભૂર્ભુવઃ સ્વરિતિ પ્રોચ્ય પ્રોક્ષણાદીનિ કારયેત્ ॥ ૨૨॥

ૐ હ્રીમિતિ સમુચ્ચાર્ય નૈવેદ્યં વહ્નિજાયયા ।
પાનીયં નમ ઇત્યુક્ત્વા પરં પ્રેમ્ણા સમર્પયેત્ ॥ ૨૩॥

તત ઉદ્વાસયેત્ પ્રીત્યા પૂર્વતો મુનિસત્તમ ।
સ્થલં વિશોધ્ય ગણ્ડૂષાચમનાર્ઘ્યાણિ દાપયેત્ ॥ ૨૪॥

તામ્બૂલં ધૂપદીપૌ ચ પ્રદક્ષિણનમસ્કૃતી ।
વિધાય પ્રાર્થયેદેતાઃ શિરસ્યઞ્જલિમાદધત્ ॥ ૨૫॥

શ્રીમાતરઃ સુપ્રસન્ના યતિં શિવપદૈષિણમ્ ।
રક્ષણીયં પ્રબ્રુવન્તુ પરમેશપદાબ્જયોઃ ॥ ૨૬॥

ઇતિ સમ્પ્રાર્થ્ય તાઃ સર્વા વિસૃજ્ય ચ યથાગતમ્ ।
તાસાં પ્રસાદમુદ્ધૃત્ય કન્યકાભ્યઃ પ્રદાપયેત્ ॥ ૨૭॥

ગોભ્યો વા જલમધ્યે વા નિક્ષિપેન્નાન્યથા ક્વચિત્ ।
અત્રૈવ પાર્વણં કુર્યાન્નૈકોદ્દિષ્ટં યતઃ ક્વચિત્ ॥ ૨૮॥

અત્રાયં પાર્વણશ્રાદ્ધે નિયમઃ પ્રોચ્યતે મયા ।
તં શ ૃણુષ્વ મુનિશ્રેષ્ઠ યેન શ્રેયો ભવેત્તતઃ ॥ ૨૯॥

કર્તા સ્નાત્વા ધૃતપ્રાણ ઉપવીતી સમાહિતઃ ।
સપવિત્રકરસ્ત્વસ્યાં પુણ્યતિથ્યામિતિ બ્રુવન્ ॥ ૬.૨૨.૩૦॥

કરિષ્યે પાર્વણં શ્રાદ્ધમિતિ સઙ્કલ્પ્ય ચોત્તરે ।
દદ્યાદ્દર્ભાનુત્તમાંશ્ચ હ્યાસનાર્થં જલં સ્પૃશેત્ ॥ ૩૧॥

તત્રોપવેશયેદ્ભક્ત્યા સાભ્યઙ્ગં કૃતમજ્જનાન્ ।
આહૂય ચતુરો વિપ્રાન્ શિવભક્તાન્દૃઢવ્રતાન્ ॥ ૩૨॥

વિશ્વેદેવાર્થં ભવતા પ્રસાદઃ ક્રિયતામિતિ ।
આત્મને ભવતા પશ્ચાદન્તરાત્મન ઇત્યપિ ॥ ૩૩॥

પરમાત્મન ઇત્યેવં પ્રોચ્ય પ્રાર્થ્ય ચ તાન્યતિઃ ।
શ્રદ્ધયા વરણં તેષાં કુર્યાદ્યાથાર્થ્યમાદરાત્ ॥ ૩૪॥

પાદૌ પ્રક્ષાલ્ય તેષાં તુ પ્રાઙ્મુખાનુપવેશ્ય ચ ।

ગન્ધાદિભિરલઙ્કૃત્ય ભોજયેચ્ચ શિવાગ્રતઃ ॥ ૩૫॥

ગોમયેનોપલિપ્યાત્ર દર્ભાન્પ્રાગગ્રકલ્પિતાન્ ।
આસ્તીર્ય સંયતપ્રાણઃ પિણ્ડાનાં ચ પ્રદાનકમ્ ॥ ૩૬॥

કરિષ્ય ઇતિ સઙ્કલ્પ્ય મણ્ડલત્રયમર્ચ્ય ચ ।
આત્માનમન્તરાત્માનં પરમાત્મનમપ્યતઃ ॥ ૩૭॥

ચતુર્થ્યન્તં વદન્ પશ્ચાદિમં પિણ્ડમિતીરયન્ ।
દદામીતિ ચ સમ્પ્રોચ્ય દદ્યાત્પિણ્ડાન્ સ્વભક્તિતઃ ॥ ૩૮॥

કુશોદકં તતો દદ્યાદ્યથાવિધિ વિધાનતઃ ।
તત ઉત્થાય વૈ કુર્યાત્ પ્રદક્ષિણનમસ્કૃતી ॥ ૩૯॥

તતો દત્ત્વા બ્રાહ્મણેભ્યો દક્ષિણાં ચ યથાવિધિ ।
નારાયણબલિં કુર્યાત્ તસ્મિન્નેવ સ્થલે દિને ॥ ૬.૨૨.૪૦॥

રક્ષાર્થમેવ સર્વત્ર વિષ્ણોઃ પૂજાવિધિઃ સ્મૃતઃ ।
કુર્યાદ્વિષ્ણોર્મહાપૂજાં પાયસાન્નં નિવેદયેત્ ॥ ૪૧॥

દ્વાદશાથ સમાહૂય બ્રાહ્મણાન્વેદપારગાન્ ।
કેશવાદિભિરભ્યર્ચ્ય ગન્ધપુષ્પાક્ષતાદિભિઃ ॥ ૪૨॥

ઉપાનચ્છત્રવસ્ત્રાદિ દત્ત્વા તેભ્યો યથાવિધિ ।
સન્તોષયેન્મહાભક્ત્યા વિવિધૈર્વચનૈઃ શુભૈઃ ॥ ૪૩॥

આસ્તીર્ય દર્ભાન્પૂર્વાગ્રાન્ભૂઃ સ્વાહા ચ ભુવઃ ભુવઃ ।
પ્રણવાદિ પ્રોચ્ય ભૂમૌ પાયસાન્નં બલિં હરેત્ ॥ ૪૪॥

એકાદશાહસુવિધિર્મયા પ્રોક્તો મુનીશ્વર ।
દ્વાદશાહવિધિં વક્ષ્યે શ઼ૃણુષ્વાદરતો દ્વિજ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં યતીનામેકાદશાહકૃત્યવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૬.૨૨॥

૬.૨૩

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

## ૬.૨૩. ત્રયોવિંશોઽધ્યાયઃ । દ્વાદશાહકૃત્યવર્ણનપૂર્વકવ્યાસાદિશિષ્યવર્ગકથનમ્ ।

સુબ્રહ્મણ્ય ઉવાચ ।
દ્વાદશાહે સમુત્થાય પ્રાતઃ સ્નાત્વા કૃતાહ્નિકઃ ।
શિવભક્તાન્યતીન્વાપિ બ્રાહ્મણાન્વા શિવપ્રિયાન્ ॥ ૧॥

નિમન્ત્ર્ય તાન્સમાહૂય મધ્યાહ્ને ચાપ્લુતાઞ્છુચીન્ ।
વિધિવદ્ભોજયેદ્ભક્ત્યા સ્વાદ્વન્નૈર્વિવિધૈઃ શુભૈઃ ॥ ૨॥

સન્નિધૌ પરમેશસ્ય પઞ્ચાવરણમાર્ગતઃ ।
પૂજયેત્તત્ર સંસ્થાપ્ય પ્રાણાનાયમ્ય વાગ્યતઃ ॥ ૩॥

મહાસઙ્કલ્પમાર્ગેણ સઙ્કલ્પ્યાસ્મદ્ગુરોરિહ ।
પૂજાં કરિષ્ય ઇત્યુક્ત્વા તતો દર્ભાનુપસ્પૃશેત્ ॥ ૪॥

પાદૌ પ્રક્ષાલ્ય ચાચમ્ય સ્વયં કર્તા ચ વાગ્યતઃ ।
સ્થાપયેદાસને તાન્વૈ પ્રાઙ્મુખાન્ભસ્મભૂષિતાન્ ॥ ૫॥

સદાશિવાદિક્રમતો ધ્યાયેદષ્ટૌ ચ તત્ર તાન્ ।
પરયા સમ્ભાવનયેતરાનપિ મુને દ્વિજાન્ ॥ ૬॥

પરમેષ્ઠિગુરું ધ્યાયેત્સામ્બબુદ્ધ્યા સ્વનામતઃ ।
ગુરું ચ પરમં તસ્માત્પરાપરગુરું તતઃ ॥ ૭॥

ઇદમાસનમિત્યુક્ત્વા ચાસનાનિ પ્રકલ્પયેત્ ।
પ્રણવાદિદ્વિતીયાન્તે સ્વસ્ય નામ સમુચ્ચરન્ ॥ ૮॥

આવાહયામિ નમ ઇત્યાવાહ્યાર્ઘોદકેન તુ ।
પાદ્યમાચમનં ચાર્ઘ્યં વસ્ત્રગન્ધાક્ષતાનપિ ॥ ૯॥

દત્ત્વા પુષ્પૈરલઙ્કૃત્ય પ્રણવાદ્યષ્ટનામભિઃ ।
સચતુર્થીનમોઽન્તૈશ્ચ સુગન્ધકુસુમૈસ્તતઃ ॥ ૬.૨૩.૧૦॥

ધૂપદીપૌ હિ દત્ત્વા ચ સકલારાધનં કૃતમ્ ।
સમ્પૂર્ણમસ્ત્વતિ પ્રોચ્ય નમસ્કુર્યાત્સમુત્થિતઃ ॥ ૧૧॥

પાત્રાણિ કદલીપત્રાણ્યાસ્તીર્યાદ્ભિર્વિશોધ્ય ચ ।
શુદ્ધાન્નપાયસાપૂપસૂપવ્યઞ્જનપૂર્વકમ્ ॥ ૧૨॥

દત્ત્વા પદાર્થાન્ કદલીનાલિકેરગુડાન્વિતાન્ ।
પાત્રાસનાનિ ચ પૃથગ્દદ્યાત્સમ્પ્રોચ્ય ચ ક્રમાત્ ॥ ૧૩॥

પરિષિચ્ય ચ સમ્પ્રોક્ષ્ય વિષ્ણોર્હવ્યમિતિ બ્રુવન્ ।
રક્ષસ્વેતિ કરસ્પર્શં કારયિત્વા સમુત્થિતઃ ॥ ૧૪॥

આપોશનં સમર્પ્યાથ પ્રાર્થયેત્તાનિદં પ્રતિ ।
સદાશિવાદયઃ પ્રીતા વરદાશ્ચ ભવન્તુ મે ॥ ૧૫॥

યે દેવા ઇતિ ચ તતો જપ્ત્વેદં સાક્ષતં ત્યજેત્ ।
નમસ્કૃત્ય સમુત્થાય સર્વત્રામૃતમસ્ત્વિતિ ॥ ૧૬॥

ઉક્ત્વા પ્રસાદ્ય ચ જપન્ ગણાનાં ત્વેત્યુપક્રમાત્ ।
વેદાદીન્ રુદ્રચમકૌ રુદ્રસૂક્તં ચ પઞ્ચ ચ ॥ ૧૭॥

વિપ્રાણાં ભોજનાન્તે તુ યાવન્મન્ત્રાંશ્ચ સાક્ષતાન્ ।
દત્ત્વોત્તરાપોશનં ચ હસ્તાઙ્ઘ્રિમુખશોધનમ્ ॥ ૧૮॥

કૃત્વાચાન્તાન્ સ્વાસનેષુ સ્થાપયિત્વા યથાસુખમ્ ।
શુદ્ધોદકં પ્રદાયાથ કર્પૂરાદિ યથોદિતમ્ ॥ ૧૯॥

મુખવાસં દક્ષિણાં ચ પાદુકાસનપત્રકમ્ ।
વ્યજનં ફલકં દણ્ડં વૈણવં ચ પ્રદાય તાન્ ॥ ૬.૨૩.૨૦॥

પ્રદક્ષિણનમસ્કારૈઃ સન્તોષ્યાશિષમા વહેત ।
પુનઃ પ્રણમ્ય સમ્પ્રાર્થ્ય ગુરુભક્તિમચઞ્ચલામ્ ॥ ૨૧॥

સદાશિવાદયઃ પ્રીતા ગચ્છન્તુ ચ યથાસુખમ્ ।
ઇત્યુદ્વાસ્ય દ્વારદેશાવધિ સમ્યગનુવ્રજન્ ॥ ૨૨॥

નિરુદ્ધસ્તૈઃ પરાવૃત્ય દ્વાઃસ્થૈર્વિપ્રૈશ્ચ બન્ધુભિઃ ।
દીનાનાથૈશ્ચ સહિતો ભુક્ત્વા તિષ્ઠેદ્યથાસુખમ્ ॥ ૨૩॥

વિકૃતં ન ભવેત્ક્વાપિ સત્યં સત્યં પુનઃ પુનઃ ।
પ્રત્યબ્દમેવં કુર્વાણો ગુર્વારાધનમુત્તમમ્ ।
ઇહ ભુક્ત્વા મહાભોગાન્ શિવલોકમવાપ્નુયાત્ ॥ ૨૪॥

સૂત ઉવાચ ।
એવં કૃતાનુગ્રહમાત્મશિષ્યં, શ્રીવામદેવં મુનિવર્યમુક્ત્વા ।
પ્રસન્નધીર્જ્ઞાનિવરો મહાત્મા, કૃત્વા પરાનુગ્રહમાશુ દેવઃ ॥ ૨૫॥

યન્નૈમિષારણ્યમુનીશ્વરાણાં, પ્રોક્તં પુરા વ્યાસમુનીશ્વરેણ ।

તસ્માદસાવાદિગુરુર્ભવાંસ્તુ, દ્વિતીય આર્યો ભુવને પ્રસિદ્ધઃ ॥ ૨૬॥

શ્રુત્વા મુનીન્દ્રો ભવતો મુખાજ્જાત્, સનત્કુમારઃ શિવભક્તિપૂર્ણઃ ।
વ્યાસાય વક્તા સ ચ શૈવવર્યઃ શુકાય વક્તા ભવિતા ચ પૂર્ણઃ ॥ ૨૭॥

પ્રત્યેકં મુનિશાર્દૂલ શિષ્યવર્ગચતુષ્ટયમ્ ।
વેદાધ્યયનસંવૃત્તં ધર્મસ્થાપનપૂર્વકમ્ ॥ ૨૮॥

વૈશમ્પાયન એવ સ્યાત્પૈલો જૈમિનિરેવ ચ ।
સુમન્તુશ્ચેતિ ચત્વારો વ્યાસશિષ્યા મહૌજસઃ ॥ ૨૯॥

અગસ્ત્યશ્ચ પુલસ્ત્યશ્ચ પુલહઃ ક્રતુરેવ ચ ।
તવ શિષ્યા મહાત્માનો વામદેવ મહામુને ॥ ૬.૨૩.૩૦॥

સનકશ્ચ સનન્દશ્ચ સનાતનમુનિસ્તતઃ ।
સનત્સુજાત ઇત્યેતે યોગિવર્યાઃ શિવપ્રિયાઃ ॥ ૩૧॥

સનત્કુમારશિષ્યાસ્તે સર્વવેદાર્થવિત્તમાઃ ।
ગુરુશ્ચ પરમશ્ચૈવ પરાત્પરગુરુસ્તતઃ ।
પરમેષ્ઠિગુરુશ્ચૈતે પૂજ્યાઃ સ્યુઃ શુકયોગિનઃ ॥ ૩૨॥

ઇદં પ્રણવવિજ્ઞાનં સ્થિતં વર્ગચતુષ્ટયે ।
સર્વોત્કૃષ્ટનિદાનં ચ કાશ્યાં સન્મુક્તિકારણમ્ ॥ ૩૩॥

એતન્મણ્ડલમદ્ભુતં પરશિવાધિષ્ઠાન રૂપં સદા, વેદાન્તાર્થવિચારપૂર્ણમતિભિઃ પૂજ્યં યતીન્દ્રૈઃ પરમ્ ।
વેદાદિપ્રવિભાગકલ્પિતમહાકાશાદિનાપ્યાવૃતં, ત્વત્સન્તોષકરં તથાસ્તુ જગતાં શ્રેયસ્કરં શ્રીપ્રદમ્ ॥ ૩૪॥

ઇદં રહસ્યં પરમં શિવોદિતં, વેદાન્તસિદ્ધાન્તવિનિશ્ચિતં પરમ્ ।
મત્તઃ શ્રુતં યદ્ભવતા તતો મુને, ભવન્મતં પ્રાજ્ઞતમા વદન્તિ ॥ ૩૫॥

તસ્માદનેનૈવ પથા ગતઃ શિવં, શિવોઽહમસ્મીતિ શિવો ભવેદ્યતિઃ ।
પિતામહાદિપ્રવિભાગમુક્તયે, નદ્યો યથા સિન્ધુમિમાઃ પ્રયાન્તિ ॥ ૩૬॥

સૂત ઉવાચ ।
એવં મુનીશ્વરાયૈતદુપદિશ્ય સુરેશ્વરઃ ।
સંસ્મૃત્ય ચરણામ્ભોજે પિત્રોઃ સર્વસુરાર્ચિતે ॥ ૩૭॥

કૈલાસશિખરં પરાપ કુમારઃ શિખરાવૃતમ્ ।
રાજિતં પરમાશ્ચર્યં દિવ્યજ્ઞાનપ્રદો ગુરુઃ ॥ ૩૮॥

વામદેવોઽપિ સચ્છિષ્યૈઃ સંવૃતઃ શિખિવાહનમ્ ।

સમ્પ્રણમ્ય જગામાશુ કૈલાસં પરમાદ્ભુતમ્ ॥ ૩૯॥

ગત્વા કૈલાસશિખરં પ્રાપ્યેશનિકટં મુનિઃ ।
દદર્શ મોક્ષદં માયાનાશં ચરણમીશયોઃ ॥ ૬.૨૩.૪૦॥

ભક્ત્યા ચાર્પિતસર્વાઙ્ગો વિસ્મૃત્ય સ્વકલેવરમ્ ।
પપાત સન્નિધૌ ભૂયો ભૂયો નત્વા સમુત્થિતઃ ॥ ૪૧॥

તતો બહુવિધૈઃ સ્તોત્રૈર્વેદાગમરસોત્કટૈઃ ।
તુષ્ટાવ પરમેશાનં સામ્બિકં સસુતં મુનિઃ ॥ ૪૨॥

નિધાય ચરણામ્ભોજં દેવદેવ્યોઃ સ્વમૂર્દ્ધનિ ।
પૂર્ણાનુગ્રહમાસાદ્ય તત્રૈવ ન્યવસત્સુખમ્ ॥ ૪૩॥

ભવન્તોઽપિ વિદિત્વૈવં પ્રપણવાર્થં મહેશ્વરમ્ ।
વેદગુહ્યં ચ સર્વસ્વં તારકં બ્રહ્મ મુક્તિદમ્ ॥ ૪૪॥

અત્રૈવ સુખમાસીનાઃ શ્રીવિશ્વેશ્વરપાદયોઃ ।
સાયુજ્યરૂપામતુલાં ભજધ્વં મુક્તિમુત્તમામ્ ॥ ૪૫॥

અહં ગુરુપદામ્ભોજસેવાયૈ બાદરાશ્રમમ્ ।
ગમિષ્યે ભવતાં ભૂયઃ સત્સમ્ભાષણમસ્તુ મે ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે ષષ્ઠ્યાં કૈલાસસંહિતાયાં દ્વાદશાહકૃત્યવર્ણનપૂર્વકવ્યાસાદિશિષ્યવર્ગકથનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૬.૨૩॥

ઇતિ કૈલાસસંહિતા ષષ્ઠી સમાપ્તિમગમત્ ।

Proofreading by Revathy Rajaraman/KC Swaminathan

*Shri Shiva Mahapuranam 6 Kailasa Samhita*
pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*